पत्युर्मित्रजने सनर्मवचना भिन्ना च तद्वैरिणि,
स्त्रीणां संवननं नतभ्रु तदिदं वित्तौषदं भर्तृषु ॥' [ ]

अपि च—

'पढमं चेय विबुज्झइ सुवइपसुंतंमि परियणे सयत्ते ।
जेमेइ भुत्तसेसं घरं स लन्दिण सा धरिणि ॥ (?)
घरवावारे धरिणि सुरए वेसा बहुं व गुरुमज्झे ।
परियणमज्झम्मि सहि विहुरे भिच्चं व मंतिव्व ॥' [ ]

---

५. पत्नी, नगर या ग्राम और घर गृहस्थधर्मके अनुकूल होने चाहिए। पिता, पितामह आदि पूर्वपुरुषोंके वंशको कुल कहते हैं और मद्य, मांस आदिके त्यागको शील कहते हैं। जिनका कुल और शील अपने समान हो उनके वंशकी कन्याका अग्नि और देव आदिकी साक्षीपूर्वक पाणिग्रहणको विवाह कहते हैं। विवाहका फल शुद्ध पत्नीकी प्राप्ति है। यदि पत्नी ठीक न हो तो जीवन नरक हो जाता है। योग्य पत्नीके मिलनेसे अच्छी सन्तान प्राप्त होती है, चित्त प्रसन्न रहता है, घरके कार्य सुन्दर रीतिसे सम्पन्न होते हैं, कुलीनता और आचारविशुद्धिका संरक्षण होता है, देव-अतिथि और बन्धु-बान्धओंके सत्कारमें बाधा नहीं आती। जनकने सीताको उपदेश देते हुए कहा था—'स्वामीके घर आनेपर स्त्रीको खड़ा होना चाहिए। उसके भाषणमें नम्रता होनी चाहिए। दृष्टि उसके चरणोंपर होनी चाहिए। उसके बैठनेपर स्वयं उसकी सेवा करनी चाहिए। उसके सो जानेपर सोना चाहिए और उसके जागनेसे पहले शय्या त्याग देना चाहिए। हे पुत्रि ! विद्वानोंने ये कुल-वधूके धर्म कहे हैं। तथा सासकी सेवा, बन्धुजनोंमें स्नेहशीलता, परिचारकोंमें वात्सल्य, सपत्नियोंमें सौहार्द, पतिके मित्रोंसे विनयपूर्ण वचनालाप और पतिके शत्रुओंसे अप्रीति ये सब पतिको अपना बनानेकी औषध है।' और भी कहा है—'जो सबसे पहले जागती है, और समस्त परिवारके सो जानेपर सोती है, सबके भोजन करनेपर स्वयं भोजन करती है वह गृहिणी है।' घरके व्यापारमें गृहिणी, सुरतमें वेश्या, गुरुजनोंके बीचमें वधू, परिजनोंके मध्यमें सखी और परिजनोंके अभावमें मन्त्री और सेवकके तुल्य जो हो वह गृहिणी है।

योग्य पत्नीके साथ स्थान और घर भी योग्य होना चाहिए। स्थान न तो एकदम खुला ही होना चाहिए और न एकदम गुप्त ही होना चाहिए। अत्यन्त खुले स्थानमें पासमें किसीका वास न होनेसे चोरों आदिका भय रहता है। अत्यन्त गुप्त होनेपर एक तो मकान-की अपनी शोभा नहीं रहती, चारों ओरसे मकानोंके जमघटमें वह छुप जाता है। दूसरे

स्वचक्र-परचक्र-दुर्भिक्ष-मारीति-जनविरोधाद्युपप्लव(-द्र-)वाभावात् पूर्वोपार्जितानां धर्मादीनामविनाशाद-पूर्वाणां च लाभात् त्रिवर्गार्हं स्थानं पुरग्रामादि। तथा शल्यादिदोषरहितं बहलदूर्वाप्रवालकुशस्तम्ब-प्रशस्त-वर्णगन्धरसमृत्तिका-सुस्वादुजलोद्गमनिपानादिमभिमिश्रविशेषस्थापितोदयं सरि(-परि-)पार्श्वतस्त्रैवर्गिकास्म-समानशिष्टगृहस्थगृहैरसंबाधतयाऽलंकृतं च त्रिवर्गास्पदं वास्तु। तथा प्रशिमितद्वारः सर्वर्तुरम्यः प्रविभक्त-देवार्चनाद्युचितप्रदेशः सुरक्षितश्चा अ य [-श्चालय] स्त्रिवर्गार्हः। ह्रीमयः—लज्जया वैयात्याभावेन निवृत्त इव। लज्जावान् हि प्राणप्रहाणेऽपि न प्रतिज्ञातमपजहाति, नापि विभव-वयोऽवस्था-देश-कालजात्याद्यनुचितवेषो भवति, नापि देशकुलजातिगर्हितं कर्म करोति, नापि प्रसिद्धदेशाचारमतिक्रामति। यदाह—

'लज्जां गुणौघजननीं जननीमिवार्या-
मत्यन्तशुद्धहृदयामनुवर्तमानाः।
तेजस्विनः सुखमसूनपि सन्त्यजन्ति,
सत्यस्थितिव्यसनिनो न पुनः प्रतिज्ञाम् ॥' [ ]

युक्ताहारविहारः—युक्तौ शास्त्रविहितावाहारविहारौ भोजनविचरणे यस्य। आहारप्रयोग-विधिर्यथा—

'प्रसृष्टे विण्मूत्रे हृदि सुविमले दोषे स्वपथगे,
विशुद्धे चोद्गारे क्षुदुपगमने वातेऽनुसरति।
तथाऽनावुद्रिक्ते विशदकरणे देहे च सुलघौ,
प्रयुञ्जीताहारं विधिनियमितं कालः स हि मतः ॥' [अष्टाङ्गहृ. ८।५५]

'विशुद्धे चोद्गारे' इत्यनेनाविशुद्धोद्गारवर्जनादजीर्णे न भुञ्जीत, इत्युक्तं स्यात्। यत्पठन्ति—'अजीर्णप्रभवा रोगा' इति। तल्लक्षणं यथा—

'मलवातयोर्विगन्धो विड्भेदो गात्रगौरवमरुच्यम्।
अविशुद्धश्चोद्गारः षड् जीर्णव्यक्तलिङ्गानि ॥' [ ]

आग वगैरहकी दुर्घटना होनेपर आने-जानेमें कठिनाई होती है। तथा पड़ोसी शीलसम्पन्न होने चाहिए। यदि पड़ोसी कुशील हों तो उनकी बातोंके सुनने और उनकी चेष्टाओंके देखनेसे अपने भी गुणोंकी हानि होती है। अतः अच्छे पड़ोसमें मकान होना आवश्यक है।

६. तथा गृहस्थको निर्लज्ज नहीं होना चाहिए, लज्जाशील होना चाहिए। लज्जा गुणोंकी जननी है। लज्जाशील व्यक्ति प्राण भले ही छोड़ दे किन्तु अपनी मर्यादाको नहीं छोड़ता।

७. आहार-विहार युक्त होना चाहिए। यदि अजीर्ण हो, पहले किया भोजन पचा न हो तो नया भोजन नहीं करना चाहिए। अजीर्णमें भोजन करनेपर अजीर्णमें वृद्धि होगी और अजीर्ण सब रोगोंकी जड़ है। अतः भूख लगनेपर मित भोजन करना चाहिए। कहा है—'जो मित भोजन करता है वह बहुत भोजन करता है। बिना भूखके अमृत भी खानेपर विष होता है'।

आहार करनेके समयका प्रविधान करते हुए कहा है—'जब मल मूत्रका त्याग कर दिया हो, हृदय निर्मल हो, वात पित्त कफ अपने योग्य हो, भूख लगी हो, वायुका निःसरण ठीक हो, अग्नि प्रज्वलित हो, शरीर हलका हो तब भोजन करना चाहिए। वही भोजनका काल माना गया है।' अजीर्णमें भोजन नहीं करना चाहिए। अजीर्ण रोगोंकी जड़ है। मलवायुमें दुर्गन्ध, मलका कड़ा होना, शरीरमें भारीपन, अरुचि और डकारमें खटास ये सब अजीर्णके लक्षण हैं।' अतः भूख लगनेपर हित, मित और सात्म्य भोजन करना चाहिए।

'विधिनियमितम्' इत्यनेन च काले हितं मितं सात्म्यं चाद्याविदयुक्तं स्यात्। मितं—मात्रापरिच्छिन्नम्। यथाह—

'मात्राशि सर्वकालं स्यान्मात्रा ह्यग्नेः प्रवर्तिका।
मात्रां द्रव्याण्यपेक्षन्ते गुरूण्यपि लघून्यपि ॥
गुरूणामर्धसौहित्यं लघूनां नातितृप्तता।
मात्राप्रमाणं निर्दिष्टं सुखं तावद्धि जीर्यति ॥' [अष्टाङ्गहृ. ८।२]

सात्म्यलक्षणं यथा—

'पानाहारादयो यस्य विरुद्धा प्रकृतेरपि।
सुखित्वायैव कल्पन्ते तत्सात्म्यमिति गीयते ॥'

अविधिभोजनः [-ने] धनव्याधिरसमाधिमरणं च सुघटमेव। यथाह—

'अयुक्तियुक्तमन्नं हि व्याधये मरणाय वा।'

विहारविधिर्यथा—सातपत्रपद (?)

अविधिविहारिणो ह्यनर्थपरम्पराऽवश्यं भाविन्येव।

आर्यसमितिः—आर्येषु सदाचरणैकप्राणेषु न तु कितव-धूर्त-विट-भट्ट-भण्डनटादिषु समितिः सङ्गतिर्यस्य। अनार्यसङ्गतौ हि सदपि शीलं विशियेत (विशीर्येत)। यथाह—

'यदि सत्सङ्गनिरतो भविष्यसि भविष्यसि।
अथ सज्जनगोष्ठीषु पतिष्यसि पतिष्यसि ॥'

अपि च—

'मिथ्यादृशां च पथस्थ्यातानां (?)
मायाविनां व्यसनिनां च खलात्मनां च।
सङ्गं विमुञ्चत बुधाः कुरुतोत्तमानां,
गन्तुं मतिर्यदि समुन्नतमार्ग एव ॥' [ ]

कहा है—सर्वदा उचित मात्रामें भोजन करना चाहिए। भोजनकी उचित मात्रा अग्निको उद्दीप्त करती है। भोज्य हलका हो या भारी हो, मात्राका ध्यान रखना आवश्यक है। जितना सुख पूर्वक पच सके वही मात्रा है। प्रकृति विरुद्ध भी खान-पान यदि सुखकारक हो तो उसे सात्म्य कहते हैं। अविधि पूर्वक भोजन आधि व्याधि और मरण कारक होता है। कहा है—अयुक्त भोजन व्याधि और मरणके लिए होता है। इसी तरह जो अविधि पूर्वक विहार करता है उसका अनिष्ट अवश्यंभावी होता है।

गृहस्थको सदाचारी पुरुषोंकी संगति करनी चाहिए, धूर्त और बदमाशोंकी नहीं। उनकी संगतिसे शील नष्ट होता है। कहा है—यदि उन्नतिके मार्गमें जाना चाहते हो तो मिथ्यादृष्टियों, कुपथगामियों, मायावियों, व्यसनियों और दुर्जनोंकी संगति छोड़कर उत्तम पुरुषोंकी संगति करो। गृहस्थको प्राज्ञ होना चाहिए अर्थात् उसे अपने और दूसरोंके द्रव्य, क्षेत्र काल भावकृत सामर्थ्य और असामर्थ्यका ज्ञान होना चाहिए। उसके ज्ञानपर ही सब कार्य सफल होते हैं, अन्यथा तो विफल होते हैं। कहा है—यदि शक्तिके अनुसार व्यायाम किया जाये तो प्राणियोंके अंगोंकी वृद्धि होती है और बलको विचारे बिना कार्य करनेसे विनाश होता है।'

१. अथासज्जन—यो. टी. १।४७।

'प्राज्ञ:' एतेन बलाबलज्ञत्वं दीर्घदर्शित्वं विशेषज्ञता चोक्ता स्यात् । तथाहि—बलं स्वपरयोर्द्रव्यक्षेत्र-कालभावकृतं सामर्थ्यमबलमपि तथैव । तत् ज्ञाने हि सर्वोऽप्यारम्भः फलवानन्यथा तु विफलम् । यदाह—

'स्थाने श्रमवतां शक्त्या व्यायामे वृद्धिरङ्गिनाम् ।
अयथाबलमारम्भो निदानं क्षयसंपदः ॥' [ ]

तच्च प्रज्ञैव । तथा दीर्घकालभावित्वाद्दीर्घमर्थमनर्थं च पश्यति पर्यालोचयतीत्येवंशीलो दीर्घदर्शी तद्यावोऽपि (?) प्रज्ञैव । 'प्रज्ञा कालत्रयार्थगा' इति वचनात् । तथा वस्त्ववस्तुनोः कृत्याकृत्ययोः स्वपरयोश्च विशेषमन्तरं जानातीति विशेषज्ञः । अविशेषज्ञो हि पुरुषः पशोर्नातिरिच्यते । अथवा विशेषं आत्मन एव गुणदोषाधिरोहणलक्षणं जानातीति विशेषज्ञः । यदाह—

'प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः ।
किन्नु मे पशुभिस्तुल्यं किन्नु सत्पुरुषैरिति ।' [ ]

स च प्रज्ञैव: । ततः सूक्तं प्राज्ञ इति । तथा चोक्तम्—

'इदं फलमियं क्रिया करणमेतदेष: क्रमो,
व्ययोऽयमनुषङ्गजं फलमिदं दशैषा मम ।
अयं सुहृदयं द्विषत्प्रयतदेशकालाविमा-
विति प्रतिवितर्कयन्प्रयतते बुधो नेतर: ॥' [ ]

कृतज्ञ:—कृतं परोपकृतं जानाति न निह्नुते । एवं हि तस्य कुशल[१]लाभाय उपकारकारिणो बहुमन्यते । कृतघ्नस्य निष्कृतिरेव नास्ति । यदाह—

'ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते तथा ।
निष्कृतिर्विहिता राजन् कृतघ्ने नास्ति निष्कृति: ॥' [ ]

कृतज्ञाश्चात्रेदानीमतिदुर्लभाः । यदाह—

इस प्रकारके ज्ञानको ही प्रज्ञा कहते हैं । तथा दीर्घदर्शी होना चाहिए जो दीर्घकालमें होनेवाले अर्थ अनर्थका विचार करता है उसे दीर्घदर्शी कहते हैं । यह भी प्रज्ञा ही है क्योंकि प्रज्ञाको त्रिकालवर्ती अर्थगत कहा है । तथा जो वस्तु अवस्तुके, कृत्य अकृत्यके अपने परायेके विशेष अन्तरको जानता है उसे विशेषज्ञ कहते हैं । जो पुरुष विशेषज्ञ नहीं है वह पशुसे भिन्न नहीं है । अथवा जो आत्माके ही गुण दोषोंपर आरोहण करने रूप विशेषको जानता है वह विशेषज्ञ है । कहा है—'मनुष्यको प्रतिदिन अपने चरितका निरीक्षण करना चाहिए कि वह पशुओंके तुल्य है या सत्पुरुषोंके तुल्य है ।' यह भी प्रज्ञा ही है अतः प्रज्ञा कहना उचित है । कहा है—यह फल है, यह क्रिया है, यह करण है, यह क्रम है, यह आनुषंगिक हानि लाभ है, मेरी यह दशा है, अमुक मेरा मित्र और अमुक मेरा शत्रु है, ये उचित देश काल है, ऐसा विचार बुद्धिमान ही करता है दूसरा नहीं करता ।' तथा गृहस्थको कृतज्ञ होना चाहिए—दूसरेके द्वारा किये गये उपकारको भूलना या छिपाना नहीं चाहिए । इससे यह लाभ है कि उपकार करने वाले उसका बहुमान करते हैं । कृतघ्नका तो उद्धार ही सम्भव नहीं है । कहा है—ब्रह्महत्या करनेवाले, मद्यपायी, चोर और व्रतभंग करनेवालेका तो उद्धार सम्भव है किन्तु कृतघ्नका उद्धार सम्भव नहीं है । आजके समयमें कृतज्ञ पुरुष दुर्लभ

---

१. लाभो यदुपकारिणो—योग. टी. ।

'पञ्चषाः सन्ति ते केचिदुपकर्तुं स्फुरन्ति ये।
ये स्मरन्त्युपकारस्य तैस्तु वन्ध्या वसुंधरा ॥' [ ]

यश्च कृतज्ञः स लोकवल्लभो भवत्येव। यदाह—

'विधित्सुरेनं तदिहात्मवश्यं कृतज्ञतायाः समुपैहि पारम्।
गुणैरुपेतोऽप्यखिलैः कृतघ्नः समस्तमुद्वेजयते हि लोकम् ॥' [ ]

वशी—इष्टेऽर्थेऽनासक्त्या विरुद्धे वा प्रवृत्त्या स्पर्शनादीन्द्रियविकारनिरोधकोऽन्तरङ्गारिषड्वर्गनिग्रहपरश्च। तत्रायुक्तितः प्रयुक्ताः कामक्रोध-लोभ-मान-मद-हर्षाः शिष्टगृहस्थानामन्तरङ्गोऽरिषड्वर्गः। तत्र परपरिगृहीतास्वनूढासु वा स्त्रीषु दुरभिसन्धिः कामः। परस्यात्मनो वा अपायमविचार्य कोपकरणं क्रोधः। दानार्हेषु स्वधनाप्रदानं निष्कारणं परधनग्रहणं च लोभः। दुरभिनिवेशारोहो युक्तोक्तौ[1] ग्रहणं वा मानः। कुलबलैश्वर्य-रूप-विद्यादिभिरहंकारकरणं परपदर्ष-[-प्रधर्ष] निबन्धनं वा मदः। निर्निमित्तं परदुःखोत्पादनेन स्वस्य द्यूत-पापर्द्ध्याद्यनर्थसंश्रयेण वा मनःप्रमोदो हर्षः। एतेषां च परिहार्यत्वमपायहेतुत्वात्। धर्मविधि—धर्मस्याभ्युदयनिःश्रेयसहेतोर्विधिः—युक्त्यागमाभ्यां प्रतिष्ठितिस्तम्। शृण्वन्—प्रत्यहमाकर्णयन्। यदाह—

'भव्यः किं कुशलं ममेति विमृशन्दुःखाद् भृशं भीतिवान्,
सौख्यैषी श्रवणादिबुद्धिविभवः श्रुत्वा विचार्य स्फुटम्।
धर्मं शर्मकरं दयागुणमयं युक्त्यागमाभ्यां स्थितं,
गृह्णन् धर्मकथां श्रुतावधिकृतः शास्यो निरस्ताग्रहः ॥' [आत्मानु., ७ श्लो.]

दयालुः—दुःखितदुःखप्रहाणेच्छालक्षणां दयां शीलयन्। 'धर्मस्य मूलं दया' इति श्रुतेस्तां ह्यवश्यं कुर्वीत। यदाह—

'प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा।
आत्मौपम्येन भूतानां दयां कुर्वीत मानवः ॥' [ ]

अपि च—

'श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥' [ ]

हैं। कहा है—'जो उपकार करनेका उत्साह रखते हैं वे तो कुछ हैं भी। किन्तु जो उपकारको स्मरण रखते हैं उनसे यह पृथ्वी बांझ है।' जो कृतज्ञ होता है वह लोगोंको प्रिय होता ही है। कहा है—'यदि तुम पृथ्वीको अपने वशमें करना चाहते हो तो कृतज्ञ बनो। जो सब गुणोंसे युक्त होते हुए भी कृतघ्न होता है सब लोग उससे घृणा करते हैं'। तथा गृहस्थको 'वशी' होना चाहिए। अर्थात् इष्ट वस्तुमें अनासक्तिके साथ तथा विरुद्ध वस्तुमें भी प्रवृत्ति न करके स्पर्शन आदि इन्द्रियोंके विकारको रोकनेवाला और अन्तरंग छह शत्रुओंके निग्रहमें तत्पर होना चाहिए। अयुक्तिसे प्रयुक्त काम, क्रोध, लोभ, मान, मद और हर्ष ये शिष्ट गृहस्थोंके छह अन्तरंग शत्रु हैं। दूसरेकी विवाहित या अविवाहित स्त्रीमें दुर्भावको काम कहते हैं। अपने या दूसरेके अपायका विचार न करके कोप करना क्रोध है। दानके योग्यको भी अपना धन न देना या अकारण पराया धन ग्रहण करना लोभ है। दुष्ट अभिप्रायको अथवा युक्त बातको भी ग्रहण न करना मान है। कुल, बल, ऐश्वर्य, रूप, विद्या आदिका अहंकार करना मद है। बिना कारणके दूसरोंको दुःखी करनेसे अथवा स्वयं जुआ, शिकार आदि अनर्थका

---

1. युक्तोक्ताग्रहणं।

एतेन—

'अवृत्तिव्याधिशोकार्ताननुवर्तेत शक्तितः ।
आत्मवत्सततं पश्येदपि कीटपिपीलिकाः ॥
आर्द्रसंतानतात्यागः कायवाक्चेतसां दमः ।
स्वार्थबुद्धिः पदार्थेषु पर्याप्तमिति सद्व्रतम् ॥
उपकारप्रधानः स्यादपकारपरेऽप्यरौ ।' [ ]

इत्यादिरप्याचारो निरुद्धो बोद्धव्यः, सकलगुणभिनित्वाद्दयायाः (?) अघभीः—अघात् पापात् दृष्टादृष्टापायफलात् कर्मणश्चौर्यादेर्मद्यपानादेश्च बिभ्यत् पापभीरित्यर्थः । सागारधर्मं—विकलचारित्रम् । यत्स्वामि—

'सकलं विकलं चरणं तत्सकलं सर्वसङ्गविरतानाम् ।
अनगाराणां विकलं सागाराणां ससङ्गानाम् ॥' [रत्न. श्रा., ५०]

चरेत्—'त्रिज्वाश्चाह' इत्यनेनार्हे सप्तमी । चरितुमर्हतीत्यर्थः । विधौ वा । यथोक्तगुणेन गृहिणा सागारधर्मश्चरितव्य इत्यर्थः । अत्र पूर्वो भद्रक उत्तरो द्रव्यपाक्षिक इति विभागः ॥११॥

अथ सकलसागारधर्मसंग्रहार्थमाह—

सम्यक्त्वममलममलान्यणु-गुण-शिक्षाव्रतानि मरणान्ते ।
सल्लेखना च विधिना पूर्णः सागारधर्मोऽयम् ॥१२॥

आश्रय लेनेमें मनका प्रमुदित होना हर्ष है। ये सब अपायका कारण होनेसे त्याज्य हैं। तथा अभ्युदय और मोक्षके हेतु धर्मकी विधिको—युक्ति और आगमसे उसके स्थापनाको सुननेवाला होना चाहिए। कहा है—जो भव्य जीव मेरा कल्याण किसमें है ऐसा विचारता हुआ दुःखसे अत्यन्त डरता है सुखको चाहता है, दयागुणमय सुखकारी धर्मको सुनकर युक्ति और आगमसे उसकी स्थितिका विचार करता है। धर्मकथा सुनता है उसे ग्रहण करता है और आग्रह नहीं रखता, वह प्रशंसनीय है। तथा दयालु होना चाहिए, दुःखीका दुख दूर करनेकी इच्छा रूप दयाका पालक होना चाहिए; क्योंकि धर्मका मूल दया है। कहा है—'जैसे हमें अपने प्राण प्रिय हैं उसी तरह अन्य प्राणियोंको भी हैं यह मानकर मनुष्यको सब प्राणियों पर दया करना चाहिए।' तथा धर्मका सार सुनना चाहिए और सुनकर उसे अवधारण करना चाहिए। जो बात स्वयं अपनेको अच्छी नहीं लगती वह दूसरोंके प्रति भी नहीं करना चाहिए। जो आजीविकाके अभावसे, व्याधि और शोकसे पीड़ित हैं शक्ति के अनुसार उनकी सहायता करना चाहिए और कीट चींटी आदिको भी अपने समान देखना चाहिए।' अपकारी शत्रुका भी उपकार करना चाहिए। इत्यादि आचार भी दयामें ही जानना। तथा गृहस्थको चोरी मद्यपान आदि पापोंसे डरते रहना चाहिए। ऐसे गृहस्थको श्रावक धर्म अर्थात् विकल चारित्र पालना चाहिए। कहा है—चारित्र दो प्रकारका है—सकल चारित्र और विकल चारित्र। समस्त परिग्रहसे रहित अनगार मुनियोंके सकल चारित्र होता है और परिग्रही गृहस्थोंके विकल चारित्र होता है ॥११॥

अब मन्दबुद्धि शिष्य सुख पूर्वक सरलतासे स्मरण रख सकें इसलिए समस्त सागारधर्मका संग्रह एक श्लोकसे कहते हैं—

शंका आदि दोषोंसे रहित सम्यग्दर्शन, निरतिचार अणुव्रत, गुणव्रत और शिक्षाव्रत और मरण समय विधिपूर्वक सल्लेखना यह पूर्ण सागार धर्म है ॥१२॥

सम्यक्त्वं प्राक् प्रबन्धेन व्यावर्णितम्। तस्य च मोक्षाङ्गेषु प्रधानत्वात् मुग्धधियां च दुर्लक्षणत्वात् इदानीं गृहिणां तत्प्रतिपत्तये प्राचां सूक्तिप्रपञ्चः प्रस्तीर्यते। तथाहि—

'जीवाजीवादीनां तत्त्वार्थानां सदैव कर्तव्यम्।
श्रद्धानं विपरीताभिनिवेशविविक्तमात्मरूपं तत् ॥' [पुरुषार्थसि. २२]

जीवाजीवादितत्त्वोपदेशस्तु संक्षेपेण यथा—

'उपादेयतया जीवोऽजीवो हेयतयोदितः।
हेयस्यास्मिन्नुपादानहेतुत्वेनास्रवः स्मृतः॥
हेयोपादानरूपेण बन्धः संपरिकीर्तितः।
संवरो निर्जरा हेयहानिहेतुतयोदिते ॥' [ ]

'श्रद्धानं परमार्थानामाप्तागमतपोभृताम्।
त्रिमूढापोढमष्टाङ्गं सम्यग्दर्शनमस्मयम्॥
आप्तेनोत्सिन्नदोषेण सर्वज्ञेनागमेशिना।
भवितव्यं नियोगेन नान्यथा ह्याप्तता भवेत् ॥
आप्तोपज्ञमनुल्लङ्घ्यमदृष्टेष्टविरोधकम्।
तत्त्वोपदेशकृत्सार्वं शास्त्रं कापथघट्टनम्॥
विषयाशावशातीतो निरारम्भोऽपरिग्रहः।
ज्ञानध्यानतपोरक्तस्तपस्वी स प्रशस्यते ॥' [रत्न. श्रा. ४, ५, ९, १० श्लो.]

तद्विशुद्धिविधिस्त्वयम्—

विशेषार्थ—कुन्दकुन्दाचार्यने [1]चरित्तपाहुडमें और उमास्वामीने तत्त्वार्थ सूत्रके सातवें अध्यायमें इतना ही पूर्ण सागार धर्म कहा है। इसीका विस्तार श्रावकाचारोंमें मिलता है। अन्तर गुणव्रतों और शिक्षाव्रतोंके भेदोंमें है संख्यामें अन्तर नहीं है। व्रतोंकी संख्या तो बारह ही है। जैसे कुन्दकुन्दने दिग्व्रत और देशव्रतको 'दिसिविदिसिमाण' नामका एक ही गुणव्रत माना है। तत्त्वार्थसूत्रमें इसे दो व्रत माने हैं। कुन्दकुन्दने इस एक संख्याकी कमीको सल्लेखनाको शिक्षाव्रतोंमें सम्मिलित करके पूर्ण किया है। इसका विशेष विवेचन आगे इन व्रतोंके प्रसंगमें किया जायगा। जहाँ मरणके साथ ही जीवनका अन्त हो उसे मरणान्त या तद्भवमरण कहते हैं। यों तो प्रति समय आयु कर्मके निषेकोंकी उदयपूर्वक निर्जरा होती है। उसे आवीचि मरण कहते हैं। यह मरण तो सभी प्राणियोंमें प्रतिक्षण हुआ करता है। उस मरणसे प्रयोजन यहाँ नहीं है। सम्यक् अर्थात् लाभ आदिकी अपेक्षा न करके, लेखना अर्थात् बाह्य और आभ्यन्तर तपके द्वारा शरीर और कषायोंको कृश करना सल्लेखना है। इसकी विधि सत्तरहवें अध्यायमें कहेंगे।

यद्यपि अनगार धर्मामृतके प्रारम्भमें सम्यग्दर्शनका वर्णन किया है तथापि मोक्षके कारणोंमें उसके प्रधान होनेसे तथा मूढ़ बुद्धियोंके द्वारा उसका लक्षण ठीक न जाननेसे, गृहस्थोंको उसका बोध करानेके लिए पूर्वाचार्योंकी सूक्तियोंको विस्तारसे कहते हैं—

---

१. पंचेवणुव्वयाइं गुणव्वयाइं हवंति.तह तिण्णि। सिक्खावय चत्तारि य संजमचरणं च सायारं—
—चरि. पा., २२ गा.।

'सकलमनेकान्तात्मकमिदमुक्तं वस्तुजातमखिलज्ञैः ।
किं सत्यमसत्यं वा न जातु शङ्केति कर्तव्या ॥
इह जन्मनि विभवादीनमुत्र चक्रित्वकेशवत्वादीन् ।
एकान्तवाददूषितपरसमयानपि च नाकाङ्क्षेत् ॥
क्षुत्तृष्णाशीतोष्णप्रभृतिषु नानाविधेषु भावेषु ।
द्रव्येषु पुरीषादिषु विचिकित्सा नैव करणीया ॥
लोके शास्त्राभासे समयाभासे च देवताभासे ।
नित्यमपि तत्त्वरुचिना कर्तव्यममूढदृष्टित्वम् ॥
धर्मोऽभिवर्द्धनीयः सदात्मनो मार्दवादिभावनया ।
परदोषनिगूहनमपि विधेयमुपबृंहणगुणार्थम् ॥
कामक्रोधमदादिषु चलयितुमुदितेषु वर्त्मनो न्यायात् ।
श्रुतमात्मनः परस्य च युक्त्या स्थितिकरणमपि कार्यम् ॥
अनवरतमहिंसायां शिवसुखलक्ष्मीनिबन्धने धर्मे ।
सर्वेष्वपि च सधर्मिषु परमं वात्सल्यमवलम्ब्यम् ॥
आत्मा प्रभावनीयो रत्नत्रयतेजसा सततमेव ।
दानतपोजिनपूजाविद्यातिशयैश्च जिनधर्मः ॥' [पुरुषार्थ., २३-३० श्लो.]

आचार्य अमृतचन्द्रने कहा है 'जीव अजीव आदि तत्त्वार्थोंका सदा ही विपरीत अभिप्राय रहित श्रद्धान करना चाहिए। वह श्रद्धान आत्माका स्वरूप है।' जीव अजीव आदि तत्त्वोंका उपदेश संक्षेपमें इस प्रकार है—जीव उपादेय है अजीव हेय है। जीवमें हेय अजीवको लानेमें कारण होनेसे आस्रव तत्त्व कहा है। हेय अजीवके उपादान रूपसे बन्ध कहा है और हेयकी हानिमें हेतु होनेसे संवर और निर्जरा कहा है। तथा समस्त हेयके छूट जानेसे मोक्ष कहा है।

आचार्य समन्तभद्रने सच्चे देव, शास्त्र, गुरुके तीन मूढ़ता और आठ मद रहित तथा आठ अंग सहित श्रद्धानको सम्यग्दर्शन कहा है। जो दोषोंसे रहित सर्वज्ञ और आगमका उपदेष्टा होता है वही आप्त है, अन्य आप्त नहीं है। तथा जो आप्तके द्वारा कहा गया है, जिसका कथन प्रत्यक्ष और अनुमानके अविरुद्ध है, तत्त्वोंका उपदेशक है, सबका हितकारी है और कुमार्गका नाशक है वही सच्चा शास्त्र है। जो विषयोंकी चाहसे रहित है, आरम्भ और परिग्रहसे रहित है तथा ज्ञान ध्यानमें लीन रहता है वही तपस्वी प्रशंसनीय (सच्चा गुरु) है।

सम्यग्दर्शनकी विशुद्धिकी विधि इस प्रकार है—सर्वज्ञ देवने समस्त वस्तुमात्रको अनेकान्तात्मक कहा है। यह सत्य है या असत्य है, ऐसी शंका कभी भी नहीं करनी चाहिए। यह सम्यग्दर्शनका प्रथम निःशंकित अंग है।

इस जन्ममें वैभव आदिकी और परजन्ममें चक्री केशव आदि पदोंकी अभिलाषा नहीं करनी चाहिए। तथा एकान्तवादसे दूषित अन्य धर्मोंकी भी इच्छा नहीं करनी चाहिए। यह दूसरा निःकांक्षित अंग है। भूख प्यास, शीत उष्ण आदि नाना प्रकारके भावोंमें और मल आदि द्रव्योंमें ग्लानि भाव नहीं करना चाहिए। यह तीसरा निर्विचिकित्सा अंग है। तत्त्व-रुचि सम्यग्दृष्टिको लोकमें, शास्त्राभासमें, मिथ्यादर्शनोंमें, मिथ्या देवताओंमें सदा अमूढ़ बुद्धि होना चाहिए। यह चतुर्थ अमूढ़ दृष्टि अंग है।

'स्मयेन योऽन्यानत्येति धर्मस्थान् गर्विताशयः ।
सोऽत्येति धर्ममात्मीयं न धर्मो धार्मिकैर्विना ॥
नाङ्गहीनमलं छेत्तुं दर्शनं जन्मसंततिम् ।
न हि मन्त्रोऽक्षरन्यूनो निहन्ति विषवेदनाम् ॥' [रत्न. श्रा. २१, २६ श्लो.]

अपि च—

'आप्तागमपदार्थानां श्रद्धानं कारणद्वयात् ।
मूढाद्यपोढमष्टाङ्गं सम्यक्त्वं प्रशमादिभाक् ॥' [सो. उपा., ४८ श्लो.]

अणु-गुण-शिक्षाव्रतानि—अणुगुणशिक्षापूर्वाणि व्रतानीति विग्रहः । मरणान्ते—मृत्यावासन्ने सति । सल्लेखना—कायकषायकृशीकरणलक्षणा श्रावकधर्मप्रासादकलशारोहणभूता । पूर्णः ब्रह्मचर्यादिपञ्चपदाचाराणां सल्लेखनापरिकर्मतया तत्रैवान्तर्भावात् ॥१२॥

अथासंयमिनोऽपि सम्यग्दृशः कर्मक्लेशापकर्षमाचष्टे—

भूरेखादिसदृक्कषायवशगो यो विश्वदृश्वाज्ञया
हेयं वैषयिकं सुखं निजमुपादेयं त्विति श्रद्दधत् ।
चौरो मारयितुं धृतस्तलवरेणेवाऽऽत्मनिन्दादिमान्
शर्माक्षं भजते रुजत्यपि परं नोत्तप्यते सोऽप्यघैः ॥१३॥

भूरेखादिसदृक्—दृषदवनीत्यादिसूत्रोक्तलक्षणा अप्रत्याख्यानावरणादयो द्वादश क्रोधादिविकल्पाः । विश्वदृश्वाज्ञया—'नान्यथावादिनो जिनाः' इति कृत्वा इत्यर्थः । निजं—आत्मोत्थं नित्यं वा । 'नित्यं स्वं

उपबृंहण गुणके लिए मार्दव आदि भावनाओंके द्वारा सदा आत्मामें धर्मकी वृद्धि करना चाहिए तथा परदोषोंको ढाँकना चाहिए। यह पाँचवाँ उपगूहन या उपबृंहण अंग है। न्याय मार्गसे विचलित करनेके लिए काम क्रोध मान आदि उत्पन्न होनेपर युक्तिसे अपना और दूसरोंका स्थितिकरण करना चाहिए। यह छठा अंग है। निरन्तर अहिंसामें, मोक्ष सुखके कारण धर्ममें तथा सब साधर्मियोंमें उत्कृष्ट वात्सल्य रखना चाहिए। यह सातवाँ अंग है। सदा रत्नत्रयकी ज्योतिसे आत्माको प्रभावित करना चाहिए। तथा दान, तप, जिनपूजा और ज्ञानातिशयके द्वारा जिनधर्मकी प्रभावना करनी चाहिए। अंगहीन सम्यग्दर्शन जन्म-परम्पराका छेदन करनेमें समर्थ नहीं होता; क्योंकि अक्षरोंसे हीन मन्त्र विषकी वेदनाको दूर नहीं कर सकता।

आचार्य सोमदेवने कहा है—अन्तरंग बहिरंग कारणोंसे आप्त आगम और पदार्थोंका मूढ़ता आदिसे रहित और आठ अंग सहित श्रद्धान सम्यग्दर्शन है। प्रशम आदि इसके गुण हैं ॥१२॥

इस प्रकार यह सम्यक्त्वका स्वरूप कहा है।

आगे कहते हैं कि असंयमी सम्यग्दृष्टिके भी कर्मजन्य क्लेशोंमें कमी होती है—

जो सर्वज्ञकी आज्ञासे वैषयिक सुख छोड़ने योग्य है और आत्मिक सुख उपादेय है, इस प्रकारका श्रद्धान रखते हुए भी पृथ्वी आदि की रेखाके समान अप्रत्याख्यानावरण आदि बारह कषायोंके अधीन होकर इन्द्रियोंसे होनेवाले सुखको भोगता है और स्थावर तथा जंगम प्राणियोंको पीड़ा भी पहुँचाता है, किन्तु कोतवालके द्वारा मारनेके लिए पकड़े गये चोरके समान अपनी निन्दा गर्हा करता है, वह अविरत सम्यग्दृष्टि भी पापसे उत्कृष्ट क्लेशको प्राप्त नहीं होता ॥१३॥

च निजं प्रोक्तम्' इत्यभिधानात् । त्विति—तुरवधारणे भिन्नक्रम इत्येवेत्यर्थः (?) आत्मनिन्दादिमान्—धिग् मामेवं प्रदीपहस्तमप्यन्धकूपे पतन्तमित्यात्मानं निन्दयन् । भगवन् ! कथमस्मै दुर्गतिदुःखाय घटिष्यत एवमुत्पथचारी जनोऽयमिति गुरुसाक्षिकं गर्हमाणश्च । आक्षं—इन्द्रियेभ्य आगतम् । रुजति—पीडयति । परं—स्थावरं जङ्गमं वा भूतग्रामम् । एतेनासंयतसम्यग्दृष्टिः स भवतीत्युक्तं स्यात् । यथाहुः—

'णो इंदिएसु विरदो णो जीवे थावरे तसे वापि ।
जो सद्दहदि जिणुत्तं सम्माइट्ठी अविरदो सो ॥' [गो. जी. २९ गा.]

उत्तप्यते—उत्कृष्टं क्लिश्यते । सोऽपि, किं पुनस्त्यक्तविषयसुखः सर्वात्मनैकदेशेन वा हिंसादिभ्यो विरतश्चेत्यपिशब्दार्थः ।

विशेषार्थ—धर्मका प्रारम्भ सम्यग्दर्शनसे होता है । इसीसे सभी आचार्योंने सम्यग्दर्शनको धर्मका मूल कहा है । आचार्य कुन्दकुन्दने अपने दंसणपाहुडमें सम्यग्दर्शनकी प्रशंसा करते हुए सम्यग्दर्शनको धर्मका मूल कहा है और सम्यग्दर्शनसे भ्रष्टको ही भ्रष्ट कहा है और उसको मोक्षका अपात्र कहा है । इसी तरह आचार्य समन्तभद्रने भी आचार्य कुन्दकुन्दका ही अनुसरण करते हुए कहा है कि तीनों कालों और तीनों लोकोंमें सम्यक्त्वके समान कल्याणकारी और मिथ्यात्वके समान अकल्याणकारी कोई भी नहीं है । और यह भी कहा है कि यतः ज्ञान और चारित्रसे सम्यग्दर्शन श्रेष्ठ या उत्कृष्ट है इसलिए उसे मोक्षमार्गमें कर्णधार कहा है । आचार्य अमृतचन्द्रजीने कहा है कि सम्यग्दर्शन सम्यग्ज्ञान और सम्यक्-चारित्रमें-से सबसे पहले पूर्ण प्रयत्नके साथ सम्यग्दर्शनको स्वीकार करना चाहिए; क्योंकि उसके होनेपर ही ज्ञान और चारित्र सम्यक् होते हैं । इसीसे सूत्रजीमें भी 'सम्यग्दर्शनज्ञान-चारित्राणि मोक्षमार्गः' इस प्रथम सूत्रमें सम्यग्दर्शनको प्रथम स्थान दिया है । सारांश यह है कि सम्यग्दर्शनके बिना न शास्त्रज्ञानका कोई मूल्य है न आचारका कोई मूल्य है । इसका कारण क्या है ? जिनशासनका सर्वप्रथम उद्घोष है कि इन्द्रियोंके द्वारा हमें जो सुख मिलता है वह सुख सुख नहीं है दुःख है । सुख तो आत्माका धर्म है । जब तक इसपर श्रद्धा न जमे तब तक समस्त त्याग और ज्ञानका कोई मूल्य नहीं है । और यह श्रद्धा सात तत्त्वोंपर श्रद्धान होनेसे ही होती है इसीसे तत्त्वार्थ श्रद्धानको सम्यक्त्व कहा है । इसीमें देव शास्त्र गुरु भी आ जाते हैं । यह श्रद्धा ऊपरी नहीं होती । इसीसे सम्यग्दर्शनको आत्मपरिणाम कहा है । समस्त परभावोंसे भिन्न अपने चैतन्य स्वरूपकी श्रद्धा ही वस्तुतः सम्यग्दर्शन है । चैतन्य स्वरूपकी सामान्य श्रद्धा तो नारकी तिर्यंच आदिको भी होती है । जिन्हें विशेष ज्ञान नहीं होता वे 'भगवान् जिनेन्द्र अन्यथा नहीं कहते' मात्र इसी दृढ़तम श्रद्धा वश यह श्रद्धा करते हैं कि वैषयिक सुख हेय है और आत्मिक सुख उपादेय है । इस श्रद्धाको ग्रन्थकारने निश्चय-सम्यग्दर्शनरूप कहा है । वह अपनी टीकामें लिखते हैं—'एतेन निश्चयसम्यग्दर्शनभाग्भवन्

१. 'एव तु अत्रावधारणार्थो भिन्नक्रमः ।'—भ. कु. च. ।
२. 'दंसणमूलो धम्मो उवइट्ठो जिणवरेहि सिस्साणं ।'—दंसणपा. २ गा.
३. 'न सम्यक्त्वसमं किञ्चित् त्रैकाल्ये त्रिजगत्यपि ।
श्रेयोऽश्रेयश्च मिथ्यात्वसमं नान्यत्तनूभृताम्' ॥—रत्न. श्रा., ३४ श्लो. ।
४. दर्शनं ज्ञानचारित्रात् साधिमानमुपाश्नुते । दर्शनं कर्णधारं तन्मोक्षमार्गे प्रचक्ष्यते ।—रत्न. श्रा., ३१ श्लो. ।
५. 'तत्रादौ सम्यक्त्वं समुपाश्रयणीयमखिलयत्नेन ।
तस्मिन् सत्येव यतो भवति ज्ञानं चरित्रं च ॥'—पुरुषार्थ. २१ ।

अघैः—पापैः दुर्खैर्वा बहुभिः । उक्तं च—

'सम्मत्त सलिलपवहो णिच्चं हिययम्मि पवट्टए जस्स ।

३ कम्मं बालुयवरणं व तस्स बंधोच्चिय ण एइ ।।' —[धम्मरसायण १४०]

इत्युक्तं वेदितव्यम् ।' अर्थात् इच्छित स्त्री आदिको भोगनेसे होनेवाला सुख छोड़ने योग्य है कभी भी सेवनीय नहीं है ; क्योंकि उसका सेवन दुःखदायक कर्मबन्धका कारण है । तथा रत्नत्रयमें उपयोग लगानेसे आत्मामें प्रकट हुआ सुख उपादेय है, ऐसा उसे अन्तरंगसे रुचता है । वह स्वप्नमें भी अन्यथा नहीं सोचता । इसका कारण है उसकी जिनेन्द्रके शासनपर दृढ़तम श्रद्धा कि जिनेन्द्र अन्यथावादी नहीं हैं । इससे जानना चाहिए कि वह निश्चय सम्यग्दृष्टि है । चतुर्थ अविरत सम्यग्दृष्टि गुणस्थान निश्चयसम्यग्दर्शनको लेकर ही समझना चाहिए । परमात्मप्रकाशकी टीकामें ब्रह्मदेवजीने लिखा है—'प्रभाकर भट्ट पूछता है—अपनी शुद्ध आत्मा ही उपादेय है इस प्रकारकी रुचिरूप निश्चयसम्यग्दर्शन होता है ऐसा आपने अनेक बार कहा है । यहाँ आप वीतराग चारित्रके साथ निश्चय सम्यक्त्व होता है ऐसा कहते हैं । यह तो पूर्वापरविरुद्ध है; क्योंकि अपनी शुद्ध आत्मा ही उपादेय है' इस प्रकारकी रुचिरूप निश्चयसम्यक्त्व गृहस्थ अवस्थामें तीर्थंकर परमदेव, भरत, सगर, राम, पाण्डव आदिके था । किन्तु उनके वीतराग चारित्र नहीं था । यह परस्पर विरोध है । यदि था तो वे असंयत कैसे हुए । यह पूर्वपक्ष है । इसका उत्तर यह है—उनके 'शुद्धात्मा उपादेय है' इस प्रकारकी भावनारूप निश्चय सम्यक्त्व वर्तमान है । किन्तु चारित्र मोहके उदयसे स्थिरता नहीं है । व्रतप्रतिज्ञाका भंग होता है इस कारण असंयत कहे जाते हैं, शुद्धात्म भावनासे च्युत होनेपर भरत आदि निर्दोष परमात्माका, अर्हंत सिद्धोंका गुणस्तवन या वस्तुरूप स्तवन आदि करते हैं, उनके चरित पुराण आदि सुनते हैं । उनके आराधक आचार्य उपाध्याय साधुओंको दान पूजा आदि करते हैं जिससे खोटे ध्यानसे बचें और संसारकी स्थितिका छेद हो । इसलिए शुभराग होनेसे सरागसम्यग्दृष्टि कहलाते हैं । उनके सम्यक्त्वको निश्चय सम्यक्त्व इसलिए कहा जाता है कि वह वीतराग चारित्रके अविनाभावी निश्चय सम्यक्त्व-का परम्परासे कारण है ।'

इस तरह ब्रह्मदेवजीने रागके सहभावी सम्यक्त्वको व्यवहार सम्यक्त्व और रागके अभाव सहित सम्यक्त्वको निश्चय सम्यक्त्व कहा है क्योंकि राग नाम व्यवहारका है ।

१. 'अत्राह प्रभाकरभट्टः—निजशुद्धात्मैवोपादेय इति रुचिरूपं निश्चयसम्यक्त्वं भवतीति बहुधा व्याख्यातं पूर्वं भवद्भिः । इदानीं पुनः वीतरागचारित्राविनाभूतं निश्चयसम्यक्त्वं व्याख्यातमिति पूर्वापरविरोधः । कस्मादिति चेत् निजशुद्धात्मैवोपादेय इति रुचिरूपं निश्चयसम्यक्त्वं गृहस्थावस्थायां तीर्थंकरपरमदेव-भरत-सगर-राम-पाण्डवादीनां विद्यते । न च तेषां वीतरागचारित्रमस्तीति परस्परविरोधः । अस्ति चेत्तर्हि तेषामसंयतत्वं कथमिति पूर्वपक्षः । तत्र परिहारमाह—तेषां शुद्धात्मोपादेयभावनारूपं निश्चयसम्यक्त्वं विद्यते परं किंतु चारित्रमोहोदयेन स्थिरता नास्ति व्रतप्रतिज्ञाभङ्गो भवतीति तेन कारणेनासंयता वा भण्यन्ते । शुद्धात्मभावनाच्युताः सन्तो भरतादयो निर्दोषिपरमात्मनामर्हत्सिद्धानां गुणस्तववस्तुस्तवरूपस्तव-नादिकं कुर्वन्ति तच्चरितपुराणादिकं च समाकर्णयन्ति, तदाराधकपुरुषाणामाचार्योपाध्यायसाधूनां विषयकषायदुर्ध्यानवञ्चनार्थं संसारस्थितिच्छेदनार्थं च दानपूजादिकं कुर्वन्ति तेन कारणेन सरागसम्यग्दृष्टयो भवन्ति । या पुनस्तेषां सम्यक्त्वस्य निश्चयसम्यक्त्वसंज्ञा वीतरागचारित्राविनाभूतस्य निश्चयसम्यक्त्वस्य परम्परया साधकत्वात् ।'—पर. प्रका. टी. दोहा २।१७ ।

तथा—

'सम्यग्दर्शनशुद्धा नारकतिर्यग्नपुंसकस्त्रीत्वानि।
दुःकुलविकृताल्पायुर्दरिद्रतां च व्रजन्ति नाप्यव्रतिकाः ॥' [रत्न. श्रा. ३५] ३

किन्तु वह सरागसम्यक्त्व वीतरागचारित्रके अविनाभावी निश्चय सम्यक्त्वका कारण है इसलिए भी निश्चय सम्यक्त्व कहा है। इस विषयमें—पं. टोडरमलजीके मोक्षमार्ग प्रकाशकका भी कथन उद्धृत किया जाता है—

'विपरीताभिनिवेश रहित श्रद्धानरूप 'आत्माका परिणाम वह तो निश्चय सम्यक्त्व है क्योंकि वह सत्यार्थ सम्यक्त्वका स्वरूप है। सत्यार्थका ही नाम निश्चय है। तथा विपरीताभिनिवेश रहित श्रद्धानको कारणभूत श्रद्धान सो व्यवहार सम्यक्त्व है। क्योंकि कारणमें कार्यका उपचार किया है। सो उपचारका ही नाम व्यवहार है। वहाँ सम्यग्दृष्टि जीवके देवगुरु धर्मादिकका सच्चा श्रद्धान है। उसी निमित्तसे उसके श्रद्धानमें विपरीताभिनिवेशका अभाव है। यहाँ विपरीताभिनिवेश रहित श्रद्धान सो तो निश्चय सम्यक्त्व है। और देवगुरु धर्मादिकका श्रद्धान है सो व्यवहारसम्यक्त्व है। इस प्रकार एक ही कालमें दो सम्यक्त्व पाये जाते हैं। तथा मिथ्यादृष्टि जीवके देवगुरु धर्मादिकका श्रद्धान आभास मात्र है। और उसके श्रद्धानमें विपरीताभिनिवेशका अभाव नहीं होता, इसलिए वहाँ निश्चय सम्यक्त्व तो है नहीं और व्यवहारसम्यक्त्वका भी आभास मात्र है क्योंकि उसके देवगुरु धर्मादिकका श्रद्धान है सो विपरीताभिनिवेशके अभावका साक्षात् कारण नहीं हुआ। कारण हुए बिना उपचार सम्भव नहीं।'

ऊपर जिस दृष्टिसे पं. आशाधरजीने अविरत सम्यक्दृष्टिके सम्यक्त्वको निश्चय सम्यक्त्व कहा है उसी दृष्टिसे पं. टोडरमलजीने निश्चय सम्यक्त्वका स्वरूप कहा है। ऐसा निश्चय सम्यग्दृष्टि ही अविरत सम्यग्दृष्टि होता है क्योंकि उसके संयमका लेश भी नहीं होता। उसका कारण यह है कि उसके सोलह कषायोंमें-से अप्रत्याख्यानावरण आदि बारह कषायोंका उदय वर्तमान है। जिसके उदयमें जीव थोड़ा-सा भी व्रत संयम धारण करनेमें असमर्थ होता है उसे अप्रत्याख्यानावरण कषाय कहते हैं। इसीके उदयसे प्रेरित होकर वह इन्द्रिय सम्बन्धी सुखको भी भोगता है और स्थावर तथा त्रसजीवोंका घात भी करता है। ऐसा वह सम्यक्त्व दशामें ही करता है तभी तो उसे अविरत सम्यग्दृष्टि कहते हैं। गोम्मटसार जीवकाण्डमें भी सिद्धान्त चक्रवर्ती नेमिचन्द्राचार्यने ऐसा ही कहा है कि जो न तो इन्द्रियोंके विषयोंसे विरत है और न त्रस और स्थावर जीवोंकी हिंसासे विरत है केवल जिनवचनोंपर उसकी श्रद्धा है वह अविरत सम्यग्दृष्टि है। यहाँ उसका उदाहरण कोतवालके द्वारा मारनेके लिए पकड़े गये चोरसे दिया है। यही उदाहरण ब्रह्मदेव सूरिने बृहद्द्रव्य संग्रहकी टीकामें दिया है।

१. 'यदुदयाद्देशविरतिं संयमासंयमाख्यामल्पामपि कर्तुं न शक्नोति ते देशप्रत्याख्यानमावृण्वन्तोऽप्रत्याख्यानावरणाः क्रोधमानमायालोभाः।'—सर्वार्थ. ८।९।

२. 'णो इंदिएसु विरदो णो जीवे थावरे तसे वा पि।
जो सद्दहदि जिणुत्तं सम्माइट्ठी अविरदो सो ॥'—गो. जी. २९ गा.।

३. 'भूमिरेखादिसदृशक्रोधादिद्वितीयकषायोदयेन मारणनिमित्तं तलवरगृहीततस्करवदात्मनिन्दासहितः सन्निन्द्रियसुखमनुभवतीत्यविरतसम्यग्दृष्टेर्लक्षणम्।'—बृहद्. टी., १३ गा.।

अपि च—

'न दुःखबीजं शुभदर्शनक्षितौ कदाचन क्षिप्तमपि प्ररोहति ।
सदाऽप्यनुप्तं सुखबीजमुत्तमं कुदर्शने तद्विपरीतमिष्यते ॥' [ ] ॥१३॥

अथ धर्मशर्मवद्यशोऽपि मनःप्रसत्तिनिमित्तत्वाच्छिष्टैरवश्यं सेव्यमित्युपदेष्टुमाह—

किन्तु दोनोंमें अन्तर है। ब्रह्मदेवजी कहते हैं कि जैसे मारनेके लिए कोतवालके द्वारा पकड़ा गया चोर अपनी निन्दा वगैरह करता है वैसे ही अविरत सम्यग्दृष्टि इन्द्रियसुख भोगकर अपनी निन्दादि करता है। पं. आशाधरजी भी अपनी टीकामें कहते हैं कि अविरत सम्यग्दृष्टि भी अपनी निन्दा करता है—'मुझे धिक्कार है मैं हाथमें दीपक लिये हुए होने पर भी अन्धकूपमें गिरनेवालेके समान हूँ।' तथा गुरुके समक्ष अपनी गर्हा भी करता है कि 'भगवन्! मुझ कुमार्गगामीका दुर्गतिके दुःखोंसे कैसे बचाव होगा।' इसपर-से यह प्रश्न होता है कि ऐसा होते हुए भी वह कैसे इन्द्रियसुखका सेवन करता है और कैसे उसके लिए प्राणियोंका घात करता है? तो उसका उत्तर है कि वह चारित्रमोहनीयके उदयके अधीन होकर ऐसा करता है। जैसे कोतवालके द्वारा मारनेके लिए पकड़ा गया चोर कोतवालके अधीन होकर जो-जो कोतवाल कराता है, गधेपर चढ़ाना आदि, वह उस चोरको करना पड़ता है। इसी तरह अविरत सम्यग्दृष्टि जीव भी चारित्रमोहके उदयसे जो-जो द्रव्यहिंसा, भावहिंसा आदि करायी जाती है उसे अयोग्य जानते हुए भी करता है क्योंकि अपने समय पर फलोन्मुख हुए कर्मके उदयको टालना बहुत ही कठिन है। इस तरह पं. आशाधरजीने उक्त दृष्टान्तका प्रयोग दूसरे प्रकारसे किया है। उक्त कथनसे यह स्पष्ट है कि अविरत सम्यग्दृष्टिके किसी प्रकारका कोई त्याग नहीं होता। किन्तु त्यागके मार्गपर चलनेकी आन्तरिक भूमिका मात्र तैयार हो जाती है। जिस इन्द्रियसुखको ही सार मानकर जीव दुनिया-भरके पाप कार्य करता है उसे वह अन्तःकरणसे हेय मानने लगता है और जिस आत्मिक सुखको वह भूला था उसे उपादेय मानता है। उसकी यह आन्तरिक श्रद्धा ही उसे अविरत सम्यग्दृष्टिसे देशविरत और सर्वविरत बनाती है। किन्तु लेशमात्र देशसंयमके नहीं होनेपर भी सम्यक्त्व मात्रसे ही उसके सांसारिक कष्टोंमें कमी हो जाती है। सम्यक्त्व ग्रहण करनेसे पहले आगामी भवकी आयुका बन्ध न करनेवाले असंयमी भी सम्यग्दृष्टिके सुदेव और उत्तम मनुष्य पर्यायको छोड़कर शेष समस्त जन्मोंका अभाव हो जाता है, क्योंकि अबद्धायुष्क सम्यग्दृष्टि मरकर या तो उत्तम देव होता है या उत्तम मनुष्य होता है। किन्तु जो आगामी भवकी आयुका बन्ध कर लेनेके बाद सम्यक्त्व ग्रहण करता है उसने यदि नरकायुका बन्ध किया है तो वह मरकर प्रथम नरकमें जघन्य स्थिति ही भोगता है। अतः केवल सम्यक्त्वके प्रभावसे उसका बहुत-सा दुःख घट जाता है। अतः संयम धारण करनेका समय आनेसे पहले संसारसे भयभीत भव्य जीवको सदा सम्यग्दर्शनकी आराधनामें ही प्रयत्न करना चाहिए। इस प्रकार उक्त श्लोकका उपसंहार विधिपरक ही लेना चाहिए॥१३॥

आगे कहते हैं कि धर्म और सुखकी तरह यश भी मनकी प्रसन्नतामें निमित्त है अतः शिष्ट पुरुषोंको यशके कार्य भी करना चाहिए—

---

१. दुर्गतावायुषो बन्धात् सम्यक्त्वं यस्य जायते। गतिच्छेदो न तस्यास्ति तथाप्यल्पतरा स्थितिः ॥ [ ]

धर्मं यशः शर्मं च सेवमानाः केऽप्येकशो जन्म विदुः कृतार्थम् ।
अन्ये द्विशो विद्म वयं त्वमोघान्यहानि यान्ति त्रयसेवयैव ॥१४॥

केऽपि—लौकिकाः । एकशः—एकैकं । द्विशः—द्वे द्वे ॥१४॥

अथ सम्यक्त्वदृढत्वानन्तरं शिष्टगृहस्थानामवश्यारोहणीयं—

'जो तसवहादु विरदो अविरदओ तह य थावरवहादो ।
एक्कसमयम्हि जीवो विरदाविरदो जिणेक्कमई ॥' [गो. जी. ३१ गा.]

इति सूत्रनिर्दिष्टं संयतासंयतत्वपदं निर्देष्टुमाह—

मूलोत्तरगुणनिष्ठामधितिष्ठन् पञ्चगुरुपदशरण्यः ।
दानयजनप्रधानो ज्ञानसुधां श्रावकः पिपासुः स्यात् ॥१५॥

मूलोत्तरगुणनिष्ठां—मूलानि उत्तरगुणप्ररोहणनिमित्तत्वात् । तस्य च यजनात् प्रागुपन्यासः पाक्षिकापेक्षया । पाक्षिको हि प्रायो(ऽ) संवृताचारत्वाद्यथावदर्हदादिपूजायामसमर्थो दानेनैव विशुद्धिमाप्नोति । यदाह—

धर्म, यश और सुखमें-से एक-एककी साधना करनेवाले कोई-कोई लौकिक जन अपने जन्मको कृतार्थ मानते हैं। लोकव्यवहारका अनुसरण करनेवाले और अपनेको शास्त्रज्ञ माननेवाले कुछ दूसरे जन इन तीनोंमें-से किन्हीं दोकी साधना करनेसे जन्मको कृतार्थ मानते हैं। किन्तु लौकिक और शास्त्रज्ञ दोनोंको ही सन्तुष्ट करनेवाले हम तो तीनोंकी ही साधना करनेसे मनुष्यजन्मके दिनोंको सफल मानते हैं ॥१४॥

विशेषार्थ—कहावत है कि लोगोंकी रुचियाँ भिन्न होती हैं। अतः धर्म, सुख, यशमें-से मनुष्यको किसकी साधना अपने जीवनमें करना चाहिए जिससे जन्मको सफल माना जाये, इसके विषयमें विभिन्न लोगोंके विभिन्न मत हैं। जो केवल लोकानुसारी हैं उनमें-से कुछ तो ऐसा मानते हैं कि धर्मकी साधना करनेसे ही मनुष्यजन्मकी सफलता है। कुछ मानते हैं कि केवल सुखोपभोगमें ही मनुष्यजन्मकी कृतकृत्यता है। कुछ कहते हैं कि यश कमानेमें ही सार्थकता है। इस तरह वे तीनोंमें-से एक-एककी साधनामें ही समझते हैं कि मनुष्यने अपना कर्तव्य पूरा कर लिया। उसे कुछ करना शेष नहीं रहा। इन लौकिक जनोंसे दूसरे नम्बरपर वे हैं, जो अपनेको शास्त्रज्ञ भी मानते हैं। उनका मन्तव्य है कि तीनोंमें-से दोकी साधना करनेसे मनुष्य कृतकृत्य हो जाता है। अर्थात् कुछ धर्म और यशको, कुछ धर्म और सुखको और कुछ यश और सुखको साधन करनेसे जन्मको सफल मानते हैं। किन्तु लौकिक जन और शास्त्रज्ञ दोनोंके ही अभिप्रायोंको समझनेवाले ग्रन्थकारका मत है तीनोंमें-से एक-एक या दो-दोके सेवन करनेसे जन्म सफल नहीं होता किन्तु तीनोंकी ही साधना करनेसे मनुष्य-जन्म सफल होता है। अतः गृहस्थको अपने जीवनमें धर्म भी करना चाहिए, धर्मानुकूल सुख भी भोगना चाहिए और संसारमें जिनसे यश हो, ऐसे परोपकारके कार्य भी करना चाहिए ॥१४॥

इस तरह सम्यक्त्वकी प्राप्ति होनेपर यदि पूर्ण संयम धारण करनेकी शक्ति आदिका अभाव है तो एकदेश संयम अवश्य धारण करना चाहिए, ऐसा कथन करते हैं—

जो मूल गुण और उत्तरगुणमें निष्ठा रखता है, अर्हन्त आदि पाँच गुरुओंके चरणोंको ही अपना शरण मानता है, दान और पूजा जिसके प्रधान कार्य हैं तथा ज्ञानरूपी अमृतको पीनेका इच्छुक है वह श्रावक है ॥१५॥

'ध्यानेन शोभते योगी संयमेन तपोधनः।
सत्येन वचसा राजा गेही दानेन चारुणा ॥' [　　　]

अपि च—

'जइ घरु करिदाणेण सहुं अहतउ करिणी गंथु।
विहे चुं कउ सुम्पउ भण इअजिय एंथण उंथु ॥' [　　　]

दानं च यजनं च दानयजने प्रधाने मुख्ये यस्य। वार्ता तु श्रावकस्य-गौणीति प्रधानग्रहणाल्लक्षयति। यदाह—

'आयुःश्रीवपुरादिकं यदि भवेत् पुण्यं पुरोपार्जितं,
स्यात्सर्वं न भवेन्न तच्च नितरामायासितेऽप्यात्मनि।
इत्यार्याः सुविचार्य कार्यकुशलाः कार्येऽत्र मन्दोद्यमा,
द्रागागामि भवार्थमेव सततं प्रीत्या यतन्तेतराम् ॥' [आत्मानु. ३७]

ज्ञानसुधां—स्वपरान्तरज्ञानामृतम् ॥१५॥

अथ भावद्रव्यात्मनामेकादशानामुपासकपदाना मध्येऽन्यतमं विशुद्धदृष्टिर्महाव्रतपरिपालनलालसो यथात्मशक्ति यः प्रतिपद्यते तमभिनन्दति—

विशेषार्थ—जो गुरु आदिसे धर्म सुनता है वह श्रावक है। अर्थात् एकदेश संयमके धारीको श्रावक कहते हैं। श्रावकके आठ मूलगुण और बारह उत्तरगुण होते हैं। उत्तरगुणोंके प्रकट होनेमें निमित्त होनेसे तथा संयमके अभिलाषियोंके द्वारा पहले पाले जानेके कारण मूल गुण कहे जाते हैं। और मूल गुणोंके बाद सेवनीय होनेसे तथा उत्कृष्ट होनेसे उत्तर गुण कहलाते हैं। गुण कहते हैं संयमके भेदोंको। जो संयमके भेद प्रथम पाले जाते हैं वे मूल गुण हैं। मूल गुणमें परिपक्व होनेपर ही उत्तर गुण धारण किये जाते हैं। किसी लौकिक फलकी अपेक्षा न करके निराकुलतापूर्वक धारण करनेका नाम निष्ठा रखना है। तथा अर्हन्त आदि पंच परमेष्ठीके चरण ही उसके शरण्य होते हैं अर्थात् उसकी यह अटल श्रद्धा होती है कि मेरी सब प्रकारकी पीड़ा पंचपरमेष्ठीके चरणोंके प्रसादसे दूर हो सकती है अतः वे ही मेरे आत्मसमर्पणके योग्य हैं। इस प्रकार सम्यग्दर्शन पूर्वक देश संयमको धारण करनेवाले श्रावकका कर्तव्य-आचार है चार प्रकारका दान और पाँच प्रकारकी जिनपूजा, जो आगे बतलायेंगे। यद्यपि श्रावकका कर्तव्य आजीविका भी है। किन्तु वह तो गौण है। श्रावक धर्मकी दृष्टिसे प्रधान आचार, दान और पूजा है। यह बतलानेके लिए 'प्रधान' पद रखा है। तथा ज्ञानामृतका पान करनेके लिए वह सदा अभिलाषी रहता है। यह ज्ञानामृत है स्व और परका भेद ज्ञानरूपी अमृत। उसीसे उसकी ज्ञान-पिपासा शान्त होती है ॥१५॥

इस प्रकार देशविरतिरूप पंचम गुणस्थानका कथन करके, उसके भेद जो द्रव्यभावरूप ग्यारह श्रावक प्रतिमाएँ हैं, उनमें-से महाव्रतोंके पालन करनेकी लालसा रखनेवाला जो सम्यग्दृष्टि अपनी शक्तिके अनुसार एक भी प्रतिमाका पालन करता है उसका अभिनन्दन करते हैं—

रागादिक्षयतारतम्यविकसच्छुद्धात्मसंवित्सुख-
स्वादात्मस्वबहिर्बहिस्त्रसवधाद्यंहोव्यपोहात्मसु ।
सद्दृग् दर्शनकादिदेशविरतिस्थानेषु चैकादश-
स्वेकं यः श्रयते यतिव्रतरतस्तं श्रद्दधे श्रावकम् ॥१६॥

रागादीत्यादि—क्षयः—सर्वघातिस्पर्द्धकानामुदयाभावः। तारतम्यं—यथोत्तरमुत्कर्षः। रागद्वेषमोहानां क्षयतारतम्येन। विकसन्ती—आविर्भवन्ती चासौ। शुद्धात्मसंविच्च—निर्मलचिद्रूपानुभूतिः। सैव तदुत्थं वा सुखमानन्दस्तस्य स्वादः—स्वसंवित्यनुभवः, स एव आत्मस्वरूपं येषां तानि तदात्मानि तेषु। त्रसेत्यादि—त्रसवध आदिर्येषां स्थूलानृतादीनां तानि त्रसवधादीनि। तान्येव अंहांसि—पापानि तत्फलत्वात्। तेभ्यो व्यपोहो—विधिपूर्वकं देवगुरुसधर्म साक्षिकमपोहो विरतिः स एव आत्मा येषां तानि तेषु। चशब्दस्य भिन्नक्रमस्यात्र योजनात्। यतिव्रतरतः—सर्वविरतिकलशारोपणो हि श्रावकधर्मप्रासादः ॥१६॥

अथ दर्शनिकादीन्निर्दिशति—

देशविरतिके दर्शनिक आदि ग्यारह स्थान अन्तरंगमें राग आदिके क्षयसे प्रकट हुई शुद्ध आत्मानुभूति रूप सुख या उससे उत्पन्न हुए सुखके स्वादको लिये हुए हैं। और बाह्यमें त्रस हिंसा आदि पापोंसे विधिपूर्वक विरतिको लिये हुए हैं। मुनियोंके व्रतोंमें आसक्त जो सम्यग्दृष्टि उनमें-से एक भी प्रतिमाका पालन करता है, वह श्रावक अच्छा करता है ऐसा मैं मानता हूँ ॥१६॥

विशेषार्थ—प्रत्येक प्रतिमाके दो रूप होते हैं—एक भावरूप या अध्यात्मरूप और दूसरा द्रव्यरूप या बाह्यरूप। बाह्यरूप देखा जा सकता है किन्तु अन्तरंगरूपको दूसरे लोग नहीं देख सकते। वह तो स्वसंवेद्य होता है। जब चारित्रमोहनीय कर्मके सर्वघाती स्पर्धकोंका क्षय होता है अर्थात् उनके उदयका अभाव होता है और देशघाति स्पर्द्धकोंका उदय रहता है तब राग-द्वेषके घटनेसे निर्मल चिद्रूपकी अनुभूति होती है। वह अनुभूति सुखरूप है या उस अनुभूतिसे उत्पन्न हुए सुखका स्वाद उन प्रतिमाओंका अन्तरंग रूप है। ज्यों-ज्यों उत्तरोत्तर रागादि घटते जाते हैं त्यों-त्यों आगेकी प्रतिमाओंमें निर्मल चिद्रूपकी अनुभूतिमें वृद्धि होती जाती है और उत्तरोत्तर आत्मिक सुख भी बढ़ता जाता है। इसके साथ ही श्रावककी बाह्य प्रवृत्तिमें भी परिवर्तन आये बिना नहीं रहता। वह प्रतिमाके अनुसार स्थूल हिंसा आदि पापोंसे निवृत्त होता जाता है। ऐसा सम्यग्दृष्टि श्रावक सतत यह भावना रखता है कि कब मैं गृहस्थाश्रम छोड़कर मुनिपद धारण करूँ। तभी उसका प्रतिमा धारण सफल माना जाता है। ऐसा श्रावक किसकी श्रद्धाका भाजन नहीं होगा? श्वेताम्बर साहित्यमें तो पहली प्रतिमा एक मास, दूसरी प्रतिमा दो मास, तीसरी तीन मास, चौथी चारमास इस तरह ग्यारहवीं ग्यारह मास तक ही पालनेका विधान है। अर्थात् पहली प्रतिमा एक मास पालकर दूसरी प्रतिमा लेनी होती है, दूसरी प्रतिमा दो मास पालकर तीसरी लेनी होती है। इस तरह एक से ग्यारह मास तक क्रमशः ग्यारह प्रतिमाएँ पालनेपर १+२+३+४+५+६+७+८+९+१०+११ = ६६ मासके बाद मुनिव्रत लेना होता है ॥१६॥

आगे दर्शनिक आदि श्रावकोंका लक्षण कहते हैं—

दृष्ट्या मूलगुणाष्टकं व्रतभरं सामायिकं प्रोषधं
सचित्तान्न-दिनव्यवाय-वनितारम्भोपधिभ्यो मतात् ।
उद्दिष्टादपि भोजनाच्च विरतिं प्राप्ताः क्रमात्प्राग्गुण-
प्रौढ्या दर्शनिकादयः सह भवन्त्येकादशोपासकाः ॥१७॥

दृष्ट्या—सम्यक्त्वेन विशिष्टं मूलगुणाष्टकं प्राप्तो दर्शनिकः। स एव च व्रतभरं निरतिचाराण्यणुव्रतादीनि प्राप्तो व्रतिकः। एवमुत्तरेष्वपि संबन्धः कर्तव्यः। व्यवायो—मैथुनम्। मतात् मदर्थं साधुकृतमनेनेदमित्यनुमोदितात्। अपि भोजनात्। मतादुद्दिष्टाच्च भोजनादपि विरतिं प्राप्तोऽनुमतिविरत उद्दिष्टविरतश्च। योऽनुमतमुद्दिष्टं च भोजनमपि न कुर्यात् स किमन्यत्रारम्भादौ पापकर्मण्यनुमतिं दद्यादुद्दिष्टं वा वसत्याच्छादनादिकमुपयुञ्जीतेत्यपिशब्दाल्लभ्यते। प्राग्गुणप्रौढ्या—दृष्टिमूलगुणाष्टकप्रकर्षेण सह व्रतभरं, तत्त्रयप्रकर्षेण सामायिकमित्यादि युक्त्या भवन्तीत्यर्थः। उक्तं च—

'श्रावकपदानि देवैरेकादश देशितानि येषु खलु ।
स्वगुणाः पूर्वगुणैः सह सन्तिष्ठन्ते क्रमाद् वृद्धाः ॥' [रत्न. श्रा. १३६]

दर्शनिकादयः। उक्तं च भगवज्जिनसेनपादैरादिनाथस्य सुविधिमहाराजभवान्तरकथावर्णनप्रस्तावे—

'सद्दर्शनं व्रतोद्योतं समतां प्रोषधव्रतम् ।
सचित्तसेवाविरतिमह्नि स्त्रीसङ्गवर्जनम् ॥
ब्रह्मचर्यमथारम्भपरिग्रहपरिच्युतिम् ।
तत्रानुमननत्यागं स्वोद्दिष्टपरिवर्जनम् ॥
स्थानानि गृहिणां प्राहुरेकादश गणाधिपाः ।
स तेषु पश्चिमं स्थानमाससाद क्रमान्नृपः ॥' [महापु., १०।१५९-१६१]

क्रमसे पूर्व-पूर्व गुणोंमें प्रौढ़ताके साथ, सम्यग्दर्शन सहित आठ मूल गुण, निरतिचार अणुव्रतादि, सामायिक, प्रोषधोपवास तथा सचित्तसे, दिवामैथुनसे, स्त्रीसे, आरम्भसे, परिग्रहसे, अनुमत और उद्दिष्ट भोजनसे विरतिको प्राप्त ग्यारह श्रावक होते हैं ॥१७॥

विशेषार्थ—ये श्रावकके ग्यारह भेद हैं। उनके नाम दर्शनिक आदि हैं। जो सम्यग्दर्शनके साथ आठ मूल गुणोंका धारक है वह पहला दर्शनिक श्रावक है। जो निरतिचार अणुव्रत, गुणव्रत और शिक्षाव्रतका पालक है वह दूसरा व्रतिक श्रावक है। जो त्रिकाल सामायिक करता है वह तीसरा सामायिक प्रतिमावाला श्रावक है। जो पर्वके दिनोंमें प्रोषधोपवास करता है वह चतुर्थ प्रोषधोपवासी श्रावक है। जो सचित्त भक्षण आदिका त्यागी है वह पाँचवा सचित्तविरत श्रावक है। जो दिनमें मन-वचन-कायसे मैथुन सेवन नहीं करता वह छठा दिवामैथुन विरत श्रावक है। जो सदाके लिए स्त्रीसेवनका त्यागी है वह सातवाँ स्त्रीविरत या ब्रह्मचर्य प्रतिमाका धारी श्रावक है। जो सम्पूर्ण आरम्भोंका त्यागी है वह आठवाँ आरम्भ विरत श्रावक है। जो परिग्रहका त्यागी है वह नौवाँ परिग्रह विरत श्रावक है। जो आरम्भके कार्योंमें अनुमति भी नहीं देता वह दसवाँ अनुमति विरत श्रावक है। और उद्दिष्ट भोजनका त्यागी ग्यारहवाँ उद्दिष्ट विरत श्रावक है। श्लोकमें उद्दिष्टके साथ जो 'अपि' शब्द रखा है उसका अभिप्राय यह है कि जो अनुमत और उद्दिष्ट भोजन भी नहीं करता वह कैसे अन्यत्र आरम्भ आदि पाप कार्योंमें अनुमति देगा, या कैसे उद्दिष्ट वसतिका या वस्त्र आदिका उपयोग करेगा। आगे-आगेकी ये प्रतिमाएँ तभी मान्य होती हैं जब पूर्व-पूर्वकी प्रतिमाओंमें परिपक्वता हो। अर्थात् 'पीछेको छोड़ आगेको दौड़'की नीति

सोमदेवपण्डितास्त्वेवमाहुः—

'मूलव्रतं व्रतान्यर्चा पर्वकर्माकृषिक्रियाः।
दिवा नवविध [नवविधं] ब्रह्म सचित्तस्य विवर्जनम् ॥
परिग्रहपरित्यागो भुक्तिमात्रानुमान्यता।
तद्धानी च वदन्त्येतानेकादश यथाक्रमम् ॥' [सो. उपा., ८५३-८५४ श्लो.] ॥१७॥

अथ दुरितापचयनिमित्तेज्यादिधर्मकर्मसिद्ध्यर्थं कृष्यादिषट्कर्मलक्षणां वार्तामाचरतो गृहस्थस्यावश्यंभावी सावद्यलेशः प्रायश्चित्तेन पक्षादिभिश्च निराकार्य इत्युपदेशार्थमाह—

यहाँ नहीं चलती। आगेकी प्रतिमावाले श्रावकको पूर्वकी सभी प्रतिमाओंका आचरण पूर्ण रीतिसे करना ही चाहिए। इन प्रतिमाओंके छठे भेदको लेकर आचार्योंमें मतभेद है। आचार्य समन्तभद्रने छठी प्रतिमाको रात्रिभुक्ति विरत नाम दिया है[1] वह रात्रिमें चारों प्रकारके आहारका त्याग करता है। चरित्त पाहुडे[2] (गा. २१), प्राकृत पंचसंग्रह, (१।१३६), वारस अणुवेक्खा (गा. ६९), गो. जीवकाण्ड (गा. ४७६) और वसुनन्दि श्रावकाचारमें छठी प्रतिमाका नाम 'राइभत्ती' ही है। महापुराण (पर्व १०) में दिवास्त्री संगत्याग नाम दिया है। सोमदेवके उपासकाचारमें (८५३-५४ श्लो.) तीसरी प्रतिमा अर्चा, पाँचवीं प्रतिमा अकृषिक्रिया—कृषिकर्म न करना और आठवीं प्रतिमा सचित्त त्याग है। श्वेताम्बर आम्नायमें (योगशास्त्र टीका ३।१४८)[3] पाँचवीं प्रतिमा पर्वकी रात्रिमें कायोत्सर्ग करना। छठी प्रतिमा ब्रह्मचर्य, सातवीं प्रतिमा सचित्त त्याग, आठवीं प्रतिमा स्वयं आरम्भ न करना, नवमी दूसरेसे आरम्भ न कराना, दसवीं उद्दिष्ट त्याग और ग्यारहवीं साधुकी तरह निस्संग रहना, केशलोंच करना आदि है। यह अन्तर है।

पं. आशाधरजीके उत्तरकालीन पं. मेधावीने तो अपने श्रावकाचारको आशाधरका ही शब्दशः अनुकरण करते हुए रचा है। पं. राजमल्लने अपनी लाटी[4] संहितामें दिवा मैथुन विरत और रात्रि भोजन विरत दोनोंका ही संग्रह किया है ॥१७॥

अब कृषि आदि छह कर्मोंके द्वारा आजीविका करनेवाले गृहस्थको पाप अवश्य होता है। वो पापको दूर करनेमें निमित्त पूजा आदि धर्म-कर्मको सिद्धिके लिए उस पापको प्रायश्चित्त और पक्ष आदिके द्वारा दूर करनेका उपदेश करते हैं—

१. 'अन्नं पानं खाद्यं लेह्यं नाश्नाति यो विभावर्याम्।
स च रात्रिभुक्तिविरतः सत्त्वेष्वनुकम्पमानमनाः ॥'—रत्न. श्रा. १४२ श्लो.।

२. 'दंसण वय सामाइय पोसह सचित्त राइभत्ती य।
बम्भारम्भपरिग्गह अणुमण उद्दिट्ठ देसविरदे दे ॥' [चरि. पा. २१ गा.]

३. 'निक्कंपो काउसग्गं तु पुव्वुत्तगुण संजुओ। करेइ पव्वराईसु पंचमि पडिवन्नओ ॥
छट्ठीय बंभयारी सो फासुआहार सत्तमी। वज्जे सावज्जमारंभं अट्ठमि पडिवन्नओ ॥
अवरेणा वि आरंभं नवमी नो करावए। दसमीए पुणोद्दिट्ठं फासुअंपि न भुंजए ॥
एक्कारसीइ निस्संगो धरे लिंगं पडिग्गहं। कयलोओ सुसाहुव्व पुव्वुत्त गुणसायरो ॥'

४. 'किं च रात्रौ यथा भुक्तं वर्जनीयं हि सर्वदा। दिवा योषिद्व्रतं चापि षष्ठस्थानं परित्यजेत् ॥'
—लाटीसं. ७।२१

नित्याष्टाह्निकसच्चतुर्मुखमहः कल्पद्रुमैन्द्रध्वजा-
विज्याः पात्रसमक्रियान्वयदयादत्तीस्तपः संयमौ ।
स्वाध्यायं च विधातुमादृतकृषीसेवावणिज्यादिकः,
शुद्ध्याऽऽप्तोदितया गृही मललवं पक्षादिभिश्च क्षिपेत् ॥१८॥

नित्येत्यादि—नित्यमहः आष्टाह्निकमहश्चतुर्मुखमहः कल्पवृक्षः ऐन्द्रध्वजश्चेति पञ्चार्हत्पूजाविशेषा इज्याः । चतुर्मुखस्य सदिति विशेषणादत्रेदानीमयमेव परमोत्कृष्टः कल्पवृक्षस्यासम्भवादिति प्रकाशयति । अत एवैन्द्रध्वजेन सह समस्यैष निर्दिष्टः । पात्रेत्यादि—समा आत्मना समानाः क्रिया आधानादिका उपलक्षणान्मन्त्रादयश्च यस्यासौ समक्रियः । पात्रं च समक्रियश्च अन्वयश्च दया च पात्रसमक्रियान्वयदयास्तदाश्रया दत्तयो दानादि तद्दत्तयस्ताः । उक्तं चार्षे—

'प्रोक्ता पूजार्हतामिज्या सा चतुर्धा सदार्चनम् ।
चतुर्मुखमहः कल्पद्रुमश्चाष्टाह्निकोऽपि च ॥
तत्र नित्यमहो नाम शश्वज्जिनगृहं प्रति ।
स्वगृहान्नीयमानार्चा गन्धपुष्पाक्षतादिका ॥
चैत्यचैत्यालयादीनां भक्त्या निर्मापणं च यत् ।
शासनीकृत्य दानं च ग्रामादीनां सदार्चनम् ॥

कृषि, सेवा, व्यापार आदि छह आजीवन कर्मोको यथायोग्य स्वीकार करनेवाले गृहस्थको नित्य पूजा, आष्टाह्निक पूजा, सच्चतुर्मुख पूजा, कल्पद्रुम पूजा और इन्द्रध्वज पूजाको तथा पात्रदत्ति, समक्रियादत्ति, अन्वयदत्ति और दयादत्तिको तथा तप, संयम और स्वाध्यायको करनेके लिए परापर गुरुओंके द्वारा कहे हुए प्रायश्चित्तके द्वारा तथा पक्ष चर्या साधनके द्वारा पापके लेशको दूर करना चाहिए ॥१८॥

विशेषार्थ—भगवज्जिनसेनाचार्यने अपने महापुराणके ३९वें पर्वमें कर्त्रन्वय क्रियाओंका वर्णन करते हुए दूसरी सद्गृहित्व क्रियाका कथन किया है। उसमें यह सिद्ध किया है कि विशुद्ध वृत्तिको धारण करनेवाले जैन ही सब वर्णोंमें उत्तम हैं। वे ही द्विज हैं। वे ब्राह्मण आदि वर्णोंके अन्तर्गत न होकर वर्णोत्तम हैं। आगे आचार्य कहते हैं[3]—'यहाँ शंका हो सकती है कि जो असि-मषी आदि छह कर्मोंसे आजीविका करनेवाले जैन द्विज अथवा गृहस्थ हैं, उनके भी हिंसाका दोष लग सकता है। इस विषयमें हमारा कहना है कि आजीविकाके लिए छह कर्म करनेवाले जैन गृहस्थोंको थोड़ी-सी हिंसा अवश्य लगती है परन्तु शास्त्रोंमें उन दोषोंकी शुद्धि भी बतलायी गयी है। उनकी विशुद्धिके तीन अंग हैं—पक्ष, चर्या और साधन।' इसीका कथन पं. आशाधरजीने किया है। इन्हीं तीनोंके आधारपर उन्होंने श्रावकके पाक्षिक, नैष्ठिक और साधक भेद किये हैं। इनसे पूर्व किसी श्रावकाचार आदिमें ये भेद नहीं मिलते।

---

१. महः क—मु. प्र. ।

२. संयमान्—मु. प्र. ।

३. 'स्यादारेका च षट्कर्मजीविनां गृहमेधिनाम् । हिंसादोषोऽनुसंगी स्याज्जैनानां च द्विजन्मनाम् ॥
इत्यत्र ब्रूमहे सत्यं अल्पसावद्यसंगतिः । तत्रास्त्येव तथाप्येषां स्याच्छुद्धिः शास्त्रदर्शिता ॥
अपि चैषां विशुद्ध्यङ्गं पक्षश्चर्या च साधनम् । इति त्रितयमस्त्येव तदिदानीं विवृण्महे ॥'
—महापु. ३९।१४३-१४५ ।

या च पूजा जिनेन्द्राणां नित्यदानानुषङ्गिणी ।
स च नित्यमहो ज्ञेयो यथाशक्त्युपकल्पितः ॥
महामुकुटबद्धैस्तु क्रियमाणो महामहः । ३
चतुर्मुखः स विज्ञेयः सर्वतोभद्र इत्यपि ॥
दत्त्वा किमिच्छकं दानं सम्राड्भिर्यः प्रवर्त्यते ।
कल्पवृक्षमहः सोऽयं जगदाशाप्रपूरणः ॥ ६
आष्टाह्निको महः सार्वजनिको रूढ एव सः ।
महानैन्द्रध्वजोऽन्यस्तु सुरराजैः कृतो महः ॥
बलिस्नपनमित्यन्यस्त्रिसन्ध्या सेवया समम् । ९
उक्तेष्वेव विकल्पेषु ज्ञेयमन्यच्च तादृशम् ॥
एवं विधिविधानेन या महेज्या जिनेशिनाम् ।
विधिज्ञास्तामुशन्तीज्यां वृत्तिं प्रथमकल्पिकीम् ॥ १२
वार्ता विशुद्धवृत्त्या स्यात्कृष्यादीनामनुष्ठितिः ।
चतुर्धा वर्णिता दत्तिर्दयादानसमान्वयैः ॥
सानुकम्पमनुग्राह्ये प्राणिवृन्देऽभयप्रदा । १५
त्रिशुद्ध्यनुगता सेयं दयादत्तिर्मता बुधैः ॥
महातपोधनायार्च्या प्रतिग्रहपुरस्सरम् ।
प्रदानमशनादीनां पात्रदानं तदिष्यते ॥ १८
समानायात्मनाऽन्यस्मै क्रियामन्त्रव्रतादिभिः ।
निस्तारकोत्तमायेह भूहेमाद्यतिसर्जनम् ॥

आचार्य जिनसेनने गृहस्थके षट्कर्म इज्या, वार्ता, दत्ति, स्वाध्याय, संयम, तप बतलाये हैं। पं. आशाधरजीने वार्ताको छोड़कर शेष पाँच ही गिनाये हैं क्योंकि धर्म कर्म पाँच ही हैं। वार्ता तो कृषि आदि षट्कर्म रूप है जो आजीविकासे सम्बद्ध है। इन्हीं पाँच कर्मोंमें गुरूपासनाको सम्मिलित करके आचार्य सोमदेवने श्रावकके छह दैनिक कर्म बतलाये हैं और उन्हींका अनुसरण आचार्य पद्मनन्दिने अपनी पंचविंशतिकामें किया है। पं. आशाधरजीने इज्या और दत्तिके भेद भी महापुराणके अनुसार ही किये हैं। महापुराणसे पहलेके उपलब्ध किसी साहित्यमें ये भेद भी नहीं हैं।

आचार्य जिनसेनने इन सबका कथन इस प्रकार किया है—अपने घरसे ले जाये गये गन्ध, पुष्प, अक्षत आदिसे जिनालयमें प्रतिदिन अर्हन्त देवकी पूजा करना नित्यमह है। भक्ति पूर्वक चैत्य-चैत्यालय आदिका निर्माण कराकर उन्हें ग्राम आदि राजकीय नियमानुसार देना भी नित्यमह है। जिनेन्द्रोंको लक्ष्य करके शक्तिके अनुसार दान आदि देना भी नित्यमह है। मुकुटबद्ध राजाओंके द्वारा जो पूजा की जाती है उसे महामह, चतुर्मुख और

१. दयापात्रसमा—मु.।

२. 'इज्यां वार्तां च दत्तिं च स्वाध्यायं संयमं तपः।'—महापु. ३८।२४।

३. 'देवसेवा गुरूपास्तिः स्वाध्यायः संयमं तपः।
दानं चेति गृहस्थानां षट्कर्माणि दिने दिने ॥'—सो. उपा. ९११ श्लो.।

४. देवपूजा.......।६।७।

समानदत्तिरेषा स्यात्पात्रे मध्यमतामिते।
समानप्रतिपत्त्यैव प्रवृत्ता श्रद्धयान्विता ॥
आत्मान्वयप्रतिष्ठार्थं सूनवे यदशेषतः।
समं समयवित्ताभ्यां स्ववर्गस्यातिसर्जनम् ॥
सैषा सकलदत्तिः स्यात् स्वाध्यायः श्रुतभावना ।
तपोऽनशनवृत्त्यादि संयमो व्रतधारणम् ॥' [महापु., ३८।२६-४१]

वणिज्यादि । आदिशब्देन मषीविद्याशिल्पानि गृह्यन्ते । उक्तं च—

'असिर्मषिः कृषिर्विद्या वाणिज्यं शिल्पमेव च।
कर्माणीमानि षोढाः स्युः प्रजाजीवनहेतवः ॥' [महापु. १६।१७९]

शुद्धया—प्रायश्चित्तेन । आमोदितया—परापरगुरुनिवेदितया ।

उक्तं चार्षे—

'स्यादारेका च षट्कर्मजीविनां गृहमेधिनाम्।
हिंसादोषोऽनुषङ्गी स्याज्जैनानां च द्विजन्मनाम् ॥
इत्यत्र ब्रूमहे सत्यमल्पसावद्यसङ्गतिः।
तत्रास्त्येव तथाऽप्येषां स्याच्छुद्धिः शास्त्रदर्शिता ॥
अपि चैषां विशुद्धयङ्गं पक्षश्चर्या च साधनम्।
इति त्रितयमस्त्येव तदिदानीं विवृण्महे ॥
तत्र पक्षो हि जैनानां कृत्स्नहिंसाविसर्जनम्।
मैत्री प्रमोदकारुण्यमाध्यस्थ्यैरुपबृंहितम् ॥
चर्यार्थं देवतार्थं वा मन्त्रसिद्ध्यर्थमेव वा।
औषधाहारक्लृप्त्यै वा न हिंस्यामीति चेष्टितम् ॥

४. सोचिताननः,—मु. ।
५. रत्नमाला ६३,६४ श्लो. ।
६. धर्म. श्रा., पृ. २१८ ।

अथ चैत्यादिनिर्मापणस्य फलविशेषसमर्थनया विधेयतामभिधत्ते—

निर्माप्यं जिनचैत्यतद्गृह-मठ-स्वाध्याय-शालादिकं
श्रद्धाशक्त्यनुरूपमस्ति महते धर्मानुबन्धाय यत् ।
हिंसारम्भविवर्तिनां हि गृहिणां तत्तादृगालम्बन-
प्रागल्भीलसदाभिमानिकरसं स्यात्पुण्यचिन्मानसम् ॥३५॥

शालादि । आदिशब्देन सत्रपुण्यारामादि । अस्तीत्यादि । चैत्यालयादिनिर्मापणे सावद्यदोषशङ्का-निरासार्थमेतत् ।

यदाह—'तत्पापमपि न पापं यत्र महान् धर्मानुबन्ध' इति । तत्—जिनचैत्यचैत्यालयादि । तादृक्—तीर्थयात्रादि । आलम्बनं—दृग्विशुद्धयङ्गम् । प्रागल्भी—प्रौढिः । पुण्यं सुकृतं चिनोति वर्धयति अथवा पुण्या पवित्रा निर्मला चित् संवित्तिर्यस्य तत्पुण्यचित् । तथा चोक्तम्—

'यद्यप्यारम्भतो हिंसा हिंसायाः पापसंभवः ।
तथाऽप्यत्र कृतारम्भो महत्पुण्यं समश्नुते ॥
निरालम्बा न धर्मस्य स्थितिर्यस्मात्ततः सताम् ।
मुक्तिप्रदानसोपानमासंरुक्तो जिनालयः ॥' [ ]

चैत्य आदिके निर्माणका विशेष फल बतलाते हुए उसके करनेकी प्रेरणा करते हैं—

पाक्षिक श्रावकको अपनी श्रद्धा और शक्तिके अनुसार जिनबिम्ब, जिनालय, मठ, स्वाध्यायशाला आदि बनवाना चाहिए, क्योंकि ये सब बड़े भारी धर्मके अनुबन्धके लिए होते हैं अर्थात् इनसे जो प्राप्त नहीं है उसकी प्राप्ति होती है, जो प्राप्त है उसकी रक्षा होती है और जो रक्षित है उसकी वृद्धि होती है, क्योंकि हिंसाप्रधान कृषि आदि आरम्भमें निरन्तर लगे रहनेवाले पाक्षिक श्रावकोंका मन इन जिनबिम्ब आदि तथा इनके समान तीर्थयात्रा आदि जो सम्यग्दर्शनकी विशुद्धिके अंग हैं, उन आलम्बनोंकी प्रौढ़तासे अनुभवमें आनेवाले अहंकारसे अनुरक्त हर्षसे पुण्यका संचय करता है अथवा निर्मल अनुभूतिको करता है ॥३५॥

विशेषार्थ—पाक्षिक श्रावक विशेष रूपसे तो अपने कृषि व्यापार आदिमें ही फँसा रहता है और इन गार्हस्थिक कार्योंमें हिंसा अवश्य होती है। अतः जो अशुभोपयोगमें फँसे रहते हैं उनका धर्म तो शुभोपयोग ही है। जिनबिम्ब, जिनमन्दिर, स्वाध्यायशाला वगैरह धर्मके साधन हैं। साधारण श्रावक इन्हींके द्वारा धर्मका प्रारम्भिक पाठ पढ़ता है, इसीसे आगे बढ़कर वह उत्तम श्रावक और मुनि बनता है। अतः भोगोपभोगमें धनको व्यय करनेवाला श्रावक यदि धर्मकी परम्पराको कायम रखनेवाले व उसे चलानेवाले धार्मिक कार्योंमें धन खर्च करता है तो उसे इससे एक प्रकारका मानसिक आनन्द मिलता है, उसे यह अनुभव करके परम हर्ष होता है कि उसने अपने द्रव्यका उपयोग धर्मके कार्योंमें, ऐसे कार्योंमें जो दर्शनविशुद्धिमें निमित्त होते हैं किया। इससे उसे पुण्यबन्ध तो होता ही है, यदि वह ज्ञानी हुआ तो इसी आनन्दमें उसे आत्मानुभूति भी हो सकती है। यद्यपि आरम्भमें हिंसा होती है और हिंसासे पाप होता है। तथापि इस आरम्भको करनेवाला महान् पुण्यबन्ध करता है। तथा धर्मकी स्थिति किसी आलम्बनके बिना सम्भव नहीं है अतः महापुरुषोंने जिनालयको मुक्तिका सोपान कहा है। पण्डित आशाधरजीके पहले आचार्य अमितगति,

अपि च—

'बिम्बादलोन्नतियवोन्नतिमेव भक्त्या
ये कारयन्ति जिनसद्म जिनाकृतिं च।
पुण्यं तदीयमिह वागपि नैव शक्ता
स्तोतुं परस्य किमु कारयितुर्द्वयस्य ॥' [पद्म. पञ्च. ७।२२] ॥३५॥

अथ शास्त्रविदामपि प्रायः प्रतिमादर्शनेनैव देवाधिदेवसेवापरां मतिं कुर्वाणं कलिकालमपवदन्ते—

धिग्दुःषमाकालरात्रिं यत्र शास्त्रदृशामपि।
चैत्यालोकादृते न स्यात् प्रायो देवविशा मतिः ॥३६॥

आचार्य पद्मनन्दि, आचार्य वसुनन्दि आदिने मन्दिर और मूर्ति निर्माणपर बहुत जोर दिया है। आचार्य अमितगतिने[2] कहा है जो जिनेन्द्रकी अंगुष्ठ प्रमाण भी मूर्ति बनवाता है उससे अविनाशी लक्ष्मी दूर नहीं है। वसुनन्दी[3] और[4] पद्मनन्दिने उनसे भी आगे बढ़कर कहा है कि जो कुन्दुरुके पत्तेके बराबर जिनालय और उसमें जौ के बराबर प्रतिमाका निर्माण कराते हैं उनके पुण्यका वर्णन वाणीसे नहीं हो सकता। यह तत्कालीन परिस्थितिकी पुकार है। आचार्य पद्मनन्दिने अपने समयका चित्रण करते हुए लिखा है—'इस दुषमा नामके पंचम कालमें जिनेन्द्र भगवान्‌के द्वारा प्ररूपित धर्म क्षीण हो गया है। साधर्मी जन बहुत थोड़े हैं, मिथ्यात्वरूपी अन्धकार बहुत फैला है। ऐसेमें जो जिनबिम्ब और जिनालयमें भक्ति रखता हो वह भी दिखाई नहीं देता। फिर भी जो विधिपर्वक जिनबिम्ब और जिनालयका निर्माण कराता है वह वन्दनीय है। आशाधरजीके समयमें तो मारवाड़में सहाबुद्दीन गोरीका आक्रमण हो गया था। फिर भी उन्होंने पत्ते बराबर मन्दिर और जौ बराबर मूर्ति बनवाने की बात नहीं कही, तथा जिनबिम्ब और जिनमन्दिरके साथ साधुओंके निवासस्थान और स्वाध्यायशाला (ग्रन्थागार) भी बनवानेपर जोर दिया यह उनकी दूरदर्शिताका परिचायक है ॥३५॥

आगे कलिकालकी निन्दा करते हैं—

इस पंचम कालरूपी मरणरात्रिको धिक्कार हो, जिसमें शास्त्र ही जिनकी आँखें हैं प्रायः उन विद्वानोंकी भी अन्तःकरण प्रवृत्ति देवदर्शनके बिना अन्यकी शरण न लेकर एकमात्र जिनदेवको ही भजनेवाली नहीं होती ॥३६॥

---

१. दलो—भ. कु.।
२. 'येनांगुष्ठप्रमाणार्चा जैनेन्द्री क्रियतेऽङ्गिना। तस्याप्यनश्वरी लक्ष्मीर्न दूरे जातु जायते' ॥
—सुभाषित., ८७६ श्लो.।
३. 'कुत्थुंभरिदलमेत्ते जिणभवणे जो ठवेइ जिणपडिमं।
सरिसवमेत्तं पि लहेइ सो णरो तित्थयरपुण्णं' ॥ —वसु. श्रा. ४८१ गा.।
४. 'काले दुःखमसंज्ञके जिनपतेर्धर्मे गते क्षीणतां
तुच्छे सामयिके जने बहुतरे मिथ्यान्धकारे सति।
चैत्ये चैत्यगृहे च भक्तिसहितो यः सोऽपि नो दृश्यते
यस्तत्कारयते यथाविधि पुनर्भव्यः स वन्द्यः सताम्' ॥—पद्म. पञ्च. ७।२१।

दुःषमाकालरात्रि—दुःषमा पञ्चमकालः, कालरात्रिर्मरणनिशेव दुर्निवारमोहावहत्वात् । देवविशा—देवं परमात्मानं विशति अनन्यशरणीभूय संश्रयतीति क्विबन्तावजाद्यतष्टाप् ॥३६॥

अथ कलौ धर्मस्थितिः सम्यक् चैत्यालयमूलैवेत्यनुशास्ति—

प्रतिष्ठायात्राविव्यतिकर-शुभ-स्वैरचरण-
स्फुरद्धर्मोद्धर्षप्रसररसपूरास्तरजसः ।
कथं स्युः सागाराः श्रमणगणधर्माश्रमपदं
न यत्राहंद्गेहं दलितकलिलीलाविलसितम् ॥३७॥

यात्रादि । आदिशब्देन पूजाभिषेकजागरणादि । यदाह—

'यात्रादिस्नपनैर्महोत्सवशतैः पूजाभिरुल्लोचकैः,
नैवेद्यैर्बलिभिर्ध्वजैश्च कलशैस्तूर्यत्रिकैर्जागरैः ।
घण्टाचामरदर्पणादिभिरपि प्रस्तार्य शोभां परां-
भव्याः पुण्यमुपार्जयन्ति सततं सत्यत्र चैत्यालये ॥' [पद्म. पञ्च. ७।२१]

स्वैरं—स्वच्छन्दम् । उद्धर्षः—उत्सवः । रसः—हर्षो जलं च । रजः—पापं रेणुश्च । कलिलीलाविलसितं—मठपत्यादिदुर्नयो निरङ्कुशविजृम्भमाणसंक्लेशपरिणामो वा ॥३७॥

विशेषार्थ—सच्चा जिनभक्त वही है जो एकमात्र जिनेन्द्रदेवको ही अपना शरण मानता है। जो उनके सिवाय किसी अन्य देवको शरण मानता है वह सच्चा जिनभक्त नहीं है। जैन परम्परामें ऐसे भी विद्वान् भट्टारक आदि हुए हैं और आज भी हैं जो शासन देवताओंकी उपासनाके पक्षपाती रहे, यह भी कलिकालका प्रभाव है। किन्तु सभी ऐसे नहीं होते। जैन परम्परामें सदा ऐसे मुनिराज होते आये हैं जो ज्ञान और वैराग्यमें तत्पर रहते हुए जिन दर्शनके बिना भी परमात्माको ही अपना शरण मानते हैं। निश्चय नयसे तो कोई भी किसीका शरण नहीं है; रत्नत्रयमय आत्मा ही आत्माका शरण है। इस तरहकी श्रद्धाके लिए गृहस्थ विद्वान्को भी प्रतिदिन देवदर्शन करना आवश्यक है ॥३६॥

आगे कहते हैं कि कलिकालमें धर्मस्थितिका मूल जिनालय ही है—

जिस नगर आदिमें कलिकालकी लीलाके विलासको नष्ट करनेवाला और मुनिसंघोंके धर्म साधनके लिए निवासस्थान जिन मन्दिर नहीं है, उन स्थानोंमें प्रतिष्ठा, यात्रा आदि महोत्सवोंमें होनेवाला जो मन-वचन-कायका शुभ व्यापार और उससे होनेवाला जो धर्मोत्साह, वही हुआ जल प्रवाह, उस प्रवाहसे जिनकी पापरूपी धूलि दूर हो गयी है ऐसे गृहस्थ कैसे हो सकते हैं। आशय यह है कि जिन मन्दिर होनेसे प्रतिष्ठा, पूजा, अभिषेक आदिके आयोजन होते हैं। उन धार्मिक आयोजनोंमें सभी स्त्री-पुरुष भाग लेते हैं। इससे उनका धर्मोत्साह बढ़ता है, उससे उनके पापकर्मोंकी शान्ति होती है। किन्तु जहाँ जिन-मन्दिर नहीं होता वहाँ कोई भी धार्मिक आयोजन नहीं होता। फलतः गृहस्थोंकी धार्मिक भावनामें ज्वार-भाटा आनेका कभी प्रसंग नहीं होता। आचार्य पद्मनन्दिने कहा है—चैत्यालयके होनेपर भव्यलोक यात्राओं, अभिषेकों, सैकड़ों महान् उत्सवों, पूजाविधानों, चन्दोवों, नैवेद्यों, उपहारों, ध्वजाओं, कलशों, गीतों, वादित्रों, नृत्यों, जागरणों, घण्टा, चामर, दर्पण आदिके द्वारा उत्कृष्ट शोभाका विस्तार करके निरन्तर पुण्यका संचय करते हैं ॥३७॥

अथ कलौ वसतिविशेषं विना सतामप्यनवस्थितचित्तत्वं वर्णयति—

मनो मठकठेराणां वात्ययेवानवस्थया ।
चेक्षिप्यमाणं नाद्यत्वे क्रमते धर्मकर्मसु ॥३८॥

मठकठेराणां—वसतिदरिद्राणाम् । अद्यत्वे—इदानींतनकाले । क्रमते—उत्सहते ॥३८॥

अथ विमर्शस्थानं विना महोपाध्यायानामपि शास्त्रान्तस्तत्त्वज्ञानदो:स्थित्यं प्रथयति—

विनेयवद् विनेतॄणामपि स्वाध्यायशालया ।
विना विमर्शं शून्या धीर्दृष्टेऽप्यन्धायतेऽध्वनि ॥३९॥

विनेयवत्—शिष्याणां यथा । अध्वनि—मार्गे अर्थाच्छास्त्रे निःश्रेयसे वा ॥३९॥

अथ सत्रातुरोपचारस्थानयोरनुकम्प्यप्राण्यनुग्रहबुद्धया विधापनं बह्वारम्भरतानां गृहस्थानां जिनपूजार्थं पुष्पवाटिकादिनिर्मापणे दोषाभावं च प्रकाशयन्नाह—

सत्रमप्यनुकम्प्यानां सृजेदनुजिघृक्षया ।
चिकित्साशालवद्दुष्येन्नेज्यायै वाटिकाद्यपि ॥४०॥

आगे कहते हैं कि कलिकालमें मुनियोंका भी मन वसतिकाके बिना स्थिर नहीं रहता—

इस पंचम कालमें वायुमण्डलके द्वारा उड़ती हुई रुईकी तरह चंचल हुआ जंगलवासी मुनियोंका भी मन वसतिकाके बिना धार्मिक क्रियाओंमें उत्साहित नहीं होता ॥३८॥

विशेषार्थ—प्राचीन समयमें मुनि वनोंमें रहते थे। रत्नकरण्ड श्रावकाचारमें ग्यारहवीं प्रतिमाधारीको घर छोड़कर मुनिवनमें जानेका निर्देश[1] है। धीरे-धीरे मुनियोंका निवास ग्राम-नगरोंमें होने लगा। आचार्य गुणभद्रने अपने आत्मानुशासनमें[2] इसपर खेद प्रकट करते हुए कहा है कि जैसे रातके समय भीत मृग वनसे नगरोंके निकट आ जाते हैं उसी तरह कलिकालमें तपस्वी भी नगरोंमें रहने लगे हैं। तब उनके निवासके लिए श्रावक लोग गुफा वगैरह बनाने लगे। उसके बिना साधुओंका चित्त भी धर्ममें नहीं लगता। अतः मन्दिरोंकी तरह साधुओंके ठहरनेका स्थान भी बनाना चाहिए ॥३८॥

आगे कहते हैं कि स्वाध्यायशालाके बिना गुरुओंके भी शास्त्रज्ञानमें कमी आ जाती है—

स्वाध्यायशालाके बिना शिष्योंकी तरह गुरुओंकी भी विचारशून्य बुद्धि देखे हुए भी शास्त्र या मोक्षमार्गके सम्बन्धमें अन्धेके समान आचरण करती है। अर्थात् शिष्यकी तो बात ही क्या, पढ़ानेवाले गुरु भी यदि शास्त्रचिन्तन निरन्तर न करें तो वे भी तत्त्वको भूल जाते हैं—उलटा-सीधा बतलाने लगते हैं। इसलिए स्वाध्यायशाला अत्यन्त आवश्यक है ॥३९॥

आगे कहते हैं कि दयाके योग्य प्राणियोंके लिए भोजनशाला, औषधालय आदि भी बनवाना चाहिए—

भूख, प्यास और रोगसे पीड़ित गरीब प्राणियोंका उपकार करनेकी इच्छासे औषधालयकी तरह भोजनशाला भी बनवाना चाहिए। तथा पूजाके लिए बगीचा बनवानेमें भी दोष नहीं है ॥४०॥

---

१. 'गृहतो मुनिवनमित्वो...'।—रत्न. श्रा. १४७ श्लो.।

२. 'इतस्ततश्च त्रस्यन्तो विभावर्यां यथा मृगाः ।
वनाद्विशन्त्युपग्रामं कलौ कष्टं तपस्विनः ॥—आत्मानु., १९७ श्लो.।

सत्रमपि—अपिशब्दात् प्रपामपि । अनुकम्प्यानां—क्षुत्तृष्णार्तानां व्याधितानां च । वाटिकादि—आदिशब्दाद् वापीपुष्करिण्यादि । अपिशब्देनानादरार्थेन विषयसुखार्थं कृष्यादिकं कुर्वतां यद्यपि धर्मबुद्धया वाटिकादि विधापने लोकव्यवहारानुरोधाद्दोषो न भवति । तथापि तदकुर्वतामेव क्रयक्रीतेन पुष्पादिना तेषामपि जिनं पूजयतां महान् गुणो भवतीति ज्ञाप्यते ।

यत्पठन्ति—

> 'एषा तटाकमिषतो ननु दानशाला
> मत्स्यादयो रसवति प्रगुणा सदैव ।
> पात्राणि ढेंकबकसारसचक्रवाकाः
> कीदृग्भवेदिह हि पुण्यमिदं न विद्मः ॥' [ ] ॥४०॥

अथ निर्व्याजभक्त्या येन केनापि प्रकारेण जिनं सेवमानानां सर्वदुःखोच्छेदमितस्ततः समस्तसमीहितार्थ-सम्पत्तिं चोपदिशति—

> **यथाकथंचिद् भजतां जिनं निर्व्याजचेतसाम् ।**
> **नश्यन्ति सर्वदुःखानि दिशः कामान् दुहन्ति च ॥४१॥**

यथाकथंचित्—ग्रामगृहादिदानप्रकारेणापि ॥४१॥

अथैवं जिनपूजां विधेयतयोपदिश्य तद्वत्सिद्धादिपूजामपि विधेयतयोपदेष्टुमाह—

> **जिनानिव यजन् सिद्धान् साधून धर्मं च नन्दति ।**
> **तेऽपि लोकोत्तमास्तद्वच्छरणं मङ्गलं च यत् ॥४२॥**

साधून्—सिद्धिं साधयन्तीति अन्वर्थतामात्रानुसरणादाचार्योपाध्याययतीन् ॥४२॥

विशेषार्थ—यह सब पाक्षिक श्रावकके लिए कथन है। पाक्षिक श्रावक जब विषयसुख-के लिए कृषि आदि कर्म करता है तो उसे परोपकारकी भावनासे भूखसे पीड़ित जनोंके लिए निःशुल्क भोजन प्राप्तिका स्थान तथा रोगियोंके लिए चिकित्सालय वगैरह भी बनवाना चाहिए। ग्रन्थकारने पूजाके निमित्त पुष्प प्राप्त करनेके लिए बगीचा लगानेमें भी दोष नहीं बताया है। तथापि वह बगीचा न लगाकर और बाजारसे पुष्प खरीदकर उनसे पूजा करना उत्तम मानते हैं। पुष्पोंमें होनेवाली अशुद्धि तथा हिंसाके कारण उत्तर कालमें अक्षतोंको पीला रँगकर उनमें पुष्पकी स्थापना की गयी ॥४०॥

आगे कहते हैं कि निष्कपट भक्तिसे जिस-किसी भी प्रकारसे जिन भगवान्की पूजा करनेवालोंके सब दुःख दूर होते हैं और समस्त इच्छित पदार्थोंकी प्राप्ति होती है—

अभिषेक, पूजा, स्तवन आदि जिस किसी भी प्रकारसे जो निष्कपट चित्तसे जिन भगवान्को भजते हैं उनके सब दुःख नष्ट हो जाते हैं और दिशाएँ उनके मनोरथोंको पूरा करती हैं। अर्थात् जिनदेवके पूजक जो-जो चाहते हैं वह उन्हें सर्वत्र प्राप्त होता है ॥४१॥

इस प्रकार जिनपूजाको कर्तव्य बतलाकर उसीकी तरह सिद्ध आदि पूजाको भी करने-का उपदेश देते हैं—

जिनदेवकी तरह मुक्तात्माओं, साधुओं और रत्नत्रय रूप धर्मको पूजनेवाला अन्तरंग और बहिरंग विभूतिसे सम्पन्न होकर आनन्द करता है, क्योंकि वे भी जिनदेवकी तरह लोकमें उत्कृष्ट हैं, शरण हैं और मंगलरूप हैं ॥४२॥

विशेषार्थ—'चत्तारि मंगलं' आदिमें अर्हन्त, सिद्ध, साधु और धर्मको मंगलस्वरूप, उत्कृष्ट तथा शरणभूत कहा है। साधुसे आचार्य, उपाध्याय और साधु तीनों लिये जाते हैं।

अथ सकलपूज्यपूजाविधिप्रकाशनेनानुग्राहिकायाः सम्यक् श्रुतदेवतायाः पूजायां सञ्जयन्नाह—

यत्प्रसादान्न जातु स्यात् पूज्यपूजाव्यतिक्रमः ।
तां पूजयेज्जगत्पूज्यां स्यात्कारोड्डमरां गिरम् ॥४३॥

स्यात्कारोड्डमरां—स्यात्पदप्रयोगेण सर्वथैकान्तवादिभिरजय्यामित्यर्थः । यथाह—

'दुर्निवारनयानीकविरोधध्वंसनौषधिः ।
स्यात्कारजीविता जीयाज्जैनीसिद्धान्तपद्धतिः ॥' [ ]

अपि च—मिथ्याज्ञानतमोवृतलोकैकज्योतिरित्यादि ॥४३॥

अथ श्रुतपूजकाः परमार्थतो जिनपूजका एवेत्युपदिशति—

ये यजन्ते श्रुतं भक्त्या ते यजन्तेऽञ्जसा जिनम् ।
न किंचिदन्तरं प्राहुराप्ता हि श्रुतदेवयोः ॥४४॥

नेत्यादि । तथा पठन्ति—'श्रुतस्य देवस्य न किंचिदन्तरम्' इत्यादि ॥४४॥

शरणका मतलब है, कष्टको दूर करना और अनिष्टसे रक्षाका उपाय करना। तथा मंगलका अर्थ है पापकी हानि और पुण्यका संचय। इन चारोंके पजनसे ये सब कार्य होते हैं। इनके लिए किसी अन्य देवी-देवताको शरण लेना उचित नहीं है, इष्टका वियोग और अनिष्टका संयोग अपने ही पूर्वकृत कर्मोंका परिणाम है अतः उसे हम स्वयं ही अपने शुभ कर्मोंके द्वारा दूर कर सकते हैं ॥४२॥

सम्यक् श्रुत भी एक देवता है। वह सब पूज्योंकी पूजाकी विधि बतलाकर हमारा उपकार करती है। अतः उसकी पूजाका उपदेश करते हैं—

जिसके प्रसादसे कभी भी पूज्य अर्हन्त सिद्ध साधु और धर्मकी पूजामें यथोक्त विधिका लंघन नहीं होता, उस जगत्में पूज्य और स्यात् पदके प्रयोगके द्वारा एकान्तवादियोंसे न जीती जा सकनेवाली श्रुतदेवताको पूजना चाहिए ॥४३॥

विशेषार्थ—श्रुतदेवता या जिनवाणीके प्रसादसे ही हमें यह ज्ञात होता है कि पूजने योग्य कौन हैं और क्यों हैं? तथा उनकी पूजा हमें किस प्रकार करनी चाहिए। इसलिए जिनवाणी भी पूज्य है। अगर शास्त्र न होते तो हम देवके स्वरूपको भी नहीं जान सकते थे। फिर जिनवाणी स्याद्वादनय गर्भित है। स्याद्वाद कथनकी वह शैली है जिससे अनेकान्तात्मक वस्तुका कथन करते हुए किसी प्रकार विसंवाद पैदा नहीं होता। वस्तु नित्य भी और अनित्य भी है। द्रव्य रूपसे नित्य है और पर्याय रूपसे अनित्य है। इसके विपरीत एकान्तवादी दर्शन किसीको नित्य और किसीको अनित्य मानते हैं। जैसे उनके मतसे आकाश नित्य ही है और दीप अनित्य ही है। किन्तु जैन दृष्टिसे आकाश और दीप दोनों ही नित्य भी हैं और अनित्य भी हैं। अतः स्याद्वादी जैन दर्शन एकान्तवादी दर्शनोंके द्वारा अजेय है। वह वस्तुके यथार्थ स्वरूपको कहता है। उसकी उपलब्धि भी हमें जिनवाणी या श्रुतदेवताके प्रसादसे ही हुई है अतः उसको भी पूजना हमारा कर्तव्य है ॥४३॥

आगे कहते हैं कि जो श्रुतदेवताकी पूजा करते हैं वे परमार्थसे जिनदेवकी ही पूजा करते हैं—

जो भक्तिपूर्वक श्रुतको पूजते हैं वे परमार्थसे जिनदेवको ही पूजते हैं। क्योंकि सर्वज्ञ देवने श्रुत और देवमें थोड़ा-सा भी भेद नहीं कहा है ॥४४॥

अथ साक्षादुपकारकत्वेन गुरूणामुपासने नित्यं नियुङ्क्ते—

उपास्या गुरवो नित्यमप्रमत्तैः शिवार्थिभिः ।
तत्पक्षतार्क्ष्यपक्षान्तश्चरा विघ्नोरगोत्तराः ॥४५॥

तदित्यादि । तेषां गुरूणां पक्षस्तदायत्ततया वृत्तिः स एव तार्क्ष्यपक्षो गरुडपतत्रं तस्यान्तर्मध्ये चरन्ति तदन्तश्चराः विघ्नोरगोत्तरा भवन्ति । विघ्नाः प्रक्रमाद्धर्मानुष्ठानविषयेऽन्तरायास्त एवोरगाः सर्पास्तेभ्य उत्तराः परे तद्दूरचारिणः । धर्मानुष्ठानप्रत्यूहसर्पैर्नाभिभूयन्ते इति भावः । उक्तं च—

'देवपूजा गुरूपास्तिः स्वाध्यायः संयमस्तपः ।
दानं चेति गृहस्थानां षट्कर्माणि दिने दिने ॥' [पद्म. पञ्च. ६।७] ॥४५॥

अथ गुरूपास्तिविधिमाह—

निर्व्याजया मनोवृत्त्या सानुवृत्त्या गुरोर्मनः ।
प्रविश्य राजवच्छश्वद्विनयेनानुरञ्जयेत् ॥४६॥

सानुवृत्त्या—छन्दानुवृत्त........पं........सहितया । यन्नीतिः—

पूर्वं चित्तं प्रभोर्ज्ञेयं ततस्तदनुवर्तनम् ।
इति संक्षेपतः प्रोक्ता सेवाचर्यानुजीविनाम् ॥' [ ] ॥४६॥

अथ विनयेनानुरञ्जयेदित्यस्यार्थं व्यक्तयन्नाह—

विशेषार्थ—जिनदेवके मुखसे निकली और गणधरके द्वारा स्मृतिमें रखकर बारह अंगोंमें रची गयी जिनवाणीको ही श्रुत कहते हैं। श्रुतका शब्दार्थ होता है सुना हुआ। गणधरने भगवान्‌के मुखसे जो सुना वही श्रुत है। अतः जिनदेव और उनकी वाणीमें, जो परम्परासे आचार्यों द्वारा शास्त्रोंमें निबद्ध है, कोई अन्तर कैसे हो सकता है। व्यक्ति अपने वचनोंके कारण ही पूज्य बनता है। व्यक्तिके वचन व्यक्तिसे भिन्न नहीं होते ॥४४॥

इस प्रकार संक्षेपसे देवपूजाकी विधिको कहकर आगे साक्षात् उपकारी होनेसे गुरुओं-की भी नित्य उपासना करनेका उपदेश देते हैं—

परमकल्याणके इच्छुक पाक्षिक श्रावकोंको प्रमाद छोड़कर गुरुओंकी—धर्मकी आराधनामें लगानेवालोंकी नित्य उपासना करनी चाहिए। क्योंकि, जैसे गरुड़के पंख पास रहनेसे सर्प दूर रहते हैं वैसे ही गुरुओंके अधीन होकर चलनेवालोंके धार्मिक कार्यसे विघ्न दूर रहते हैं अर्थात् उनके कार्योंमें विघ्न नहीं आते हैं ॥४५॥

गुरुकी उपासनाकी विधि कहते हैं—

अपना कल्याण चाहनेवालेको छलरहित और अनुकूलता सहित मनोवृत्तिके द्वारा गुरुके मनमें प्रवेश करके राजाकी तरह विनयसे गुरुको सदा अपनेमें अनुरक्त करना चाहिए। अर्थात् जैसे सेवक वर्ग अपने निश्छल व्यवहार और विनयपूर्वक आज्ञा पालनसे राजाके मनमें प्रवेश करके उसे अपना अनुरागी बना लेता है उसी तरह गुरुके आनेपर खड़े होना आदि कायिक विनयसे, हित-मित भाषण आदि वाचनिक विनयसे और गुरुके प्रति शुभ चिन्तन आदि मानसिक विनयसे गुरुकी आज्ञाका पालन करते हुए गुरुके मनमें अपना स्थान बनाना चाहिए ॥४६॥

'गुरुको विनयसे अनुरक्त करे' इसको स्पष्ट करते हैं—

पार्श्वे गुरूणां नृपवत्प्रकृत्यभ्यधिकाः क्रियाः ।
अनिष्टाश्च त्यजेत्सर्वा मनो जातु न दूषयेत् ॥४७॥

प्रकृत्यभ्यधिकाः—स्वभावादतिरिक्ता वैकारिकीः कोप-हास्य-विवादादिकाः । अनिष्टाः—पर्यस्तिकोपाश्रयादिकाः । उक्तं च—

'निष्ठीवनमवष्टम्भं जृम्भणं गात्रभञ्जनम् ।
असत्यभाषणं नर्महास्यं पादप्रसारणम् ॥
अभ्याख्यानं करस्फोटं करेण करताडनम् ।
विकारमङ्गसंस्कारं वर्जयेद्यतिसंनिधौ ॥' [ ] ॥४७॥

अथ पात्राणि तर्पयेदित्यादि पूर्वोद्दिष्टदानादि विधिप्रपञ्चार्थमाह—

पात्रागमविधिद्रव्य-देश-कालानतिक्रमात् ।
दानं देयं गृहस्थेन तपश्चर्यं च शक्तितः ॥४८॥

स्पष्टम् । उक्तं च—

'यथाविधि यथादेशं यथाद्रव्यं यथागमम् ।
यथापात्रं यथाकालं दानं देयं गृहाश्रमैः ॥' [सो. उपा., ७६५ श्लो.] ॥४८॥

अथ सम्यग्दृशो नित्यमवश्यतया विधीयमानयोर्दानतपसोरवश्यं-भाविनं फलविशेषमाह—

नियमेनान्वहं किंचिद्यच्छतो वा तपस्यतः ।
सन्त्यवश्यं महीयांसः परे लोका जिनश्रितः ॥४९॥

महीयांसः—इन्द्रादिपदलक्षणाः । जिनश्रितः—जिनं सेवमानस्य ॥४९॥

राजाकी तरह गुरुओंके समीपमें अस्वाभाविक तथा शास्त्रनिषिद्ध समस्त चेष्टाओंको नहीं करना चाहिए । तथा गुरुके मनको कभी भी दूषित नहीं करना चाहिए ॥४७॥

विशेषार्थ—गुरुओंके सामने थूकना, सोना, जँभाई लेना, शरीर ऐंठना, झूठ बोलना, ठठोली करना, हँसना, पैर फैलाना, दोष लगाना, ताल ठोकना, ताली बजाना, विकार करना तथा अंग संस्कार नहीं करना चाहिए । ये क्रियाएँ अस्वाभाविक कहलाती हैं ॥४७॥

पहले कहा था कि 'पात्रोंको सन्तुष्ट करना चाहिए', अतः दान आदिकी विधिको विस्तारसे कहते हैं—

गृहस्थको पात्र, आगम, विधि, द्रव्य, देश और कालके अनुसार शक्तिपूर्वक दान देना चाहिए और शक्ति अनुसार तप करना चाहिए । अर्थात् दान देते समय पात्र आदिका ध्यान रखकर तदनुसार ही दान देना चाहिए । यदि उत्तम पात्र है तो उसको आगमके अनुसार नवधा भक्ति पूर्वक ऐसा सात्त्विक आहार देना चाहिए जो ऋतुके अनुकूल होनेके साथ इन्द्रिय बलवर्धक और कामोद्दीपक न हो । इसी प्रकार समझ लेना चाहिए ॥४८॥

सम्यग्दृष्टिके द्वारा नित्य अवश्य दान देने और तप करनेका अवश्य होनेवाला फल कहते हैं—

परमात्माकी सेवा करनेवाला जो भव्य प्रतिदिन नियमपूर्वक शास्त्रविहित कुछ भी दान देता है और तपस्या करता है उसके परलोक अर्थात् आगेके जन्म अवश्य ही महान् होते हैं । अर्थात् दूसरे जन्ममें वह इन्द्र आदिके महान् पद पाता है ॥४९॥

अथ यदर्थं यद्दानं कर्तव्यं तत्तदर्थमाह—

धर्मपात्राण्यनुग्राह्याण्यमुत्र स्वार्थसिद्धये ।
कार्यपात्राणि चात्रैव कीर्त्यै त्वौचित्यमाचरेत् ॥५०॥

अनुग्राह्याणि—उपकार्याणि । अमुत्र स्वार्थः—स्वर्गादिसुखम् । अत्रैव—इहैव जन्मनि स्वार्थसिद्धये । उक्तं च—

'परलोकधिया कश्चित्कश्चिदैहिकचेतसा ।
औचित्यमनसा कश्चित्सतां वित्तव्ययस्त्रिधा ॥
परलोकैहिकौचित्येष्वस्ति येषां न धीः समा ।
धर्मः कार्यं यशश्चेति तेषामेतत्त्रयं कुतः ॥' [सो. उपा. ७६९-७७०] ॥५०॥

अथ धर्मपात्राणां यथागुणं सन्तर्पणीयत्वमाह—

समयिक-साधक-समयद्योतक-नैष्ठिक गणाधिपान् धिनुयात् ।
दानादिना यथोत्तरगुणरागात्सद्गृही नित्यम् ॥५१॥

समायिकः—गृही यतिर्वा जिनसमयाश्रितः । उक्तं च—

'गृहस्थो वा यतिर्वापि जैनं समयमास्थितः ।
यथाकालमनुप्राप्तः पूजनीयः सुदृष्टिभिः ॥' [सो. उपा. ८०९]

साधकः ज्योतिषादिवित् । उक्तं च—

'ज्योतिर्मन्त्रनिमित्तज्ञः सुप्रज्ञः कार्यकर्मसु ।
मान्यः समयिभिः सम्यक् परोक्षार्थसमर्थधीः ॥ [ ]

आगे जिस हेतुसे जो दान करना चाहिए, उसे बतलाते हैं—

कल्याणके इच्छुक पाक्षिक श्रावकको परलोकमें स्वर्गादि सुख-सम्पत्ति प्राप्त करनेके लिए रत्नत्रयकी साधनामें तत्पर गुरुओंकी सेवा आदि करनी चाहिए। और इसी जन्ममें पुरुषार्थकी प्राप्तिके लिए अर्थमें सहायक कर्मचारियोंका काममें, सहायक पत्नीका उपकार करना चाहिए, उनकी हर तरहसे संरक्षा-सम्पोषण करना चाहिए। तथा कीर्तिके लिए उचित कार्य करना चाहिए अर्थात् दान और प्रिय वचनोंसे दूसरोंको सन्तुष्ट करना चाहिए ॥५०॥

आगे धर्मपात्रोंको उनके गुणोंके अनुसार सन्तुष्ट करनेकी प्रेरणा करते हैं—

जैनधर्मके पालक गृहस्थ या मुनिको समयिक कहते हैं। ज्योतिष मन्त्र आदि लोकोपकारक शास्त्रोंके ज्ञाताको साधक कहते हैं। जो शास्त्रार्थ आदिके द्वारा जिनमार्गकी प्रभावना करता है उसे समयद्योतक कहते हैं। जो मूल गुण और उत्तर गुणोंसे प्रशंसनीय तपमें लीन होता है उसे नैष्ठिक कहते हैं और धर्माचार्य या उसीके समान गृहस्थाचार्यको गणाधिप कहते हैं। इनमें जो-जो उत्कृष्ट हों उनके गुणोंमें अनुरागसे या जिसके जो उत्कृष्ट गुण हों उनमें अनुरागसे पाक्षिक श्रावकको सदा दान-सम्मान, आसनदान आदिके द्वारा पाँचोंको सन्तुष्ट करना चाहिए ॥५१॥

विशेषार्थ—उत्तम, मध्यम और जघन्य पात्रोंको दान देनेका कथन तो अनेक शास्त्रोंमें मिलता है। वह पात्रदान कहलाता है। आचार्य जिनसेनजी ने अपने महापुराणमें पात्रदान, दयादान, समक्रियादान और अन्वयदान ये चार भेद करके दानकी दिशाको नयी गति दी है। उसीका प्रतिफलन हमें सोमदेवके उपासकाध्ययनमें पाते हैं। उन्हींका अनुसरण

'दीक्षायात्राप्रतिष्ठाद्याः क्रियास्तद्विरहे कुतः ।
तदर्थं परपृच्छायां कथं च समयोन्नतिः ॥' [सो. उपा. ८१०-८११]

[समयद्योतकः-वादित्वादि-] ना मार्गप्रभावकः । नैष्ठिकः—मूलोत्तरगुणश्लाघ्यस्तपोऽनुष्ठाननिष्ठः । उक्तं च—

'मूलोत्तरगुणश्लाघ्यैः तपोभिर्निष्ठितस्थितिः ।
साधुः साधु भवेत्पूज्यः पुण्योपार्जनपण्डितैः ॥' [सो. उपा. ८१२]

गणाधिपः—धर्माचार्यस्तादृग्गृहस्थाचार्यो वा । उक्तं च—

'ज्ञानकाण्डे क्रियाकाण्डे चातुर्वर्ण्यपुरःसरः ।
सूरिर्देव इवाराध्यः संसाराब्धितरण्डकः ॥' [सोम. उपा. ८१३]

धिनुयात्—प्रीणयेत् । धर्मानुष्ठाने बलाधानेनोपकुर्यादित्यर्थः ।
यदाह—

'वर्यं-मध्य-जघन्यानां पात्राणामुपकारकम् ।
दानं यथायथं देयं वैयावृत्त्यविधायिना ॥' [अमि. श्रा. ९।१०७]

दानादिना—दान-मानासनसंभाषणादिना । यथोत्तरगुणरागात्—यो य उत्तरः समयिकादीनां मध्ये तस्य तस्य गुणेषु प्रीतितः । अथवा यो यो यस्योत्कृष्टो गुणस्तत्र तत्र प्रीत्या तं धिनुयादिति योज्यम् । अत्र श्रमणोपासकेषु मुमुक्षुषु रत्नत्रयानुग्रहबुद्धया संतर्पणं पात्रदत्तिर्बुभुक्षुषु च गृहस्थेषु वात्सल्येन यथार्हमनुग्रहः समानदत्तिरिति विभागः ॥५१॥

पं. आशाधरजी-ने किया है। सोमदेवजीने पात्रके पाँच भेद किये हैं—समयी, साधक, साधु, आचार्य और समयदीपक। गृहस्थ हो या साधु, जो जैनधर्मका अनुयायी है उसे समयी या समयिक कहते हैं। ये साधर्मी पात्र यथाकाल प्राप्त होनेपर सम्यग्दृष्टियोंको उनका आदर करना चाहिए। जिनकी बुद्धि परोक्ष अर्थको जाननेमें समर्थ है उन ज्योतिषशास्त्र, मन्त्रशास्त्र, निमित्तशास्त्रके ज्ञाताओंका तथा प्रतिष्ठाशास्त्रके ज्ञाता प्रतिष्ठाचार्योंका भी सम्मान करना चाहिए। यदि ये न हों तो मुनिदीक्षा, तीर्थयात्रा और बिम्बप्रतिष्ठा वगैरह धार्मिक क्रियाएँ कैसे हो सकती हैं; क्योंकि मुहूर्त देखनेके लिए ज्योतिर्विदोंकी, प्रतिष्ठा करनेके लिए मन्त्र शास्त्रके पण्डितोंकी आवश्यकता होती है। यदि अन्य धर्मावलम्बी ज्योतिषियों और मान्त्रिकोंसे पूछना पड़े तो अपने धर्मकी उन्नति कैसे हो सकती है ? तथा अपने मुहूर्त-विचारमें भी दूसरोंसे अन्तर है। वैवाहिक विधि दूसरे करावें तो उनमें तो श्रद्धा ही नहीं होती। अतः जैन मन्त्रशास्त्र, जैन ज्योतिषशास्त्र और जैन क्रियाकाण्डके ज्ञाताओंका सम्मान करना आवश्यक है। मूल गुण और उत्तर गुणोंसे युक्त तपस्वीको साधु कहते हैं। उन्हें ही आशाधरजीने नैष्ठिक कहा है। उन्हें भी भक्तिभावसे पूजना चाहिए। जो ज्ञानकाण्ड और आचारमें चतुर्विध संघके मुखिया होते हैं तथा संसार-समुद्रसे पार उतारनेमें समर्थ हैं उन्हें आचार्य या गणाधिप कहते हैं। उनकी देवके समान आराधना करनी चाहिए। जो लोकज्ञता, कवित्व आदिके द्वारा और शास्त्रार्थ तथा वक्तृत्व कौशल-द्वारा जैनधर्मकी प्रभावना करनेमें

---

१. 'समयी साधकः साधुः सूरिः समयदीपकः । तत्पुनः पञ्चधा पात्रमामनन्ति मनीषिणः ।'
—सो. उपा. ८०८ श्लो. ।

२. 'लोकवित्वकवित्वाद्यैर्वादवाग्मित्वकौशलैः । मार्गप्रभावनोद्युक्ताः सन्तः पूज्या विशेषतः ॥'
—सो. उपा. ८१४ श्लो. ।

अथ समदत्तिविधानोपदेशार्थमादौ समयिकं स्तुवन्नाह—

स्फुरत्येकोऽपि जैनत्वगुणो यत्र सतां मतः ।
तत्राप्यजैनैः सत्पात्रैर्द्योत्यं खद्योतवद्रवौ ॥५२॥

एकः ज्ञानतपोरहितः, जैनत्वगुणः—जिन एव देवो मे भवार्णवोत्तारकत्वादित्यभिनिवेशधर्मः ॥५२॥

अथ श्रेयोर्थिनां जैनानुग्रहानुभावमाह—

वरमेकोऽप्युपकृतो जैनो नान्ये सहस्रशः ।
दलादिसिद्धान् कोऽन्वेति रससिद्धे प्रसेदुषि ॥५३॥

दलादि—आदिशब्देन वर्णोत्कर्षादि । प्रसेदुषि—प्रसन्ने सति ॥५३॥

अथ नामादिनिक्षेपविभक्तानां चतुर्णां जैनानां पात्रत्वं यथोत्तरं विशिनष्टि—

नामतः स्थापनातोऽपि जैनः पात्रायतेतराम् ।
स लभ्यो द्रव्यतो धन्यैर्भावतस्तु महात्मभिः ॥५४॥

पात्रायते तरां—अजैनपात्रेभ्योऽतिशयेन संयुज्यमाननिर्वाणकारणगुणलक्षणपात्रवदाचरति, सम्यक्त्व-सहकारिपुण्यास्रवणकारणत्वात् ॥५४॥

तत्पर रहते हैं उन्हें समयदीपक या समयद्योतक कहते हैं। उनका भी समादर करना कर्तव्य है। इन पाँच दानोंमें-से श्रमण और श्रावक मुमुक्षुओंको रत्नत्रयकी भावनासे जो दान दिया जाता है वह तो पात्रदत्ति है। तथा क्षुधापीड़ित गृहस्थोंको वात्सल्य भावसे जो यथायोग्य दिया जाता है वह समदत्ति है। यह विभाग कर लेना चाहिए ॥५१॥

आगे समदत्तिका उपदेश करते हैं—

जिसमें साधु जनोंको इष्ट एक भी जैनत्व गुण चमकता है उसके सामने सत्पात्र भी अजैन सूर्यके सामने जुगनूकी तरह प्रतीत होते हैं ॥५२॥

विशेषार्थ—जिन ही मेरे आराध्यदेव हैं क्योंकि संसार—समुद्रसे पार लगाते हैं, इस प्रकारके अभिप्रायको यहाँ जैनत्व गुण कहा है। उसके साथमें ज्ञान और तप न होनेसे उसे एक कहा है। जैसे सूर्यके सामने जुगनू निष्प्रभ हो जाते हैं उसी तरह जिसमें एक भी जैनत्व गुण भासमान है उस व्यक्तिके सामने मिथ्याज्ञान और मिथ्यातपसे युक्त मिथ्यादृष्टि धार्मिक प्रभाहीन हो जाते हैं ॥५२॥

आगे जैनपर अनुग्रह करनेका महत्त्व बतलाते हैं—

एक भी जैनका उपकार करना श्रेष्ठ है, हजारों भी अजैनोंको उपकृत करना श्रेष्ठ नहीं है। क्योंकि पारेसे गरीबी, रोग, बुढ़ापा आदिको दूर कर सकनेकी शक्तिसे युक्त पुरुषके प्रसन्न होनेपर बनावटी सुवर्ण आदिको बनानेमें प्रसिद्ध पुरुषको कौन पसन्द करता है? ॥५३॥

विशेषार्थ—यह कथन धार्मिकताको दृष्टिमें रखकर किया गया है। जैनधर्म प्रकारान्तर-से आत्मधर्म ही है। जैन वही है जो आत्माके निकट है। उसका उपकार करनेसे आत्म-धर्मको बल मिलता है और अनात्मधर्मका परिहार होता है। आत्मासे भिन्न पदार्थोंमें आसक्ति ही अनात्मधर्म है। उसको बल नहीं देना धार्मिकका कर्तव्य है ॥५३॥

आगे नाम आदिके निक्षेपसे चारप्रकारके जैनोंमें उत्तरोत्तर विशेष पात्रता बतलाते हैं—

नामसे तथा स्थापनासे भी जैन अजैन पात्रोंसे विशिष्ट पात्र होता है। द्रव्यसे जैन पुण्यवानोंको प्राप्त होता है और भावसे जैन तो महाभागोंको ही मिलता है ॥५४॥

अथ भावजैनं प्रति निरुपाधिप्रीतिमतोऽभ्युदयनिःश्रेयससंपदं फलमाह—

प्रतीतजैनत्वगुणेऽनुरज्यन्निर्व्याजमासंसृति तद्गुणानाम्[1] ।
धुरि स्फुरन्नभ्युदयैरदृप्तस्तृप्तस्त्रिलोकीतिलकत्वमेति ॥५५॥

अनुरज्यन्—स्वयमेवानुरागं कुर्वन्। आसंसृति तद्गुणानां धुरिस्फुरन्—भवे भवे जैनानामग्रणीर्भवन्नित्यर्थः। अदृप्तः—अकृतमदः। सम्यक्त्वसहचारिपुण्योदययोगात् ॥५५॥

अथ गृहस्थाचार्याय तदभावे मध्यमपात्राय वा कन्यादिदानं पाक्षिकश्रावकस्य कर्तव्यतयोपदिशति—

निस्तारकोत्तमायाथ मध्यमाय सधर्मणे ।
कन्याभूहेमहस्त्यश्वरथरत्नादि निर्वपेत् ॥५६॥

अथ पक्षान्तरसूचने अधिकारे वा। तत्र जघन्यविषयां समदत्तिं व्याख्याय मध्यमविषया साऽत्राधिक्रियत इत्यर्थः। सधर्मणे—समान आत्मसमो धर्मः क्रियामन्त्रव्रतादिलक्षणो गुणो यस्य तस्मै। रत्नादि। आदिशब्देन वस्त्रगृहगवादि। निर्वपेत्—दद्यात्। उक्तं च चारित्रसारे (पृ. २१)—'समदत्तिः स्वसमक्रियामन्त्राय निस्तारकोत्तमाय कन्या-भूमि-सुवर्ण-हस्त्यश्व-रथ-रत्नादिदानं, स्वसमानाभावे मध्यमपात्रस्यापि दानमिति ॥५६॥

विशेषार्थ—नाम, स्थापना, द्रव्य और भावके भेदसे निक्षेपके चार भेद हैं। जो मात्र नामसे जैन है उसे नामजैन कहते हैं। जिसमें 'यह जैन है' ऐसी कल्पना कर ली गयी है वह स्थापनाजैन है। जो आगे जैनत्व गुणकी योग्यतासे विशिष्ट होनेवाला है वह द्रव्य-जैन है। और जो वर्तमानमें जैनत्व गुणसे विशिष्ट है वह भावजैन है। इनमें-से सबसे निकृष्ट नामजैन और स्थापनाजैन हैं। किन्तु पात्रकी दृष्टिसे जैनेतर पात्रोंसे वे भी श्रेष्ठ हैं। क्योंकि उनमें जैनत्वका नाम तो है। रहे द्रव्य जैन और भावजैन, वे तो सच्चे पात्र हैं ही। इसीसे कहा है कि आजके समयमें यदि किसीको उपकार करनेके लिए ऐसा व्यक्ति मिल जाये जो आगे महान् जैनव्रती या ज्ञानी होनेवाला हो तो वह व्यक्ति धन्य है। और यदि पात्र मुनि आदि हो तब तो ऐसे पात्रको दान देनेवाला महाभाग्यशाली है ॥५४॥

आगे कहते हैं कि जो भावजैनके प्रति निश्छल प्रीति रखता है उसे स्वर्ग और मोक्षकी प्राप्ति होती है—

जिसका जैनत्व गुण प्रसिद्ध है ऐसे पुरुषमें निश्छल अनुराग करनेवाला व्यक्ति संसार पर्यन्त अर्थात् भव-भवमें प्रसिद्ध जैनत्व गुणवाले पुरुषोंमें अग्रणी होता हुआ, सम्यक्त्व सहचारी पुण्योदयके योगसे सांसारिक भोगोंसे विरक्त होकर तीनों लोकोंके तिलकपनेको अर्थात् परमपदको प्राप्त करता है ॥५५॥

आगे कहते हैं कि पाक्षिक श्रावकको सबसे प्रथम गृहस्थाचार्यको उसके अभावमें मध्यम पात्रको कन्या आदि देना चाहिए—

संसाररूपी समुद्रसे पार उतारनेवाले गृहस्थोंमें जो प्रमुख हो, उसके अभावमें मध्यम साधर्मीके लिए कन्या, भूमि, स्वर्ण, हाथी, घोड़ा, रथ, रत्न आदि देना चाहिए ॥५६॥

विशेषार्थ—कन्यादान भी समदत्तिमें आता है। पहले जो कहा था कि नाम और स्थापनासे जो जैन है वह भी पात्र है और उसे भी दान देना चाहिए। वह जघन्य समदत्तिका कथन है और यह मध्यम समदत्तिका कथन है। क्योंकि यदि गृहस्थ साधुकी अपेक्षा गुणोंमें अधिक भी हो तब भी मध्यम पात्र ही होता है उसे ही कन्या देना चाहिए। कन्या-

---

१. 'सद्गुणानाम्' इति टीकायाम्।

अथ सधर्मभ्यः कन्यादिदाने हेतुमाह—

आधानादिक्रियामन्त्रव्रताद्युच्छेदवाञ्छया।
प्रदेयानि सधर्मेभ्यः कन्यादीनि यथोचितम् ॥५७॥

मन्त्राः—प्रत्यासत्तेराधानादि क्रियासम्बन्धिन एवार्षोक्ताः अपराजितमन्त्रो वा ॥५७॥

अथ सम्यक्कन्यादानविधिं तत्फलं चाह—

निर्दोषां सुनिमित्तसूचितशिवां कन्यां वरार्हैर्गुणैः
स्फूर्जन्तं परिणाय्य धर्म्यविधिना यः सत्करोत्यञ्जसा।
दम्पत्योः स तयोस्त्रिवर्गघटनात्त्रैवर्गिकेष्वग्रणी-
र्भूत्वा सत्समयास्तमोहमहिमा कार्ये परेऽप्यूर्जति ॥५८॥

दानके योग्य वही पात्र होता है जो अपना सधर्मा हो, अर्थात् जिसका धर्म—क्रिया, मन्त्र, व्रत वगैरह अपने समान हो ॥५६॥

आगे सधर्माको ही कन्या क्यों देनी चाहिए, उसका कारण कहते हैं—

गर्भाधान आदि क्रियाएँ, उन क्रियाओं सम्बन्धी मन्त्र अथवा पंचनमस्कार मन्त्र और मद्य आदिके त्यागरूप व्रतोंको सदा बनाये रखनेकी इच्छासे यथायोग्य कन्या आदि साधर्मीको देना चाहिए ॥५७॥

विशेषार्थ—जैन धर्मकी धार्मिक क्रियाएँ, जिनका वर्णन महापुराणके ३८-३९ आदि पर्वोंमें भगवज्जिनसेनाचार्यने किया है, तथा उनके मन्त्र और पंच नमस्कार मन्त्र, व्रत नियम आदि अन्य धर्मोंसे भिन्न है। यदि लड़की अजैन कुलमें जाती हो तो उसके व्रत, नियम, देवपूजा, पात्रदान सब छूट जाते हैं। इस तरहसे उसका धर्म ही छूट जाता है। इसलिए कन्या साधर्मीको ही देनी चाहिए। धर्मके सामने संसारका ऐश्वर्य तुच्छ है। धर्मके रहनेसे वह भी मिल जाता है और धर्मके अभावमें प्राप्त भोग भी नष्ट हो जाते हैं। इसीसे चारित्रसारमें भी समदत्तिका स्वरूप बतलाते हुए अपने समान धर्म कर्मवाले मित्रको जो उत्तम गृहस्थ हो, कन्या, भूमि, स्वर्ण, हाथी, रथ, रत्न आदि देनेका विधान किया है। यदि अपने समान न मिले तो मध्यम पात्रको भी देनेका विधान किया है। किन्तु विधर्मी या अधर्मीको देनेका विधान नहीं किया ॥५७॥

आगे कन्यादानकी विधि और उसका फल कहते हैं—

जो गृहस्थ सामुद्रिक शास्त्रमें कहे गये दोषोंसे रहित तथा भावी शुभाशुभको जाननेके उपायोंके द्वारा ज्योतिर्विदोंने जिसका सौभाग्य सूचित कर दिया है, उस कन्याको वरके योग्य कुल, शील, परिवार, विद्या, सम्पत्ति, सौरूप्य, योग्यवय आदि गुणोंसे विचारशील मनुष्योंके चित्तमें जँचनेवाले वरके साथ धार्मिक विधिसे विवाह करके श्रद्धापूर्वक साधर्मीका सत्कार करता है, वह गृहस्थ अपनी कन्या और उसके वरको धर्म, अर्थ और कामपुरुषार्थके सम्पादन करनेसे धर्म, अर्थ और कामका पालन करनेवाले गृहस्थोंमें मुखिया होकर जिनागम अथवा आर्य पुरुषोंकी संगतिसे चारित्रमोहनीय कर्मकी गुरुता दूर होनेपर पारलौकिक कार्यमें भी समर्थ होता है ॥५८॥

---

१. 'समदत्तिः स्वसमक्रियाय मित्राय निस्तारकोत्तमाय कन्याभूमिसुवर्णहस्त्यश्वरथरत्नादि दानं, स्वसमानाभावे मध्यमपात्रस्यापि दानम्।'—चारित्रसार, पृ. २१।

निर्दोषां—उत्तरत्वं [उन्नतत्वं] कनीनिकयोर्लोमशत्वं जङ्घयोरमांसलत्वमूर्वोरचारुत्वं कटि-नाभि-जठर-कुचयुगलेषु, शिरालत्वाशुभसंस्थानत्वे बाह्वोः, कृष्णत्वं तालु-जिह्वाधर-हरीतिकीषु, विरलविषमभावो दशनेषु, सकूपत्वं कपोलयोः, पिङ्गलत्वमक्ष्णोर्लग्नत्वं चिल्लिकयोः, स्वपुटत्वं निडाले, दुःसन्निवेशत्वं श्रवणयोः, स्थूलपरुषकपिलभावः केशेषु, अतिदीर्घातिलघुन्यूनाधिकता-समविकट-कुब्जवामन-किरातांगत्वं जन्मदेहाभ्यां समानत्वाधिकत्वे च' (नीतिवा. ३१।१४)। इत्यादि कन्यादोषरहिताम्। यदाह—'वरं वेश्यापरिग्रहो नाविशुद्धकन्यापरिग्रहः' इति। सुनिमित्तसूचितशिवां—सुनिमित्तैः सामुद्रिकदूतज्योतिषादि-भविष्यच्छुभाशुभज्ञानोपायैः सूचितं प्रकाशितं शिवं स्वस्य वरस्य कल्याणं यस्यास्ताम्। किं च वरितरि दूते वा सहसा कन्यागृहं गते सति कन्या अभ्यक्ता व्याधिमती रुदती पतिघ्नी सुप्ता स्तोकायुरप्रसन्ना दुःखिता बहिर्गता, कुलटा कलहोद्युक्ता परिजनोद्वासिनी अप्रियदर्शना च दुर्भगा स्यादिति न तां वृणीत कन्याम्। वराहैर्गुणैः—कुलीन-सुशीलत्वादिभिः। उक्तं च—

'कुलं च शीलं च सनाथता च विद्या च वित्तं च वपुर्वयश्च।
एतान् गुणान् सप्त परीक्ष्य देया कन्या बुधैः शेषमचिन्तनीयम् ॥' [ ]

कुलस्य प्रागुपादानमकुलीने कन्याविनियोगस्यात्यन्तनिषेधार्थम्। यदाह—

'वरं जन्मनाशः कन्याया ना...............

परिणाय्य—[युक्तितो वर-] णविधानमग्निदेवद्विजसाक्षिकं च पाणिग्रहणं विवाहस्तं कारयित्वा। यदाह—'विवाहपूर्वो व्यवहारश्चातुर्वर्ण्यं कुलीनयतीति, [-नीतिवा. ३१।२] धर्म्यविधिना—धर्म्याः-धर्मादनपेताः ब्राह्मप्राजापत्यार्षदैवाश्चत्वारो विवाहाः। ततोऽन्ये गान्धर्वासुरराक्षसपैशाचाश्चत्वारोऽधर्म्याः। तल्लक्षणानि यथा—

विशेषार्थ—भारतीय धर्ममें गृहस्थाश्रमका बहुत महत्त्व है। आचार्य पद्मनन्दिने कहा[1] है कि इस कलिकालमें जिनालय, मुनि, धर्म और दान इन सबका मूल कारण श्रावक हैं। श्रावक न हों तो इनमें-से कोई भी रक्षित नहीं रह सकता। अतः इन सबकी स्थिति तभी तक है जब तक श्रावक और श्राविकाओंमें धार्मिक प्रेम है। इसीसे विवाह सम्बन्ध साधर्मियोंमें ही करनेपर जोर दिया है। भारतमें विवाहिताको केवल पत्नी नहीं कहते, धर्मपत्नी कहते हैं। क्योंकि वह पतिके धर्मकी भी सहचारिणी होती है। पत्नीके योग्य होनेपर ही पतिका भी योगक्षेम चलता है और धर्मसाधन होता है। अतः वैवाहिक सम्बन्ध बहुत सोच-समझकर किया जाता है। सबसे प्रथम कन्याका कुल शील सौभाग्य आदि देखा जाता है, इसी तरह कन्यापक्षकी ओरसे वरके गुण देखे जाते हैं तब विवाह होता है।

कन्या निर्दोष होना चाहिए—आँखकी पुतलियोंका उठा होना, जंघाओंपर रोम होना, ऊरुओंका मांसविहीन होना, कटि-नाभि-उदर और कुच युगलका सुन्दर न होना, बाहुओं पर नसोंका उभार तथा उनका आकार सुन्दर न होना, तालु, जीभ और ओठोंपर कालापन होना, दाँतोंका विरल और टेढ़े-मेढ़े होना, कपोलोंकी हड्डीका उठा होना, आँखोंमें पीलापना, भौंहोंका जुड़ा होना, मस्तकका उठा होना, कानोंकी रचना खराब होना, केशोंका स्थूल, कठोर और पीला होना, अतिलम्बी या अतिलघु होना, अंगोंका कुबड़ा बौना आदि होना दोष है। इत्यादि दोषोंसे रहित कन्या होना चाहिए। कहा है—वेश्याको स्वीकार करना उत्तम है किन्तु

1. 'संप्रत्यत्र कलौ काले जिनगेहो मुनिस्थितिः। धर्मश्च दानमित्येषां श्रावका मूलकारणम्' ॥
—पद्म. पञ्च. ६।६

'स ब्राह्मो विवाहो यत्र वरायालङ्कृत्य कन्या प्रदीयते-'त्वं भवास्य महाभागस्य सधर्मचारिणीति।' विनियोगेन कन्याप्रदानात् प्राजापत्यः। गो-भूमि-सुवर्णपुरस्सरं कन्याप्रदानादार्षः। स दैवो विवाहो यत्र यज्ञार्थमृत्विजः कन्याप्रदानमेव दक्षिणा। मातुः पितुर्बन्धूनां चाप्रामाण्यात्परस्परानुरागेण मिथः समवायाद् गान्धर्वः। पणबन्धेन (?) कन्याप्रदानादासुरः। सुप्तप्रमत्तकन्यादानात्पैशाचः। कन्यायाः प्रसह्यादानाद्राक्षसः। एते चत्वारोऽधर्म्या अपि नाधर्म्या यद्यस्ति वधूवरयोरनपवादं परस्परस्य भाव्यत्वम्।'—नीति वा. ३१।४-१३।

अत्राह मनुः—

'ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः।
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः॥
आच्छाद्य चार्चयित्वा च श्रुतिशीलवते स्वयम्।
आहूय दानं कन्याया ब्राह्मो धर्म्यः प्रकीर्तितः॥
यज्ञे तु वितते सम्यगृत्विजे कर्म कुर्वते।
अलङ्कृत्य सुतादानं दैवं धर्म्यं प्रचक्षते॥
एकं गोमिथुनं द्वे वा वरादादाय धर्मतः।
कन्याप्रदानं विधिवदार्षो धर्म्यः स उच्यते॥
सहोभौ चरतां धर्ममिति वाचानुभाष्य तु।
कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः॥
ज्ञातिभ्यो द्रविणं दत्वा कन्यायै चैव शक्तितः।
कन्याप्रदानं स्वाच्छन्द्यादासुरोऽधर्म्य उच्यते॥
इच्छयाऽन्योन्यसंयोगः कन्यायाश्च वरस्य च।
गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसंभवः॥

अविशुद्ध कन्याका ग्रहण उत्तम नहीं है। जो कन्या रोगी हो, अल्पायु हो, अप्रसन्न रहती हो, कुलटा हो, लड़ाकू हो, अभागिनी हो, देखनेमें अप्रिय हो उसके साथ विवाह नहीं करना चाहिए। वर कुलीन और सुशील होना चाहिए। कहा है—कुल, शील, सनाथता, विद्या, धन, शरीर और आयु इन सात गुणोंकी परीक्षा करके ही कन्या देना चाहिए। सबसे प्रथम कुलको स्थान दिया है कि अकुलीनको कन्या कभी भी नहीं देना चाहिए। कहा है—'कन्याका मरना उत्तम है किन्तु अकुलीनको कन्या देना उत्तम नहीं है।'

विवाहके चार प्रकार कहे हैं—ब्राह्म, प्राजापत्य, आर्ष और दैव। इनके अतिरिक्त गान्धर्व, आसुर, राक्षस और पैशाच विवाह अधर्म्य हैं। इनका लक्षण इस प्रकार है—कन्याको अलंकृत करके वरको देना कि तू इस भाग्यशालीकी धर्मपत्नी होओ, ब्राह्म विवाह है। बदलेमें कन्या देना प्राजापत्य विवाह है। गौ, भूमि, सुवर्णदान पूर्वक कन्या देना आर्ष विवाह है। जिसमें यज्ञके पुरोहितको यज्ञ करानेकी दक्षिणाके रूपमें कन्या दी जाती है वह दैवविवाह है। माता-पिता, बन्धु-बान्धवोंकी अनुमतिके बिना परस्परके अनुरागसे जो विवाह किया जाता है वह गान्धर्व है।.... कन्या देना आसुर विवाह है। सोती हुई या बेहोश कन्याको उठा ले जाना पैशाच विवाह है। जबरदस्ती कन्याको ले जाना राक्षस विवाह है। ये चारों विवाह अधर्म्य होनेपर भी यदि वधू और वरमें परस्परमें अपवादरहित भव्यता है तो अधर्म्य नहीं है। मनुने कहा है—'ब्राह्म, दैव, आर्ष, प्राजापत्य, आसुर, गान्धर्व, राक्षस और पैशाच आठ भेद हैं। श्रुति और शीलसे सम्पन्न वरको स्वयं आमन्त्रित करके पूजापूर्वक

हत्वा छित्वा च भित्वा च क्रोशन्तीं रुदतीं गृहात् ।
प्रसह्य कन्याहरणं राक्षसोऽधर्म उच्यते ॥
सुप्तां प्रमत्तां मत्तां वा रहो यत्रोपगच्छति । ३
स पापिष्ठो विवाहानां पैशाचः प्रथितोऽष्टमः ॥
ब्राह्मादिषु विवाहेषु चतुर्ष्वेवानुपूर्वकः ।
ब्रह्मवर्चस्विनः पुत्राः जायन्ते शिष्टसंमताः ॥ ६
रूपसत्त्वगुणोपेता धनवन्तो यशस्विनः ।
पर्याप्तभोगा धर्मिष्ठा जीवन्ति च शतं समाः ॥
इतरेषु त्वशिष्टेषु नृशंसानृतवादिनः । ९
जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः ॥
अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा ।
निन्दितैर्निन्दिता नृणां तस्मान्निन्द्यानि वर्जयेत् ॥' [मनुस्मृ. ३।२१,२७-३४,३९-४२] १२

धर्म्यविवाहविधिरार्षोक्तो यथा—

'ततोऽस्य गुर्वनुज्ञानादिष्टा वैवाहिकी क्रिया ।
वैवाहिके कुले कन्यामुचितां परिणेष्यतः ॥ १५
सिद्धार्चनविधिं सम्यग् निर्वर्त्य द्विजसत्तमाः ।
कृताग्नित्रयसंपूज्याः कुर्युस्तत्साक्षिकां क्रियाम् ॥
पुण्याश्रमे क्वचित् सिद्धप्रतिमाभिमुखं तयोः । १८
दम्पत्योः परया भूत्या कार्यः पाणिग्रहोत्सवः ॥
वेद्यां प्रणीतमग्नीनां त्रयं द्वयमथैककम् ।
ततः प्रदक्षिणीकृत्य प्रशेय्य विनिवेशनम् ॥ २१

कन्यादान ब्राह्म विवाह है। यज्ञमें पधारे ऋत्विजको जो यज्ञकर्म करता है, अलंकृत करके कन्या देना दैवविवाह है। वरसे एक या दो गोमिथुन लेकर विधिवत् कन्या देना आर्ष विवाह है। दोनों मिलकर धर्मका पालन करना ऐसा कहकर कन्या देना प्राजापत्य विवाह है। ये चारों विवाह धर्म्य हैं। कुटुम्बियोंको कन्याके लिए धन देकर बलपूर्वक कन्यादान आसुर है। कन्या और वरका परस्परकी इच्छासे सम्बन्ध करना गान्धर्व विवाह है। यह विवाह कामज है। रोती-चिल्लाती हुई कन्याको बलपूर्वक हरण करना राक्षस विवाह है। सोती हुई या पागल या बेहोश कन्याके पास एकान्तमें जाना सब विवाहोंमें निकृष्ट पैशाच विवाह है। इनमें-से ब्राह्म आदि चार विवाहोंमें ही ब्रह्मविद् तेजस्वी पुत्र उत्पन्न होते हैं और वे रूप, सत्त्व आदि गुणोंसे युक्त धनवान् , यशस्वी और धार्मिक होते हैं तथा सौ वर्ष तक जीते हैं। अन्य दुर्विवाहोंमें ब्रह्म और धर्मके द्वेषी, असत्यवादी क्रूर पुत्र उत्पन्न होते हैं। अनिन्दित स्त्रीविवाहोंसे अनिन्द्य सन्तान उत्पन्न होती है और निन्दितसे निन्दित। इसलिए मनुष्योंको निन्दित विवाह नहीं करना चाहिए।

महापुराणमें विवाह क्रियाका वर्णन करते हुए लिखा है—विवाहके योग्य कुलमें उत्पन्न हुई कन्याके साथ जो विवाह करना चाहता है गुरुकी आज्ञासे उसकी वैवाहिक क्रिया की जाती है। सबसे पहले अच्छी तरह सिद्ध भगवान्‌का पूजन करना चाहिए। फिर

---

१. प्रसज्य।

पाणिग्रहणदीक्षायां नियुक्तं तद्वधूवरम् ।
आसप्ताहं चरेद् ब्रह्मव्रतं देवाग्निसाक्षिकम् ॥
कृत्वा स्वस्योचितां भूमिं तीर्थभूमौ विहृत्य च ।
स्वगृहं प्रविशेद् भूत्या परया तद्वधूवरम् ॥
विमुक्तकंकणं पश्चात् स्वगृहे शयनीयकम् ।
अधिशय्य यथाकालं भोगाङ्गैरुपलालितम् ॥
सन्तानार्थमृतावेव कामसेवां मिथो भजेत् ।
शक्तिकालव्यपेक्षोऽयं क्रमोऽशक्तेष्वतोऽन्यथा ॥' [महापु. ३८।१२७-१३४]

'शिथिले पाणिग्रहे वरः कन्यया परिभूयते । मुखं पश्यतो वरस्यानिमीलितलोचना कन्या भवति प्रचण्डा । सह शयानस्तूष्णींभवन् पशुवन्मन्येत । बलादाक्रामन्नाजन्मविद्वेष्यो भवति । धैर्य-चातुर्यायत्तं हि कन्याविस्रंभणम् । समविभवाभिजनयोरसमगोत्रयोश्च विवाहसंबन्धः । महतः कन्यापितुरैश्वर्यादल्पमवमन्यते[1] । अल्पस्य कन्यापितुर्दौर्विध्यान्महताऽवज्ञायेत[2] । अल्पस्य महता संव्यवहारे महान् व्ययो अल्पश्चायः । सम्यग्धृताऽपि कन्या तावत्सन्देहास्पदं यावन्न पाणिग्रहः । आनुलोम्येन चतुस्त्रिद्विवर्णं[3] कन्याभाजनानि ब्राह्मण-क्षत्रियविशः । देशकुलापेक्षो मातुलसंबन्ध इति ।' [नीति वा. ३१।१५-२९]

सत्समयः—जिनप्रवचनमार्यसंगतिर्वा । तेनास्तो—निराकृतो । मोहस्य—चारित्रमोहकर्मणो । महिमा—गुरुत्वं येन स तथोक्तः ।

तथा च—

'जन्मसन्तानसंपादि-विवाहादि-विधायिनः ।
स्वाः परे स्युः सकृत्प्राणहारिणो न परे परे ॥ [ ]
'सर्वं धर्ममयं क्वचित्क्वचिदपि प्रायेण पापात्मकं
क्वाप्येतद् द्वयवत्करोति चरितं प्रज्ञाधनानामपि ।
तस्मादेष तदन्धरज्जुवलनं स्नानं गजस्याथवा,
मत्तोन्मत्तविचेष्टितं न हि हितो गेहाश्रमः सर्वथा ॥' [ ]

तीनों अग्नियोंकी पूजापूर्वक वैवाहिक क्रिया की जाती है। किसी पवित्र स्थानमें बड़ी विभूतिके साथ सिद्ध भगवान्‌की प्रतिमाके सामने वर-वधूका विवाहोत्सव करना चाहिए। तीन अग्नियोंकी प्रदक्षिणा देकर वर-वधूको समीप ही बैठना चाहिए। तथा देव और अग्निकी साक्षीपूर्वक सात दिन तक ब्रह्मचर्य धारण करना चाहिए। फिर किसी योग्य देशमें भ्रमण कर तथा तीर्थभूमिमें विहार करके वर-वधूका गृहप्रवेश करना चाहिए। फिर शय्यापर शयन कर केवल सन्तान उत्पन्न करनेकी इच्छासे ऋतुकालमें ही काम-सेवन करना चाहिए। काम-सेवनका यह क्रम काल तथा शक्तिकी अपेक्षा रखता है। अतः जो अशक्त हैं उनके लिए अन्य क्रम है। यह विवाहकी धार्मिक विधि है। नीतिवाक्यामृतमें कहा है—'प्रथम रात्रिको पत्नीके साथ सोते हुए यदि वर एकदम चुप रहता है तो उसे पशुके समान माना जाता है। यदि वह बलात्कार करता है तो उससे पत्नी जन्म-भर द्वेष रखती है। इसलिए धैर्य और चतुराईमें पत्नीका विश्वास प्राप्त करना चाहिए। विवाह-सम्बन्ध समान सम्पत्तिशाली

१. क्राम्स्वा—मु. ।
२. पितुर्दौस्थ्यं महता कष्टेन विज्ञायते ।—नी. वा. ।
३. वर्णाः कन्याभाजनाः—नी. वा. ।

इत्यादि सूक्तिसुधा........मितः । परेऽपि—पारलौकिके । ऊर्जति—समर्थो भवति । एतेनेदमपि संगृहीतम्—

'द्वौ हि धर्मौ गृहस्थानां लौकिकः पारमार्थिकः ।
लोकाश्रयो भवेदाद्यः परः स्यादागमाश्रयः ॥
जातयोऽनादयः सर्वास्तत्क्रियापि तथाविधा ।
श्रुतिः शास्त्रान्तरं वास्तु प्रमाणं कात्र नः क्षतिः ॥
स्वजात्यैव विशुद्धानां वर्णानामिह रत्नवत् ।
तत्क्रियाविनियोगाय जैनागमविधिः परम् ॥
यद्भव भ्रान्तिनिर्मुक्तिहेतुधीस्तत्र दुर्लभा ।
संसारव्यवहारे तु स्वतः सिद्धे वृथागमः ॥

तथा च—

सर्वं एव हि जैनानां प्रमाणं लौकिको विधिः ।
यत्र सम्यक्त्वहानिर्न यत्र न व्रतदूषणम् ॥' [सो. उपा. ४७६-४८०]

इति स्थितम् ॥५८॥

अथ सत्कन्याप्रदातुः साधर्मिकोपकारकरणद्वारेण महान्तं सुकृतलाभमवभासयन्नाह—

सत्कन्यां ददता दत्तः सत्रिवर्गो गृहाश्रमः ।
गृहं हि गृहिणीमाहुर्न कुड्यकटसंहतिम् ॥५९॥

किन्तु विभिन्न गोत्रवालोंमें होता है। यदि कन्याका पिता समृद्धिशाली हुआ तो कन्या अपनेसे हीन ऐश्वर्यवाले पतिका तिरस्कार करती है। छोटा आदमी यदि बड़ेके साथ सम्बन्ध करता है तो व्यय तो बहुत होता है और आय कम होती है। विवाहकी बात पक्की हो जानेपर भी जबतक विवाह न हो जाये तबतक सन्देह रहता है। अनुलोम विवाहमें ब्राह्मण चारों वर्णकी, क्षत्रिय तीन वर्णोंकी और वैश्य दो वर्णोंकी कन्यासे विवाह कर सकता है। देश विशेषमें मामाकी कन्यासे भी विवाह होता है।'

आचार्य कहते हैं—'यह गृहस्थाश्रम क्वचित्-क्वचित् धर्ममय है किन्तु प्रायः पापमय है। इसलिए यह अन्धेके रस्सी बटनेके समान या हाथीके स्नानके समान है। यह सर्वथा हितकर नहीं है।' गृहस्थके दो धर्म हैं—लौकिक और पारलौकिक। लौकिक धर्म लोकरीतिके अनुसार चलता है। किन्तु पारलौकिक धर्म आगमके अनुसार होता है। सभी जैनोंको ऐसी लौकिक विधि मान्य होती है जिसके पालन करनेसे सम्यक्त्वकी हानि न हो और व्रतोंमें दूषण न लगे। सांसारिक व्यवहार तो स्वतःसिद्ध है उसके लिए आगमकी आवश्यकता नहीं है। आगमकी आवश्यकता तो संसार छोड़नेके लिए है। विवाहका भी यही लक्ष्य है, संसारमें रमना नहीं। जो विवाह द्वारा जीवनको सुखी बनाते हैं वे अन्तमें गृह त्यागकर अपने परलोकको भी सुधारनेमें समर्थ होते हैं ॥५८॥

आगे कहते हैं कि योग्य कन्याके दाता पिताको अपने साधर्मीका उपकार करनेसे महान् पुण्यबन्ध होता है—

सत्कन्या देनेवालेने धर्म-अर्थ-काम सहित गृहाश्रम दे दिया; क्योंकि पत्नीको ही गृह कहते हैं, दीवार और बाँस आदिके समूहको गृह नहीं कहते ॥५९॥

---

१. 'गृहिणी गृहमुच्यते न पुनः कुड्यकटसंघातः ।'—नीतिवा०, ३१।३१।

सत्रिवर्गः—धर्मार्थकामानां सद्गृहिणीमूलत्वात् । तथाहि धर्मः स्वदारसन्तोषाद्यात्मकसंयमासंयमलक्षणो देवादिपरिचरणस्वरूपः सत्पात्रदानादिस्वभावश्च । अर्थो वेश्यादिव्यसनव्यावर्तनेन निष्प्रत्यूहमर्थस्योपार्जनादुपार्जितस्य च रक्षणाद् रक्षितस्य च वर्धनाद्यथाभाव्यं ग्रामसुवर्णादिसंपत्तिः । कामश्च यथेष्टमाभिमानिकरसानुविद्धसर्वेन्द्रियप्रीतिहेतुः कुलाङ्गनासंगिनां सुप्रतीतः । तथा च स्वयं प्रायुङ्क्त सिद्धचक्रे—

'जगद्वधूद्याननगप्लवङ्गं या स्वोपभोगेन नियत्यचेतः ।
भर्तुः स भागन् जनयत्युरस्थान् प्रादान्न किं कन्यतमां ददत्ताम् ॥'
श्रीः सर्वभोगीणवपुःप्रयोगैरक्षिप्तचित्ते ध्रुवमिद्धरागा ।
विभर्ति पत्यौ समवेतु कामा तदेकभोग्यां सुकलत्रमूर्तिम् ॥
सर्वाणि लोके सुखसाधनानि स्वार्थक्रियावन्ति यतो भवन्ति ।
तामेव युक्त्वा क्षितमां स्वनेशा मनस्विनः स्वेत्तरयेत्सुधर्मः ॥' [ ] ॥५९॥

अथ कुलस्त्रीपरिग्रहं लोकद्वयाभिमतफलसम्पादकत्वात् त्रैवर्गिकस्य विधेयतयोपदिशति—

धर्मसन्ततिमक्लिष्टां रतिं वृत्तकुलोन्नतिम् ।
देवादिसत्कृतिं चेच्छन्सत्कन्यां यत्नतो वहेत् ॥६०॥

धर्मसन्ततिं—धर्मार्थान्यपत्यानि धर्माविच्छेदे वा । अक्लिष्टां—अनुपहताम् । कुलं—वंशो गृहं च । वहेत्—परिणयेत । उक्तं च—

'धर्मसन्ततिरनुपहता रतिः गृहवार्ता सुविहितत्त्वमाभिजात्याचारविशुद्धत्वं ।
देवद्विजातिथिबान्धवसत्कारानवद्यत्वं च दारकर्मणः फलम् ॥'
[नीतिवा. ३१।३०] ॥६०॥

विशेषार्थ—कुलीनता आदि गुणोंसे युक्त और सामुद्रिक शास्त्रमें कहे गये दोषोंसे रहित कन्याको सत्कन्या कहते हैं। जहाँ धर्मका अनुष्ठान होता है उसे आश्रम कहते हैं। घर भी एक आश्रम है जिसमें रहकर गृहस्थ धर्मपूर्वक अर्थ और कामका साधन करता है। धर्म अर्थ और कामकी मूल सती पत्नी ही होती है। पत्नीके सहयोगसे गृहस्थ स्वदार सन्तोष आदि रूप संयमका पालन करता है, देव आदिकी पूजन आदि करता है, सत्पात्रोंको दान देता है। ये सब धर्मके अंग हैं। पत्नीके होनेसे वेश्या-सेवन आदि व्यसनोंसे बचनेके कारण बिना बाधाके धनका उपार्जन करता है, उपार्जितकी रक्षा करता है और रक्षित धनको बढ़ाता है। इस तरह उसके पास ग्राम, सुवर्ण आदि सम्पत्ति संचित होती रहती है। सम्भोगकी अभिलाषाको काम कहते हैं। कुलांगनाके साथ इच्छानुसार कामभोगसे समस्त इन्द्रियोंकी तृप्ति होती है। इस तरह सत्कन्याकी प्राप्तिसे धर्म-अर्थ-काम सहित गृहाश्रम ही प्राप्त होता है। इसीसे लोकमें भी घर नाम घरवालीका ही है। योग्य घरवालीके अभावमें ईंट-पत्थरसे बनी दीवारोंके छाजनका नाम घर नहीं है। नीतिवाक्यामृतमें भी ऐसा ही कहा है। आशाधरजी ने अपने सिद्धचक्र महाकाव्यमें कहा है—'जो पत्नी पतिके मनको अपनेमें बाँधकर रखती है वैसी पत्नी जिसने दी उसने क्या नहीं दिया ?॥५९॥

सत्कन्याका पाणिग्रहण इस लोक और परलोकमें इष्ट फलका दायक होता है अतः गृहस्थको उसे करनेका उपदेश देते हैं—

धार्मिक सन्तानको जन्म देने या धर्मकी परम्परा चालू रखने, बिना किसी प्रकारकी बाधाके सम्भोग करने व चारित्र और कुलकी उन्नति तथा देव, द्विज और अतिथिका सत्कार करनेके इच्छुक श्रावकको सज्जनकी सत्कन्याको तत्परताके साथ बिवाहना चाहिए ॥६०॥

अथ दुष्कलत्रस्याकलत्रस्य वा पात्रस्य भूम्यादिदानान्न कश्चिदुपकारः स्यादित्यमुमर्थमवश्यं कन्या-विनियोगेन सधर्माणमनुगृह्णीयादिति विधिव्यवस्थापनार्थमर्थान्तरन्यासेन समर्थयते—

सुकलत्रं विना पात्रे भूहेमादिव्ययो वृथा ।
कीटैर्दन्दह्यमानेऽन्तः कोऽम्बुसेकाद् द्रुमे गुणः ॥६१॥

पात्रे—संयुज्यमानमोक्षकारणगुणे गृहिणि । गुणः—उपकारः ।

यल्लोकः—

'तणयं णासइ वंसो णासइ दियहो कुभोयणे भुत्ते ।
कुकलत्तेण य जम्मो णासई धम्मो विणु दयाए ॥' [ ] ॥६१॥

अथ विषयसुखोपभोगेनैव चारित्रमोहोदयोद्रेकस्य शक्यप्रतीकारत्वात्तद्द्वारेणैव तमपवर्त्यात्मानमिव साधर्मिकमपि विषयेभ्यो व्युपरमेदित्युपदेशार्थमाह—

विशेषार्थ—सोमदेवजीने भी अपने नीतिवाक्यामृतमें विवाहके ये ही फल बतलाये हैं। सबसे पहला फल है धर्मसन्तति। इसके दो अर्थ होते हैं—धार्मिक सन्तान और धर्मकी परम्परा। धार्मिक सन्तानसे ही धर्मकी परम्परा चलती है। और धार्मिक सन्तान तभी होती है जब माता-पिता दोनों धर्मात्मा हों। उनमें भी मातापर बहुत कुछ निर्भर है क्योंकि बालकके लालन-पालनमें माताका विशेष हाथ होनेसे उसीके संस्कार बालकमें आते हैं और ऐसे संस्कारित बालकोंसे धर्मकी परम्परा चलती है। विवाहका दूसरा फल है निर्बाध सम्भोग। अपनी पत्नीसे प्रेम करनेमें मनुष्य स्वतन्त्र होता है उसमें किसी प्रकारका भय नहीं रहता। इससे निर्विघ्न कामशान्ति होनेसे मनुष्य आवारागर्दीसे बच जाता है और उसका चारित्र उन्नत होता है। यह विवाहका तीसरा फल है। स्वदार सन्तोष मनुष्यके चारित्रकी उन्नतिका ही सूचक है। चारित्रकी उन्नतिके साथ वंशकी उन्नति विवाहका चतुर्थ फल है। धर्मात्मा सन्तानसे जैसे धर्मकी परम्परा चलती है वैसे ही वंशकी भी परम्परा चलती है। पाँचवा फल है अतिथि सत्कार। अतिथिमें मुनि-व्रती आदि तो आते ही हैं बन्धु-बान्धव भी आते हैं। अपने घरमें इन सब आगन्तुकोंका सत्कार पत्नीके द्वारा ही सम्भव होता है। अतः विवाह करना आवश्यक है ॥६०॥

'सत्कन्या देकर साधर्मीका उपकार अवश्य करना चाहिए' इस विधिकी व्यवस्थाके लिए जिसके घरमें पत्नी नहीं है या दुष्टा पत्नी है उसे भूमि आदि देनेसे कोई लाभ नहीं है इस बातका समर्थन करते हैं—

सत्पत्नीके बिना गृहस्थको भूमि-सुवर्ण आदिका दान देना व्यर्थ है। जिस वृक्षके मध्य भागको कीटोंने बुरी तरह खा डाला हो, उसे पानीसे सींचनेसे क्या लाभ है ? किसीने कहा है—कुपुत्र वंशका नाशक है, कुभोजन करनेसे वह दिन ही नष्ट होता है। किन्तु कुपत्नीसे जन्म ही नष्ट हो जाता है ॥६१॥

विषय-सुखके उपभोगसे ही चारित्रमोहके तीव्र उदयका प्रतीकार हो सकता है, इस लिए उसके द्वारा ही स्वयं विषय-सेवनसे निवृत्त होकर अपनी ही तरह अन्य साधर्मियोंको भी विषय सेवनसे निवृत्त करना चाहिए, यह उपदेश देते हैं—

विषयेषु सुखभ्रान्तिं कर्माभिमुखपाकजाम् ।
छित्वा तदुपभोगेन त्याजयेत्तान् स्ववत्परम् ॥६२॥

स्पष्टम् ॥६२॥

अथ दुःषमकालवशात्प्रायेण पुरुषाणामाचारविप्लवदर्शनाद् विचिकित्साकुलितचित्तदातुः सौचित्य-विधानार्थं चतुरः श्लोकानाह—

दैवाल्लब्धं धनं प्राणैः सहावश्यं विनाशि च ।
बहुधा विनियुञ्जानः सुधीः समयिकान् क्षिपेत् ॥६३॥

विनियुञ्जानः—व्ययमानः । समयिकान्—समयाश्रितान् गृहस्थान् यतीन्वा । क्षिपेत्—धिगिमान् संभावणमात्रस्याप्ययोग्यानित्याद्यवर्णवादेन तिरस्कुर्यात् काक्वा न क्षिपेदिति प्रतिषेधे पर्यवस्यति ॥६३॥

किं तर्हि कुर्यादित्याह—

विन्यस्यैदंयुगीनेषु प्रतिमासु जिनानिव ।
भक्त्या पूर्वमुनीनर्चेत् कुतः श्रेयोऽतिचर्चिनाम् ॥६४॥

विन्यस्य—नामादि विधिना निक्षिप्य । ऐदंयुगीनेषु—अस्मिन् युगे साधुषु ॥६४॥

अपना फल देनेके लिए तैयार हुए चारित्रमोहनीय कर्मके उदयसे मनुष्यको विषयोंमें सुखकी भ्रान्ति होती है वह ये सुखरूप हैं या सुखके हेतु हैं ऐसा मानता है। उस भ्रान्तिको विषयोंका सेवन करनेसे दूर करना चाहिए। और फिर अपनी ही तरह दूसरोंको भी कन्या आदि देकर यह विषय छुड़ाना चाहिए।॥६२॥

विशेषार्थ—चारित्रमोहके उदयसे पीड़ित मनुष्यको विषय-सेवन अच्छा लगता है। वह मानता है कि विषयमें सुख है। उसका यह भ्रम दूर करनेका उपाय है कि उसका विवाह करा दिया जाये। इससे वह विषयोंकी यथार्थता समझकर स्वयं ही विषयोंसे विमुख होकर दूसरोंकी भी भ्रान्ति दूर करनेका प्रयत्न करेगा ॥६२॥

पंचम कालके प्रभावसे प्रायः मनुष्योंके आचारमें शिथिलता देखनेसे दाताका मन ग्लानिसे भर जाता है। अतः उनके चित्तके समाधानके लिए चार श्लोक कहते हैं—

पुण्य कर्मके उदयसे प्राप्त हुआ धन प्राणोंके साथ अवश्य नष्ट होनेवाला है। उस धन-को अनेक प्रकारसे खर्च करनेवाला गृहस्थ क्या साधर्मियोंका तिरस्कार करेगा? अर्थात् नहीं करेगा ॥६३॥

विशेषार्थ—संसारमें दैवकी ही बलवत्ता मानी जाती है और पौरुषको गौणता दी जाती है। दैवके अनुकूल होनेपर ही पौरुष भी सफल होता है। अतः धनकी प्राप्तिमें पुण्य कर्मका उदय प्रधान है। इसके साथ ही यह तो स्पष्ट ही है कि मनुष्यके मरते ही उसके लिए तो सब धन नष्ट ही हो जाता है। ऐसी स्थितिमें जब गृहस्थ शादी-विवाह, भोग-उपभोगमें खूब धन खर्च करता है तो यदि वह विचारशील है और लोक-परलोकको समझता है तो क्या वह धार्मिकोंका विशेषतया मुनियोंका यह कहकर तिरस्कार करेगा कि ये तो बात करने लायक भी नहीं है? ॥६३॥

ऐसी स्थितिमें क्या करना चाहिए, यह बतलाते हैं—

जैसे प्रतिमामें जिनदेवकी स्थापना करके उनकी पूजा करते हैं उसी तरह इस युगके साधुओंमें पूर्व मुनियोंकी स्थापना करके भक्तिपूर्वक पूजा करे। क्योंकि अत्यन्त नुक्ताचीनी करनेवालोंका कल्याण कैसे हो सकता है ॥६४॥

पुनस्तद् समर्थनार्थमाह—

भावो हि पुण्याय मतः शुभः पापाय चाशुभः।
तद्‌दुष्यन्तमतो रक्षेद्धीरः समयभक्तितः ॥६५॥ ३

विशेषार्थ—दिगम्बर जैन धर्मका मुनिमार्ग अत्यन्त कठिन है। और इस कालमें तो उसका पालन करना और भी कठिन है। फिर भी मुनिमार्ग चालू है। किन्तु उसमें शिथिलाचारिता बढ़ी है इसीसे मुनियोंकी आलोचना कुन्दकुन्द-जैसे महर्षियोंने अपने षट् प्राभृतोंमें की है। जब मुनिपदने भट्टारकोंका रूप लिया तब तो शास्त्रज्ञ श्रावकोंके द्वारा उनकी और भी अधिक आलोचना हुई। पं. आशाधरजीने अपने अनगारधर्मामृत (२।९६) में उन्हें म्लेच्छवत् आचरण करनेवाला कहा है और एक पुराना श्लोक उद्धृत किया है जिसमें कहा है कि चारित्रभ्रष्ट पण्डितों और बठर तपस्वियोंने निर्मल जिनशासनको मलिन कर दिया। लगता है दसवीं-ग्यारहवीं शताब्दीमें शिथिलाचारी मुनियोंका विरोध इतना बढ़ा कि श्रावकोंने उन्हें आहार तक देना बन्द कर दिया। तब उदारमना सोमदेवाचार्यको इस ओर ध्यान देना पड़ा। उन्होंने अपने उपासकाचारमें लिखा है—भोजनमात्र देनेके लिए साधुओंकी परीक्षा नहीं करना चाहिए। वे सज्जन हों या दुर्जन, गृहस्थ तो दान देनेसे शुद्ध होता है। गृहस्थ अनेक आरम्भोंमें फँसे रहते हैं और उनका धन भी अनेक प्रकारसे खर्च होता है। अतः तपस्वियोंके आहारदानमें ज्यादा सोच-विचार नहीं करना चाहिए। मुनिजन जैसे-जैसे तप-ज्ञान आदिमें विशिष्ट हों वैसे-वैसे गृहस्थोंको उनका अधिक-अधिक समादर करना चाहिए। धन भाग्यसे मिलता है अतः भाग्यशाली पुरुषोंको कोई मुनि आगमानुकूल मिले या न मिले, उन्हें अपना धन धार्मिकोंमें अवश्य खर्च करना चाहिए। जिन भगवान्‌का यह धर्म अनेक प्रकारके मनुष्योंसे भरा है। जैसे मकान एक स्तम्भपर नहीं ठहर सकता, वैसे ही धर्म भी एक पुरुषके आश्रयसे नहीं ठहरता। नाम, स्थापना, द्रव्य और भावकी अपेक्षा मुनि चार प्रकारके होते हैं और वे सभी दान-सम्मानके योग्य हैं। किन्तु गृहस्थोंके पुण्य उपार्जनकी दृष्टिसे जिनबिम्बोंकी तरह उन चार प्रकारके मनियोंमें उत्तरोत्तर विशिष्ट विधि होती जाती है। यह बड़ा आश्चर्य है कि इस कलिकालमें जब मनुष्योंका मन चंचल रहता है और शरीर अन्नका कीड़ा बना रहता है, आज भी जिन रूपके धारक पाये जाते हैं। जैसे पाषाण वगैरहमें अंकित जिनेन्द्र भगवान्‌की प्रतिकृति पूजने योग्य है, वैसे ही आजकल मुनियोंको भी पूर्वकालके मुनियोंकी प्रतिकृति मानकर पूजना चाहिए। इस तरह सोमदेव सूरिने वर्तमान मुनियोंको पूर्व मुनियोंकी प्रतिकृति मानकर पूजनेका निर्देश किया है। पं. आशाधरजीने भी उन्हींका अनुसरण करते हुए वर्तमान मुनियोंमें पूर्व मुनियोंकी स्थापना करके उनको पूजनेकी प्रेरणा की है। आचार्य पद्मनन्दिने भी कहा है 'आज इस पंचमकालमें भरत क्षेत्रमें तीनों लोकोंमें श्रेष्ठ केवली नहीं हैं किन्तु जगत्‌के स्वरूपको प्रकाशित करनेवाली उनकी वाणी विद्यमान है तथा उस वाणीके आलम्बन रत्नत्रयके धारी मुनिवर विद्यमान हैं। उनकी पूजा जिनवाणीकी ही पूजा है और जिनवाणीकी पूजा साक्षात् जिनेन्द्रदेवकी पूजा है' ॥६४॥

उसीके समर्थनमें पुनः कहते हैं—

शुभ भाव पुण्यके लिए और अशुभ भाव पापके लिए होता है। इसलिए भावोंमें विकार होनेपर धीर पुरुषको जिनशासनके अनुरागसे रक्षा करना चाहिए ॥६५॥

धीरः—अविकारप्रकृतिः । समयभक्तितः । तथाहि—

'सम्प्रत्यस्ति न केवली किल कलौ त्रैलोक्यचूडामणि-
स्तद्वाचः परमासतेऽत्र भरतक्षेत्रे जगद् द्योतिकाः ।
सद्रत्नत्रयधारिणो यतिवरास्तासां समालम्बनं,
तत्पूजा जिनवाचि पूजनमतः साक्षाज्जिनः पूजितः ॥'
[पद्म. पञ्च. १।६८] ॥६५॥

अथ ज्ञानतपसोः पृथक् समुदितयोश्च तद्वतां च पूज्यत्वे युक्तिमाह—

ज्ञानमर्च्यं तपोऽङ्गत्वात्तपोऽर्च्यं तत्परत्वतः ।
द्वयमर्च्यं शिवाङ्गत्वात्तद्वन्तोऽर्च्या यथागुणम् ॥६६॥

ज्ञानं साधकस्थं, तपः नैष्ठिकस्थम् । तत्परत्वतः—ज्ञानातिशयहेतुत्वात्, तत् ज्ञानं परममुत्कृष्टं यस्मादिति व्युत्पत्त्याश्रयणात् । द्वयं गणाधिपस्थम् । अत्राहुः श्रीसोमदेवपण्डिताः—

'भुक्तिमात्रप्रदाने तु का परीक्षा तपस्विनाम् ।
ते सन्तः सन्त्वसन्तो वा गृही दानेन शुद्धयति ॥
सर्वारम्भप्रवृत्तानां गृहस्थानां धनव्ययः ।
बहुधास्ति ततोऽत्यर्थं न कर्तव्या विचारणा ॥
यथा यथा विशिष्यन्ते तपोज्ञानादिभिर्गुणैः ।
तथा तथाधिकं पूज्या मुनयो गृहमेधिभिः ॥
दैवाल्लब्धं धनं धन्यैर्वप्तव्यं समयाश्रिते ।
एको मुनिर्भवेल्लभ्यो न लभ्यो वा यथागमम् ॥
उच्चावचजनः प्रायः समयोऽयं जिनेशिनाम् ।
नैकस्मिन् पुरुषे तिष्ठेदेकस्तम्भ इवालयः ॥
ते नाम स्थापनाद्रव्यभावन्यासैश्चतुर्विधाः ।
भवन्ति मुनयः सर्वे दानमानादिकर्मसु ॥
उत्तरोत्तरभावेन विधिस्तेषु विशिष्यते ।
पुण्यार्जने गृहस्थानां जिनप्रतिकृतिष्विव ॥' [सो. उपा., ८१८-८२४]

विशेषार्थ—शुभ भावसे पुण्यबन्ध और अशुभ भावसे पापबन्ध होता है यह सब जानते हैं। अतः मुनियोंके प्रति यदि भाव खराब होते हों तो कलिकालमें जिनशासनको धारण करनेवाले ये मुनि जिनकी तरह मान्य हैं इस अनुराग भावसे अपने भावोंको उनके प्रति बिगड़नेसे रोकना चाहिए ॥६५॥

ज्ञान और तपके पृथक्-पृथक् तथा सम्मिलित रूपसे पूज्य होनेमें तथा ज्ञानी, तपस्वीके पूज्य होनेमें युक्ति देते हैं—

तपका कारण होनेसे ज्ञान पूज्य है और ज्ञानकी अतिशयका कारण होनेसे तप पूज्य है और मोक्षका कारण होनेसे ज्ञान और तप दोनों पूज्य हैं तथा ज्ञानी, तपस्वी और ज्ञान तथा तप दोनोंसे युक्त महात्माओंको जो-जो गुण जिसमें अधिक हो उस-उस गुणके कारण विशेष रूपसे पूजना चाहिए ॥६६॥

विशेषार्थ—ज्ञान और तप दोनों परस्परमें एक दूसरेके साधक हैं। यदि ज्ञानी न हों तो पूजा-प्रतिष्ठा, शास्त्रचर्चा वगैरह बन्द हो जाये। ज्ञानके होनेसे ही सम्यक् तप होता है,

अपि च—

'काले कलौ चले चित्ते देहे चान्नादिकीटके ।
एतच्चित्रं तदद्यापि जिनरूपधरा नराः ॥
यथा पूज्यं जिनेन्द्राणां रूपं लेपादिनिर्मितम् ।
तथा पूर्वमुनिच्छायाः पूज्याः संप्रति संयताः ॥' [सो. उपा., ७९६-७९७] ॥६६॥

अथ मिथ्यादृष्टेर्जघन्यादिपात्रत्रये कुपात्रे चान्नदानात् सद्दृष्टेश्च सुपात्रेष्वेवान्नदानादुत्पन्नपुण्यस्य फलविशेषमपात्रे चार्थविनियोगस्य वैयर्थ्यं प्रतिपादयितुमाह—

न्यग्मध्योत्तमकुत्स्यभोगजगती भुक्तावशेषाद्वृषा-
त्तादृक्पात्रवितीर्णभुक्तिरसुदृग्देवो यथास्वं भवेत् ।
सद्दृष्टिस्तु सुपात्रदानसुकृतोद्रेकात्सुभुक्तोत्तम-
स्वर्भूमर्त्यपदोऽश्नुते शिवपदं व्यर्थस्त्वपात्रे व्ययः ॥६७॥

न्यगित्यादि—न्यङ् जघन्यः एकपल्योपमभोग्यत्वात् । मध्यः द्विपल्योपमभोग्यत्वादुत्तमस्त्रिपल्योपमभोग्यत्वात् । कुत्स्यः सुस्वादुमृत्पुष्पफलाशनवृत्तित्वादेकोरुकादिदेहयोगाच्च । न्यङ् च मध्यमश्चोत्तमश्च कुत्स्यश्च न्यङ्मध्योत्तमकुत्स्यास्ते च ते भोगाश्च न्यङ्मध्योत्तमकुत्स्यभोगास्तैरुपलक्षिता जगत्यो भूमयो जघन्यभोगभूमिर्मध्यमभोगभूमिरुत्तमभोगभूमिः कुभोगभूमिश्चेति चतस्रस्तासु भुक्ताः कल्पवृक्षादिसंपादितेष्टविषयोपभोगसुखेन निर्जीर्णश्चासाववशेषश्चोद्धृतो यो वृषः पुण्यविशेषस्तस्मात् । तादृक्पात्रवितीर्णभुक्तिः—तादृग्भ्यो न्यङ्मध्योत्तमकुत्स्येभ्यः पात्रेभ्यो वितीर्णा दत्ता भुक्तिराहारो येन स तथोक्तः । पात्रापात्रलक्षणं शास्त्रे यथा—

'उत्कृष्टपात्रमनगारमणुव्रताढ्यं
मध्यं व्रतेन रहितं सुदृशं जघन्यम् ।

ज्ञानके अभावमें तो केवल कायक्लेश होता है। इसी तरह ज्ञानाराधन स्वयं एक तप है। अन्तरंग तपके भेदोंमें स्वाध्यायको तप कहा है। तथा तपस्याके द्वारा ही केवल ज्ञानकी प्राप्ति होती है। तथा तप और ज्ञान दोनोंसे मुक्ति मिलती है इसलिए ज्ञान, तप, ज्ञानी तपस्वी ये सभी पूज्य हैं। सोमदेव सूरिने भी कहा है कि तपके बिना अकेला ज्ञान भी आदरके योग्य है, और ज्ञानके बिना अकेला तप भी पूज्य है। जिसमें ज्ञान तप दोनों होते हैं वह देवता है और जिसमें न ज्ञान है और न तप है वह तो केवल स्थान भरनेवाला है ॥६६॥

आगे मिथ्यादृष्टिके सुपात्रको ही आहारदान देनेसे उत्पन्न हुए पुण्यके फलकी विशेषता और अपात्र दानकी व्यर्थता बतलाते हैं—

जघन्य पात्र, मध्यम पात्र, उत्तम पात्र तथा कुपात्रको दान देनेवाला मिथ्यादृष्टि जघन्य भोगभूमि, मध्यम भोगभूमि उत्तम भोगभूमि, और कुभोगभूमिमें भोगनेसे बाकी बचे पुण्यसे यथायोग्य देव होता है। किन्तु सम्यग्दृष्टि सुपात्र दानसे होनेवाले पुण्यके उदयसे उत्तम भोगभूमि, महर्द्धिक कल्पवासी देव और चक्रवर्ती आदि पदोंको यथेष्ट भोगकर मोक्षपदको पाता है। परन्तु अपात्रको दान देना व्यर्थ है ॥६७॥

---

१. 'मान्यं ज्ञानं तपोहीनं ज्ञानहीनं तपोऽर्हितम् । द्वयं यत्र स देवः स्याद् द्विहीनो गणपूरणः ।'
—सो. उपा., ८१५ श्लो.

निर्दशनं व्रतनिकाययुतं कुपात्रं
युग्मोज्झितं नरमपात्रमिदं हि विद्धि ॥' [पद्म. पञ्च. २।४८]
'उत्तमपत्तं साहू मज्झिमपत्तं च सावया भणिया ।
अविरदसम्माइट्ठी जहण्णपत्तं मुणेयव्वं ॥' [ ]
'जं रयणत्तयरहियं मिच्छामय कहियधम्म अणुलग्गं ।
जइ विहु तवइ सुघोरं तहवि हु तं कुच्छियं पत्तं ॥
जस्स ण तवो ण चरणं न चावि जस्सत्थि वरगुणो को वि ।
तं जाणेह अपत्तं अफलं दाणं कयं तस्स ॥' [भावसं. ५३०।५३१]

आर्षे पुनः श्रेयो युवराजः पात्रापात्रलक्षणं भरतराजर्षिमन्वशीषत्—

'जघन्यं शीलवान्मिथ्यादृष्टिश्च पुरुषो भवेत् ।
सद्दृष्टिर्मध्यमं पात्रं निःशीलव्रतभावनः ॥
सद्दृष्टिः शीलसंपन्नः पात्रमुत्तममिष्यते ।
कुदृष्टिर्यो विशीलश्च नैव पात्रमसौ मतः ॥
कुमानुषत्वमाप्नोति जन्तुर्ददद‍पात्रके ।
अशोधितमिवालाम्बु तद्धि दानं विदूषयेत् ॥' [महापु. २०।१४०-१४२]

यथास्वं—यद्यत्स्वमात्मीयं दानं तत्तदनतिक्रमेणेत्यर्थः । तत्र मिथ्यादृष्टिर्जघन्यपात्रायाहारदानं दत्वा जघन्यभोगभूमौ निरातंकभोगान् भुक्त्वा स्वायुःक्षये यथाभाग्यं स्वर्गं गच्छेत् । तत्तत्पात्रसन्निधानात्तथाविधशुभपरिणामविशेषोपपत्त्या तादृक् पुण्यप्रचयानुभावात् । स एव च कुपात्राहारं दत्वा कुभोगभूमौ निर्भूषण-विवस्त्र-गुहा-वृक्षमूलनिवास्यैकोरुकादिशरीरो भूत्वा स्वसमानपत्न्या सह यथास्वं निराबाधतया भोगं भुक्त्वा पल्योपमात्रस्वायुःक्षये मृत्वा स्वर्गे वाहनदेवो वा ज्योतिष्को वा व्यन्तरो वा भवनवासी वा भूत्वा दीर्घं दुर्गतिदुःखानि भुञ्जानः संसरति । किञ्च, ये भोगभूमिषु ये च मानुषोत्तरपर्वताद् बहिः प्राक् च स्वयंप्रभपर्वतात्तिर्यञ्चो, ये च म्लेच्छराजगजतुरगादयो वेश्यादयो वा नीचात्मानो भोगभाजो दृश्यन्ते ते सर्वे कुपात्रदानतो यथापरिणाममुत्पन्नेन मिथ्यात्वसहचारिणा पुण्येन तथा स्युरिति निर्णयः । उक्तं च—

विशेषार्थ—मुनिको उत्तम पात्र, अणुव्रती श्रावकको मध्यम पात्र, सम्यग्दृष्टिको जघन्य पात्र, सम्यग्दर्शनसे रहित व्रतीको कुपात्र तथा सम्यग्दर्शन और व्रतसे रहितको अपात्र कहते हैं। अमितगति आचार्यने अपने श्रावकाचार (११।५-१८) में उत्तम पात्रका स्वरूप विस्तारसे बतलाते हुए लिखा है—वह जीवस्थान, गुणस्थान और मार्गणास्थानके भेदोंको जानकर जीवोंकी रक्षा करता है। सूर्यकी तरह परोपकारमें तत्पर रहता है, हितमित वचन बोलता है। परधनको निर्माल्यकी तरह मानता है। दाँत साफ करनेके लिए तिनका तक नहीं उठाता। पशु, मनुष्य, देव और अचेतनके भेदसे चार प्रकारकी नारियोंसे ऐसे दूर रहता है मानो वे महामारी हैं। प्रासुक मार्गसे चार हाथ भूमि देखकर जीवोंकी रक्षा करते हुए गमन करता है। छियालीस दोषोंको टालकर नवकोटिसे विशुद्ध आहार करता है और सरस तथा विरस आहारमें समान बुद्धि रखता है। प्रत्येक वस्तुको सावधानीके साथ रखता तथा उठाता है। किसीको बाधा न पहुँचाते हुए प्रासुक तथा गुप्त स्थानमें मल-मूत्र करता है। चंचल चित्तको वशमें रखता है। कर्मोंके क्षयके लिए कायोत्सर्ग करता है। कृत्य और अकृत्यको जानता है। इस प्रकार जो सम्यक् रूपसे व्रत, समिति और गुप्तिको पालता है वह उत्तम

'कुच्छियपत्ते किंचिवि फलइ कुदेवेसु कुणरतिरिएसु ।
कुच्छियभोयधरासु य लवणंबुहि कालउयहीसु ॥
एए णरा पसिद्धा तिरिया य हवंति भोगभूमीसु ।
मणुसुत्तरवहिरेसु य असंखदीवेसु ते हुंति ॥
सव्वे मदंकसाया सव्वे निस्सेसवाहि परिहीणा ।
मरिऊण वितरा वि हु जोइसभवणेसु जायंति ॥
तत्थ चुया पुण संता तिरियणरा पुण हवंति ते सव्वे ।
काऊण तत्थ पावं पुणो वि णिरयावहा हुंति ॥
चंडाल भिल्ल छिप्पय लोलय कल्लाल एवमाईणि ।
दीसंति रिद्धिपत्ता कुच्छियपत्तस्स दाणेण ॥
केई पुण गयतुरया गेहे रायाण उण्णई पत्ता ।
दीसंति पच्च लोए कुच्छियपत्तस्स दाणेण ॥
केई पुण दिवलोए उववण्णा वाहणत्तणे मणुया ।
सोयंति जायदुःखा पिच्छिय रिद्धि सुदेवाणं ॥' [भावसं. ५३३, ५४०-५४५]

स्वर्भुवः—कल्पोपपन्नदेवाः । उक्तं च—

'पात्राय विधिना दत्वा दानं मृत्वा समाधिना ।
अच्युतान्तेषु कल्पेषु जायन्ते शुद्धदृष्टयः ॥
ज्ञात्वा धर्मप्रसादेन तत्र प्रभवमात्मनः ।
पूजयन्ति जिनार्चास्ते भक्त्या धर्मस्य वृद्धये ॥
सुखवारिधिमग्नास्ते सेव्यमानाः सुधाशिभिः ।
सर्वदा व्यवतिष्ठन्ते प्रतिबिम्बैरिवात्मनः ॥
नवयौवनसम्पन्ना दिव्यभूषणभूषिताः ।
ते वरेण्याद्यसंस्थाना जायन्तेऽन्तर्मुहूर्ततः ॥

पात्र है। जो एकसे लेकर ग्यारह तक प्रतिमा पालता है वह मध्यम पात्र है। निर्मल सम्यग्दृष्टि, जिसे जन्म-जरा-मरण आदिका भय नहीं सताता, संसार, शरीर और भोगोंसे विरक्त रहता है, निरन्तर अपनी निन्दा-गर्हा करता है, आत्मतत्त्व और परतत्त्वके विचारसे पण्डित है, किन्तु व्रताचरणकी ओर उत्सुक नहीं है वह जघन्य पात्र है। जो कठोर आचरण करता है, परोपकारी है, असत्य और कठोर वचन नहीं बोलता, धन-स्त्री परिग्रहसे निस्पृह है, कषाय और इन्द्रियोंका जयी है परन्तु घोर मिथ्यात्वसे युक्त है वह कुपात्र है। जो घोर मिथ्यात्वी होनेके साथ व्रतशील संयमसे भी रहित है वह अपात्र है। जैसे पात्रके चार भेद हैं वैसे ही भोगभूमिके भी उत्कृष्ट मध्यम आदि चार प्रकार हैं। दान देनेवाला यदि मिथ्यादृष्टि है, वह यदि जघन्य पात्र सम्यग्दृष्टिको दान देता है तो मरकर जघन्य भोगभूमिमें जन्म लेता है, यदि सम्यक्त्व और अणुव्रत सहित मध्यम पात्रको दान देता है तो मध्यम भोगभूमिमें जन्म लेता है। यदि सम्यग्दर्शन और महाव्रतसे भूषित उत्तम पात्रको दान देता है तो उत्तम भोगभूमिमें जन्म लेता है और वहाँ निर्बाध भोगोंको भोगकर अपनी आयु क्षय होनेपर यथायोग्य देव होता है। इसका कारण यह है कि जैसे पात्रको वह दान देता है उसी प्रकार के शुभ परिणाम होनेसे उसी जातिके पुण्यका बन्ध करता है। वही यदि सम्यक्त्वसे रहित

तेषां खेदमलस्वेदजरारोगादिवर्जिताः ।
जायन्ते भासुराकाराः स्फाटिका इव विग्रहाः ॥
निधुवनकुशलाभिः पूर्णचन्द्राननाभिः
स्तनभरनमिताभिर्मन्मथाध्यासिताभिः ।
पृथुतरजघनाभिर्बन्धुराभिर्वधूभिः
सममलवचोभिः सर्वदा ते रमन्ते ॥'
[अमि. श्रा. ११।१०२, ११२, ११३, ११६, ११७, १२०]

बद्धायुष्का मानुषास्तथा तिर्यञ्चोऽपि पात्रदानानुमोदनया अवश्यमुत्तमभोगभूमिषूत्पद्यन्ते । यदाह—

'बद्धाउया सुदिट्ठी मणुया अणुमोयणेण तिरिया वि ।
णियमेणुववज्जंते ते उत्तमभोगभूमीसु ॥' [वसु. श्रा. २४९ गा.]
'दिवोऽवतीर्योर्जितचित्तवृत्तयो महानुभावा भुवि पुण्यशेषतः ।
भवन्ति वंशेषु बुधार्चितेषु ते विशुद्धसम्यक्त्वधरा नरोत्तमाः ॥
अवाप्यते चक्रधरादिसम्पदं मनोरमामत्र विपुण्यदुर्लभाम् ।
नयन्ति कालं निखिलं निराकुला न लभ्यते किं खलु पात्रदानतः ॥
निषेव्य लक्ष्मीमिति शर्मकारिणीं प्रथीयसीं द्वित्रिभवेषु कल्मषम् ।
प्रदह्यते ध्यानकृशानुनाखिलं श्रयन्ति सिद्धि विदु.... पदं सदा ॥
विधाय सप्ताष्टभवेषु वा स्फुटं जघन्यतः कल्मषकक्षकर्तनम् ।
व्रजन्ति सिद्धि मुनिदानवासिता व्रतं चरन्तो जिननाथभाषितम् ॥' [ ]

किन्तु व्रत और तपसे युक्त कुपात्रको दान देता है तो कुभोगभूमिमें भूषण-वस्त्र रहित, गुफा या वृक्षके मूलमें निवास करनेवाला कुमनुष्य होकर अपने ही समान पत्नीके साथ यथायोग्य बाधा रहित भोगोंको भोगकर एक पल्य प्रमाण आयुके क्षय होनेपर मरकर वाहन जातिका देव, या ज्योतिष्क, या व्यन्तर, या भवनवासी देव होकर दीर्घ काल तक दुर्गतिके दुःखोंको भोगता हुआ संसारमें भ्रमण करता है। तथा कुभोगभूमियोंमें और मानुषोत्तर पर्वतसे बाहर तथा स्वयंप्रभ पर्वतसे पहले जो तिर्यंच पाये जाते हैं, तथा जो म्लेच्छ राजाओंके हाथी, घोड़े, वेश्या वगैरह नीच प्राणी भोग भोगते हुए पाये जाते हैं वे सब कुपात्र दानसे परिणामोंके अनुसार उत्पन्न हुए मिथ्यात्व सहचारी पुण्यके उदयसे होते हैं। सोमदेव सूरिने कहा है—जिनका चित्त मिथ्यात्वमें फँसा है और जो मिथ्या चारित्रको पालते हैं, उनको दान देना बुराईका ही कारण होता है। जैसे साँपको दूध पिलानेसे वह जहर ही उगलता है। ऐसे लोगोंको दयाभावसे या औचित्यवश कुछ दिया भी जाये तो जो अवशिष्ट भोजन हो वही दिया जावे, किन्तु घरपर न जिमाना चाहिए। जैसे विषैले भाजनके सम्बन्धसे जल भी विषैला हो जाता है वैसे ही इन मिथ्यादृष्टि साधुओंका सत्कार करनेसे श्रद्धान भी दूषित होता है। अतः कुपात्रको सम्यग्दृष्टि दान नहीं देता। वह तो सुपात्रको ही दान देता है। और महातपस्वियोंको या तीन प्रकारके पात्रोंको दिये गये दानसे होनेवाले पुण्यके उदयसे उत्तम भोगभूमिके सुख भोगकर महर्द्धिक कल्पवासी देवोंके सुख भोगता है फिर चक्रवर्ती आदि होकर मोक्ष प्राप्त करता है। आचार्य अमितगतिने अपने उपासकाचारमें विस्तारसे पात्रदानका वर्णन करते हुए लिखा है कि सम्यग्दृष्टि जीव विधिपूर्वक पात्रदान करके और समाधिपूर्वक मरण करके अच्युत पर्यन्त स्वर्गोंमें जन्म लेते हैं और वहाँ धर्मके प्रसादसे अपना जन्म हुआ

एतेन सद्दृष्टिना कुपात्राय न देयं देयं वा ...... विवशात् किञ्चिदुद्धृतमेवेत्युपदिष्टं स्यात् । तथा चोक्तम्—

'मिथ्यात्वग्रस्तचित्तेषु चारित्राभासभागिषु ।
दोषायैव भवेद्दानं पयःपानमिवाहिषु ॥
कारुण्यादथवौचित्यात्तेषां किञ्चिद्दिशन्नपि ।
दिशेदुद्धृतमेवान्नं गृहे भुक्तिं न कारयेत् ॥
सत्कारादिविधावेषां दर्शनं दूषितं भवेत् ।
यथा विशुद्धमप्यम्बु विषभाजनसंगमात् ॥'

किं च—

'शाक्य-नास्तिक-यागज्ञ-जटिलाजीविकादिभिः ।
सहावासं सहालापं तत्सेवां च विवर्जयेत् ॥
अज्ञानतत्त्वचेतोभिर्दुराग्रहमलीमसैः ।
युद्धमेव भवेद् गोष्ठ्यां दण्डादण्डि कचाकचि ॥
भयलोभोपरोधाद्यैः कुलिङ्गेषु निषेवणे ।
अवश्यं दर्शनं म्लायेन्नीचैराचरणे सति ॥
बुद्धिपौरुषयुक्तेषु दैवायत्तविभूतिषु
नृषु कुत्सितसेवायां दैन्यमेवातिरिच्यते ॥' [सो. उपा. ८०१-८०७]

जानकर भक्तिपूर्वक जिनदेवका पूजन करते हैं। किन्तु सम्यक्त्व और व्रतसे रहित अपात्रमें दान देना व्यर्थ है। अमितगतिने कहा है कि अपात्रदानसे पापके सिवाय दूसरा फल नहीं होता। बालूको पेरनेसे खेद ही हाथ आता है। जो उत्तम पात्रको छोड़कर अपात्रको धन देता है वह साधुको छोड़कर चोरको धन देता है। अतः अपात्रको पात्रबुद्धिसे दान नहीं देना चाहिए, दयाभावसे देनेमें कोई हानि नहीं है।

भावसंग्रहमें देवसेनाचार्यने लिखा है—जो रत्नत्रयसे रहित है, मिथ्याधर्ममें आसक्त है वह कितना भी घोर तप करे फिर भी वह कुपात्र है। जिसमें न तप है, न चारित्र है, न कोई उत्कृष्ट गुण है उसे अपात्र जानो। उसको दान देना व्यर्थ है। कुपात्रको दान देनेसे कुदेवोंमें, कुमनुष्योंमें, तिर्यंचोंमें, लवणसमुद्र, कालोदधि समुद्रवर्ती कुभोग भूमियोंमें जन्म होता है। या मानुषोत्तर पर्वतसे बाहर असंख्यात द्वीप समुद्रोंमें जन्म होता है। वे सब मन्द कषाय और समस्त आधिव्याधिसे रहित होते हैं। तथा वहाँसे मरकर व्यन्तर या ज्योतिषी देवोंमें उत्पन्न होते हैं। वहाँसे च्युत होकर वे सब तिर्यंच या मनुष्य होते हैं। और वहाँ पाप करके नरक जाते हैं। लोकमें जो चाण्डाल, भील, कलार, छीपी आदि धन सम्पन्न देखनेमें आते हैं यह सब कुपात्रदानका फल है। कुपात्रदानके फलसे कोई राजाओंके हाथी-घोड़े आदि होते हैं। कोई मनुष्य मरकर देवलोकमें वाहन जातिके देव होते हैं। वहाँ वे अन्य देवोंकी ऋद्धि देखकर दुःखी होते हैं।

यहाँ प्रसंगवश पल्यका स्वरूप कहते हैं—पल्यके तीन भेद हैं—व्यवहार पल्य, उद्धार पल्य, अद्धापल्य। ये सब नाम सार्थक हैं। प्रथमका नाम व्यवहारपल्य है क्योंकि वह आगेके दो पल्योंके व्यवहारका बीज है। इससे कुछ अन्य नहीं मापा जाता। दूसरेका नाम उद्धार पल्य है क्योंकि उससे उद्धृत (निकाले गये) रोमच्छेदोंसे द्वीप समुद्रोंकी गणना की जाती है।

व्यर्थः—विपरीतफलो निष्फलो वा। यदाह—

'अपात्रदानतः किंचिन्न फलं पापतः परम्।
लभ्यते हि फलं खेदो बालुकापुञ्जपेषणे ॥
विश्राणितमपात्राय विधत्तेऽनर्थमूर्जितम्।
अपथ्यभोजनं दत्ते व्याधिं किं न दुरुत्तरम् ॥
अपात्राय धनं दत्ते यो हित्वा पात्रमुत्तमम्।
साधुं विहाय चौराय तदर्पयति स स्फुटम् ॥' [अमि. श्रा. ११।९०, ९१, ९७]

अथ किं पल्योपममिति चेद् भ्रमः (?)—पल्यं त्रिविधं व्यवहारपल्यमुद्धारपल्यमद्धापल्यमिति। अन्वर्थसंज्ञा एताः। आद्यं व्यवहारपल्यमित्युच्यते उत्तरपल्यव्यवहारबीजत्वात्। नानेन किंचित् परिच्छेद्यमस्ति। द्वितीयमुद्धारपल्यं, तत उद्धृतै लोमच्छेदैः द्वीपसमुद्राः संख्यायन्त इति। तृतीयमद्धापल्यं, अद्धा कालस्थितिरित्यर्थः। तत्राद्यस्य प्रमाणं कथ्यते तत्परिच्छेदार्थत्वात्तद्यथा—

प्रमाणाङ्गुलपरिमितयोजनविष्कम्भायामावगाहानि त्रीणि पल्यानि कुसूला इत्यर्थः। एकादिसप्तान्ताहोरात्रजाताविबालाग्राणि तावच्छिन्नानि यावद् द्वितीयं कर्तरीच्छेदं नाप्नुवन्ति। तादृशैर्लोमच्छेदैः परिपूर्णं घनीकृतं व्यवहारपल्यमित्युच्यते। ततो वर्षशते वर्षशते एकैकलोमापकर्षणविधिना यावता कालेन तद्रिक्तं भवेत्तावत्कालो व्यवहारपल्योपमाख्यः। तैरेव रोमच्छेदैः प्रत्येकमसंख्येयवर्षकोटिसमयमात्रच्छिन्नैस्तत्पूर्णमुद्धारपल्यम्। ततः समये समये एकैकस्मिन् रोमच्छेदेऽपकृष्यमाणे यावता कालेन तद्रिक्तं भवति तावत्काल उद्धारपल्योपमाख्यः। एषामुद्धारपल्यानां दशकोटीकोट्य एकमुद्धारसागरोपमम्। अर्धतृतीयोद्धारसागरोपमानां यावन्तो रोमच्छेदास्तावन्तो द्वीपसमुद्राः। पुनरुद्धारपल्यरोमच्छेदैर्वर्षशतसमयमात्रच्छिन्नैः पूर्णमद्धापल्यम्। ततः समये समये एकैकस्मिन् रोमच्छेदेऽपकृष्यमाणे यावता कालेन तद्रिक्तं भवति तावत्कालोऽद्धापल्योपमाख्यः। एषामद्धापल्यानां दशकोटीकोट्य एकमद्धासागरोपमम्। दशाद्धासागरोपमकोटीकोट्य एकावसर्पिणी। तावत्येवोत्सर्पिणी। अनेनाद्धापल्येन नारकतैर्यग्योनानां देवमनुष्याणां च कर्मस्थितिर्भवस्थितिरायुःस्थितिः कायस्थितिश्च परिच्छेत्तव्या।'—[सर्वार्थसि. ३।३८] ॥६७॥

तीसरा अद्धापल्य है। अद्धाका अर्थ कालस्थिति है। पहले पल्यका प्रमाण कहते हैं—प्रमाणांगुलसे नापे गये योजन प्रमाण लम्बे-चौड़े-गहरे तीन पल्य अर्थात् गड्ढे करो। एक दिनसे सात दिन तकके जन्मे मेढ़ेके बालोंके अग्रभागको इतना काटो कि पुनः उन्हें कैंचीसे न काटा जा सके। पहले गढेको उनसे खूब ठोस रूपसे भर दो। उसे व्यवहारपल्य कहते हैं। सौ-सौ वर्षमें एक-एक बाल निकालनेपर जितने समयमें वह खाली हो उतने कालको व्यवहार पल्योपम कहते हैं। व्यवहार पल्यके प्रत्येक रोमके उतने खण्ड कल्पनासे करो जितने असंख्यात कोटिवर्षके समय होते हैं। और उन्हें दूसरे गड्ढेमें भर दो। उसे उद्धारपल्य कहते हैं। प्रति समय एक-एक रोम निकालनेपर जितने कालमें वह रिक्त हो उतने कालको उद्धार पल्योपम कहते हैं। दस कोड़ा-कोड़ी उद्धार पल्योंका एक उद्धार सागर होता है। अढ़ाई उद्धार सागरमें जितने रोम हों उतनी ही द्वीप समुद्रोंकी संख्या जानना। पुनः उद्धारपल्यके प्रत्येक रोमके उतने खण्ड करो जितने सौ वर्षके समय होते हैं और उन्हें तीसरे गढ़ेमें भर दो उसे अद्धापल्य कहते हैं। प्रतिसमय एक-एक रोमखण्ड निकालनेपर जितने समयमें वह रिक्त हो उतने कालको अद्धा पल्योपम कहते हैं। दस कोड़ा-कोड़ी अद्धा पल्योंका एक अद्धा सागर होता है। दस कोड़ा-कोड़ी अद्धा सागरोपम कालकी एक अवसर्पिणी होती है और उतनी ही

अथ पात्रदानपुण्योदयफलभाजां भोगभूमिजानां जन्मप्रभृति सप्ताहसप्तकभाविनीरवस्था निर्देष्टुमाह—

सप्तोत्तानशया लिहन्ति दिवसान्स्वाङ्गुष्ठमार्यास्ततः
कौ रिङ्गन्ति ततः पदैः कलगिरो यान्ति स्खलद्भिस्ततः ।
स्थेयोभिश्च ततः कलागुणभृतस्तारुण्यभोगोद्गताः
सप्ताहेन ततो भवन्ति सुदृगादानेऽपि योग्यास्ततः ॥६८॥

आर्याः—भोगभूमिजाः । कौ—भूमौ । रिङ्गन्ति—पद्भ्यां विना सर्पन्ति । कलाः—गीताद्याः । गुणाः—लावण्याद्याः । सुदृगादाने—सम्यक्त्वग्रहणे ।

उक्तं च—

'तदा स्त्रीपुंसयुग्मानां गर्भविलुंठितात्मनाम् ।
दिनानि सप्त गच्छन्ति निजाङ्गुष्ठावलेहनैः ॥
रिङ्गतामपि सप्तैव सप्तास्थिरपरिक्रमैः ।
स्थिरैश्च सप्त तैः सप्त कलासु च गुणेषु च ॥
सप्तभिश्च दिनैस्ते स्युः सम्पूर्णनवयौवनाः ।
सम्यक्त्वग्रहणेऽपि स्युर्योग्यास्ते सप्तभिर्दिनैः ॥' [ ] ॥६८॥

अथ मुनिदेयनिर्णयार्थमाह—

उत्सर्पिणी होती है। इस अद्धापल्यसे नारकी, तिर्यंच, मनुष्य और देवोंकी कर्मस्थिति, भवस्थिति, आयुस्थिति और कायस्थिति ज्ञात होती है ॥६७॥

अब पात्रदानके पुण्यसे भोगभूमिमें जन्म लेनेवाले जीवोंकी जन्मसे लेकर सात सप्ताह तक होनेवाली अवस्थाको बतलाते हैं—

भोगभूमिमें जन्म लेनेवाले मनुष्य जन्मके अनन्तर सात दिन तक ऊपरको मुख करके सोते हुए अपने अँगूठेको चूसते हैं। प्रथम सप्ताहके अनन्तर सात दिन तक पृथ्वीपर रेंगते हैं। द्वितीय सप्ताहके अनन्तर सात दिन तक मनोहर वाणी बोलते हुए गिरते-पड़ते चलते हैं। तीसरे सप्ताहके अनन्तर सात दिन तक स्थिर पैरोंसे चलते हैं। चतुर्थ सप्ताहके अनन्तर सात दिनोंमें कला, गीत आदि गुणों और लावण्य आदिको धारण कर लेते हैं। पंचम सप्ताहके अनन्तर सात दिनोंमें युवा होकर भोगोंको भोगनेमें समर्थ हो जाते हैं। और छठे सप्ताहके अनन्तर सात दिनोंमें सम्यक्त्व ग्रहण करनेके योग्य हो जाते हैं ॥६८॥

विशेषार्थ—भोगभूमिमें दस प्रकार कल्पवृक्षोंसे मनुष्योंको भोग-उपभोगके सब पदार्थ प्राप्त होते हैं इसीसे उसे भोगभूमि कहते हैं। भोगभूमिमें नगर, ग्राम, राजा, कुल, शिल्प, कृषि आदि षट्कर्म, वर्ण आश्रम आदि नहीं होते। रात-दिनका भेद, सर्दी, परस्त्री रमण, परधन हरण आदि नहीं होते। परिवारमें स्त्री और पुरुष दो ही होते हैं। नौमास आयु शेष रहनेपर स्त्रीके गर्भ रहता है और मृत्युका समय आनेपर युगल बालक-बालिका जन्म देकर पुरुष छींकसे और स्त्री जँभाईके आनेसे मर जाते हैं। उत्कृष्ट भोगभूमिमें अँगूठा चूसने आदिमें तीन-तीन दिन लगते हैं। मध्यम भोगभूमिमें पाँच-पाँच दिन और जघन्य भोगभूमिमें सात-सात दिन लगते हैं। इस तरह उत्कृष्ट भोगभूमिमें २१ दिनमें, मध्यम भोगभूमिमें ३५ दिनमें और जघन्य भोगभूमिमें ४९ दिनमें वे युगल बालक-बालिका युवा होकर सम्यक्त्व ग्रहणके योग्य हो जाते हैं। और परस्परमें रमण करते हैं ॥६८॥

आगे मुनियोंको क्या देना चाहिए, इसका निर्णय करते हैं—

तपः श्रुतोपयोगीनि निरवद्यानि भक्तितः ।
मुनिभ्योऽन्नौषधावासपुस्तकादीनि कल्पयेत् ॥६९॥

निरवद्यानि—उद्गमादिदोषरहितानि । पुस्तकादीनि आदिशब्देन पिच्छिकाकमण्डल्वादीनि । कल्पयेत्—उपकारयेत् ॥६९॥

अथान्नादिदानफलानां क्रमेण निदर्शनान्याह—

भोगित्वाद्यन्तशान्तिप्रभुपदमुदयं संयतेऽन्नप्रदाना-
च्छ्रीषेणो रुग्निषेधाद्धनपतितनया प्राप सर्वौषधर्द्धिम् ।
प्राक्तज्जन्मर्षिवासावनशुभकरणात्शूकरः स्वर्गमग्र्यं-
कौण्डेशः पुस्तकार्चावितरणविधिनाऽप्यागमाम्भोधिपारम् ॥७०॥

भोगित्वाद्यन्तशान्तिप्रभुपदं—भोगित्वमुत्तमभोगभूमिजत्वमाद्यावन्ते च शान्तिप्रभोः शान्तिनाथतीर्थंकरस्य पदं यस्य । अन्नप्रदानात्—बीजत्वमात्रविवक्षात्र । तथाविधाभ्युदयस्योत्तरोत्तरपुण्यविशेषोदयसंपाद्यत्वात् । श्रीषेणः—स एव राजा । रुग्निषेधात्—व्याधिप्रतीकारादौषधादेः । धनपतितनया—वृषभसेनाभिधाना, पूर्वभवे राज्ञो देवकुलस्य संमार्जिका । प्राक्तज्जन्मनोः—पूर्वभवे च शुभकरणात् मुनिरक्षाभिप्रायेण शुभाभिसन्धिपरिणामात् । अग्र्यं—सौधर्मे महर्द्धिकदेवत्वमित्यर्थः । कौण्डेशः—गोविन्दाख्यगोपालचरो ग्रामकूटपुत्रः सन् कौण्डेशो नाम मुनिः ॥७०॥

मुनियोंको भक्तिपूर्वक तप और श्रुतज्ञानमें उपयोगी तथा अनगार धर्मामृतके पिण्डशुद्धि नामक अध्यायमें कहे गये उद्गम उत्पादन आदि दोषोंसे रहित, आहार, औषध, वसतिका और पुस्तक आदि देना चाहिए। आदि शब्दसे पीछी-कमण्डलु आदि आते हैं ॥६९॥

आगे क्रमसे आहार आदि दानका फल कहते हैं—

मुनियोंको विधिपूर्वक आहार देनेसे राजा श्रीषेण मरकर प्रारम्भमें उत्तम भोगभूमिमें उत्पन्न हुआ और अन्तमें शान्तिनाथ नामक सोलहवें तीर्थंकरके पदको प्राप्त हुआ। धनपति सेठकी पुत्री रोग दूर करनेके लिए औषधदान देनेसे समस्त औषधोंकी ऋद्धिको प्राप्त हुई। पूर्व जन्ममें मुनियोंको आवास देनेके शुभ परिणामसे और उस जन्ममें मुनियोंकी रक्षा करनेके शुभ परिणामसे शूकर सौधर्म स्वर्गमें महर्द्धिक देव हुआ। और कौण्डेश मुनि शास्त्रोंकी पूजा और दान करनेसे द्वादशांग श्रुतके पारको प्राप्त हुए ॥७०॥

विशेषार्थ—रत्नकरण्ड श्रावकाचारमें दानके चार भेदोंके उक्त चार उदाहरण दिये हैं।[1] तदनुसार पं. आशाधरजीने भी दिये हैं। राजा श्रीषेणने अर्ककीर्ति और अमितगति नामक दो चारण मुनियोंको आहार दिया था। उस दानसे होनेवाले पुण्यबन्धके फलस्वरूप राजा श्रीषेणने मरकर भोगभूमिमें जन्म लिया। फिर वे अन्तमें शान्तिनाथ तीर्थंकर हुए। यद्यपि वे उसी पुण्यसे तीर्थंकर नहीं हुए। किन्तु उत्तरोत्तर पुण्य विशेषसे तीर्थंकर हुए। तथापि उसका बीज आहारदान था। औषधदानमें वृषभसेनाका उदाहरण उल्लेखनीय है। वृषभसेना धनपति सेठकी पुत्री थी। उसके स्नानके जलसे प्राणियोंकी शारीरिक व्याधि दूर हो जाती थी। एक मुनिराजसे इसका कारण पूछनेपर उन्होंने बतलाया कि पूर्वजन्ममें इसने औषध-

---

१. 'श्रीषेणवृषभसेने कौण्डेशः सूकरश्च दृष्टान्ताः ।
वैयावृत्यस्यैते चतुर्विकल्पस्य मन्तव्याः' ॥—रत्न. श्रा., ११८ श्लो. ।

अथ जिनधर्मानुबन्धार्थमसतां मुनीनामुत्पादने सतां च गुणातिशयसम्पादने प्रयत्नविधापनार्थमाह—

जिनधर्मं जगद्बन्धुमनुबद्धुमपत्यवत् ।
यतीञ्जनयितुं यस्येत्तथोत्कर्षयितुं गुणैः ॥७१॥

यस्येत्—प्रयतेत गृही । गुणैः—श्रुतज्ञानादिभिः ॥७१॥

अथ संप्रति पुरुषाणां दुष्कर्मगुरुत्वाद् गुणातिशयसिद्धयदर्शनात्तदुत्पादने निष्फलः प्रयत्न इति गृहिणां मनोभङ्गनिषेधार्थमाह—

श्रेयो यत्नवतोऽस्त्येव कलिदोषाद् गुणद्युतौ ।
असिद्धावपि तत्सिद्धौ स्वपरानुग्रहो महान् ॥७२॥

कलिः—पञ्चमकालः पापकर्म वा । गुणद्युतौ—गुणातिशयशालिनां विषये । यत्नवतः—श्रावकस्य । तेषामसिद्धावपि इत्यावृत्या योज्यम् ॥७२॥

अथ महाव्रतमणुव्रतं वा बिभ्रत्यः स्त्रियोऽपि धर्मपात्रतयानुग्राह्या इति समर्थयितुमाह—

दान किया था। उसीके फलस्वरूप इसे यह ऋद्धि प्राप्त हुई है। तीसरे आवासदानमें एक शूकरका नाम उल्लेखनीय है। मालवदेशमें एक कुम्भकार और एक नाईने एक वसतिका बनवायी। कुम्भकारने उसमें एक मुनिको ठहराया और नाई एक संन्यासीको ले आया। दोनोंने मिलकर मुनिको बाहर निकाल दिया। इसपर कुम्भकार और नाईकी लड़ाई हुई। कुम्भकार मरकर शूकर हुआ और नाई व्याघ्र। एक बार जिस गुफामें शूकर रहता उसी गुफामें दो मुनि आकर ठहरे। व्याघ्र मनुष्यकी गन्ध पाकर आया तो शूकर गुफाके द्वारपर उससे भिड़ गया और मरकर स्वर्गमें देव हुआ। शास्त्रदानके फलसे कौण्डेश मुनि शास्त्र पारगामी हुए। पूर्वजन्ममें उसे वनमें वृक्षके एक कोटरमें एक शास्त्र मिला। वह शास्त्र उसने एक मुनिको भेंट किया और उसकी पूजा करता रहा। मरकर वह उसी ग्रामके स्वामीका पुत्र हुआ। बड़ा होनेपर उसे पूर्वजन्मका स्मरण हुआ। मुनिदीक्षा लेकर वह कौण्डेश नामसे प्रसिद्ध जैनाचार्य हुआ। अतः चारों प्रकारका दान करना उचित है ॥७०॥

आगे कहते हैं कि जिनधर्मकी परम्परा चालू रखनेके लिए नवीन मुनियोंको उत्पन्न करनेका और विद्यमान मुनियोंके गुणोंमें विशेषता लानेका प्रयत्न करना चाहिए—

जैसे गृहस्थ अपने वंशकी परम्परा चलानेके लिए सन्तान उत्पन्न करता है और उसे गुणी बनानेका प्रयत्न करता है उसी तरह उसे लोकोपकारी जैनधर्मकी परम्पराको चालू रखनेके लिए नवीन मुनियोंको उत्पन्न करनेका और वर्तमान मुनियोंको श्रुतज्ञान आदिसे उत्कृष्ट बनानेका प्रयत्न करना चाहिए ॥७१॥

'आजकल पुरुषोंके दुष्कर्म बढ़ते जाते हैं, उनके गुणोंमें कोई उन्नति नहीं देखी जाती, अतः उसके उत्पन्न करनेका प्रयत्न निष्फल है' गृहस्थोंके इस प्रकारके निरुत्साहका निषेध करते हैं—

पंचमकालके अथवा पापकर्मके दोषसे मुनियोंके गुणोंमें विशेषता लानेके प्रयत्नके सार्थक नहीं होनेपर भी जो प्रयत्न करता है, उसका कल्याण अवश्य होता है। और यदि उसमें सफलता मिलती है तो उस प्रयत्नके करनेवाले मनुष्यका तथा साधर्मिजनों और जन-साधारणका महान् लाभ है ॥७२॥

महाव्रत अथवा अणुव्रतका पालन करनेवाली स्त्रियाँ भी धर्मपात्र होनेसे पात्रदानके योग्य हैं, इसका समर्थन करते हैं—

आर्यिकाः श्राविकाश्चापि सत्कुर्याद् गुणभूषणाः ।
चतुर्विधेऽपि सङ्घे यत्फलत्युप्तमनल्पशः ॥७३॥

स्पष्टं ॥७३॥

एवं धर्मपात्रानुग्रहं गृहस्थस्यावश्यकार्यतयोपदिश्य सम्प्रति कार्यपात्रानुग्रहविध्युपदेशार्थमाह—

धर्मार्थकामसध्रीचो यथौचित्यमुपाचरन् ।
सुधीस्त्रिवर्गसंपत्त्या प्रेत्य चेह च मोदते ॥७४॥

सध्रीचः—सहायान् ॥७४॥

एवं समदत्तिं पात्रदत्तिं च प्रबन्धेनाभिधायेदानीं दयादत्तिं विधेयतमत्वेनोपदिशन्नाह—

सर्वेषां देहिनां दुःखाद् बिभ्यतामभयप्रदः ।
दयार्द्रो दातृधौरेयो निर्भीः सौरूप्यमश्नुते ॥७५॥

दातृधौरेयः—अन्नादिदातृणामग्रणीः । यदाह—

'तेनाधीतं श्रुतं सर्वं तेन तप्तं परं तपः ।
तेन कृत्स्नं कृतं दानं यः स्यादभयदानवान् ॥' [सो. उपा. ७७५]

अपि च—

'धमार्थकाममोक्षाणां जीवितं मूलमिष्यते ।
तद्रक्षता न किं दत्तं हरता तन्न किं हृतम् ॥' [अमि. श्रा. ११।२]

श्रुत-तप-शील आदि गुणोंसे सुशोभित उपचरित महाव्रतकी धारी आर्यिकाओं और यथाशक्ति मूलगुण और उत्तर गुणोंकी धारी श्राविकाओंको तथा 'अपि' शब्दसे गुणभूषित किन्तु व्रतरहित नारियोंका भी गृहस्थको विनय आदि पूर्वक सत्कार करना चाहिए। क्योंकि मुनि, आर्यिका, श्रावक-श्राविकाके भेदसे चतुर्विध संघमें दिया गया ज्ञान बहुत फल देता है ॥७३॥

विशेषार्थ—आशय यह है कि जिनबिम्ब, जिनालय और जिनवाणीमें व्यय किया गया धन ही बहुफल दायक नहीं होता, किन्तु चतुर्विध संघमें दिया गया दान भी बहु फल-दायक होता है। इस तरह गृहस्थके धन खर्च करनेके लिए ये सात स्थान जानने चाहिए ॥७३॥

इस प्रकार धर्मपात्रोंपर अनुग्रह करना गृहस्थका आवश्यक कर्तव्य बतलाकर अब कार्यपात्रोंपर अनुग्रह करनेका उपदेश देते हैं—

धर्म, अर्थ और काममें सहायकोंका यथायोग्य उपकार करनेवाला बुद्धिशाली गृहस्थ इस लोकमें और परलोकमें धर्म, अर्थ और कामरूप सम्पदासे सम्पन्न होकर आनन्दित होता है ॥७४॥

विशेषार्थ—जो धर्ममें सहायक ज्ञानी तपस्वीजन हैं, अर्थमें सहायक मुनीम गुमाश्ते हैं और काममें सहायक पत्नी है, इन सभीका यथायोग्य सत्कार करनेसे गृहस्थाश्रम सानन्द रहता है ॥७४॥

इस प्रकार समदत्ति और पात्रदत्तिको विस्तारसे कहनेके बाद अब दयादत्तिको अवश्य करणीय कहते हैं—

शारीरिक और मानसिक दुःखसे डरनेवाले सब प्राणियोंको अभयदान देनेवाला दयालु अन्न आदिका दान देनेवालोंमें अग्रणी होता है तथा वह सब ओरसे भयरहित होकर सौरूप्यको प्राप्त होता है ॥७५॥

'दानमन्यद्भवेन्मा वा नरश्चेदभयप्रदः ।
सर्वेषामेव दानानां यतस्तद्दानमुत्तमम् ॥' [सो. उपा. ७७४]
'यो भूतेष्वभयं दद्यात् भूतेभ्यस्तस्य नो भयम् ।
यादृग्वितीर्यते दानं तादृगभ्यास्यते फलम् ॥' [ ]

सौरूप्यं । उक्तं च—

'मनोभूरिव कान्ताङ्गः सुवर्णाद्रिरिव स्थिरः ।
सरस्वानिव गम्भीरो विवस्वानिव भास्वरः ॥
आदेयः सुभगः सौम्यस्त्यागी भोगी यशोनिधिः ।
भवत्यभयदानेन चिरजीवी निरामयः ॥
तीर्थकृच्चक्रिदेवानां सम्पदो बुधवन्दिताः ।
क्षणेनाभयदानेन दीयन्ते दलितापदः ॥' [अमि. श्रा. ११।९-११] ॥७५॥
भृत्वाऽऽश्रितानवृत्याऽऽर्तान्कृपयाऽनाश्रितानपि ।
भुञ्जीताह्न्यम्बुभैषज्य-ताम्बूलैलादि निश्यपि ॥७६॥

आदिशब्देन जातिफलकर्पूरादिमुखवासनप्रायद्रव्यपरिग्रहः ॥७६॥

विशेषार्थ—सोमदेव सूरिने अभयदानकी प्रशंसा करते हुए कहा है—जिसने अभय दान दिया उसने समस्त शास्त्रोंका अध्ययन कर लिया, उत्कृष्ट तप तथा और सब दान दिया। यदि मनुष्यने अभयदान दिया तो वह अन्य दान देवे या न देवे। क्योंकि अभयदान सब दानोंमें श्रेष्ठ है। जो प्राणियोंको अभयदान देता है उसे प्राणियोंसे कोई भय नहीं रहता। ठीक ही है जैसा दान दिया जाता है वैसा ही फल प्राप्त होता है। आचार्य अमितगतिने कहा है—धर्म, अर्थ, काम और मोक्षका मूल जीवन है जिसने उसकी रक्षा की उसने क्या नहीं दिया और जिसने उसे हर लिया उसने क्या नहीं हर लिया। अभयदानसे कामदेवकी तरह सुन्दर शरीर, सुमेरु पर्वतकी तरह स्थिर, समुद्रकी तरह गम्भीर, सूर्यकी तरह प्रकाशमान तथा सौभाग्यशाली, सौम्य, त्यागी, भोगी, यशस्वी, नीरोग और चिरंजीवि होता है। अभयदानसे तीर्थंकर, चक्रवर्ती और देवोंकी विभूति क्षणमात्रमें प्राप्त होती है तथा आपत्तियाँ दूर होती हैं ॥७५॥

पहले कहा था कि श्रावकको धर्म और यशके कार्य करना चाहिए। उसीका विस्तार करते हुए अपने आश्रितोंके भरण-पोषण और दया बुद्धिसे जो अपने आश्रित नहीं हैं उनका भी भरण-पोषण करनेकी प्रेरणा करते हुए दिनमें भोजनका उपदेश देते हैं—

जीविकाके न होनेसे दुःखी अपने आश्रित मनुष्यों और तिर्यंचोंको तथा दयाभावसे जो अपने आश्रित नहीं हैं उनका भरण-पोषण करके गृहस्थको दिनमें भोजन करना चाहिए। तथा रात्रिमें भी जल, औषधी, पान, इलायची आदि ले सकता है ॥७६॥

विशेषार्थ—यह कथन पाक्षिक श्रावकके लिए है। पाक्षिक श्रावकको चारों प्रकारका आहार तो दिनमें ही करना चाहिए, रात्रिमें केवल औषधि, जल और मुखको शुद्ध तथा सुवासित करनेवाले द्रव्य ही खाना चाहिए। केवल अन्न मात्र रात्रिमें न लेनेकी और उसके सिवाय अन्य सब कुछ खानेकी परम्परा आगमिक नहीं है, लौकिक है। किन्तु आज तो

१. 'ताम्बूलमौषधं तोयं मुक्त्वाऽऽहारादिकां क्रियाम् ।
प्रत्याख्यानं प्रदीयेत यावत्प्रातर्दिनं भवेत्' ॥ [ ]

सेव्यानामप्यर्थानां सेवायामसम्भवत्यां कालपरिच्छित्या प्रत्याख्येयतामुपदिश्य तत्प्रत्याख्यानं फलवत्तया समर्थयते—

यावन्न सेव्या विषयास्तावत्तानाप्रवृत्तितः ।
व्रतयेत्सव्रतो दैवान्मृतोऽमुत्र सुखायते ॥७७॥

स्पष्टम् ॥७७॥

अथ 'तपश्चर्यं च शक्तितः' इत्युक्तं तद्विशेषविधिमभिधत्ते—

पञ्चम्यादिविधिं कृत्वा शिवान्ताभ्युदयप्रदम् ।
उद्योतयेद्यथासंपन्निमित्ते प्रोत्सहेन्मनः ॥७८॥

पं........॥७८॥

समीक्ष्य व्रतमादेयमात्तं पाल्यं प्रयत्नतः ।
छिन्नं दर्पात्प्रमादाद्वा प्रत्यवस्थाप्यमञ्जसा ॥७९॥

संकल्पपूर्वकः सेव्ये नियमोऽशुभकर्मणः ।
निवृत्तिर्वा [1]व्रतं स्याद्वा प्रवृत्तिः शुभकर्मणि ॥८०॥

उसका भी निर्वाह नहीं किया जाता। इस समय रात्रिभोजन जैनोंमें भी अजैनोंकी तरह ही प्रवर्तित है। यह बड़े खेदकी बात है। धार्मिकोंको इस ओर ध्यान देना चाहिए ॥७६॥

सेवनीय पदार्थ भी जबतक सेवनमें न आवें तबतक कालकी मर्यादा करके उनको त्यागनेका उपदेश देते हुए उसका फल बतलाते हैं--

जितने काल तक स्त्री, ताम्बूल आदि विषयोंके सेवन करनेकी सम्भावना न हो तबतक उन विषयोंका त्याग कर देना चाहिए। दैववश यदि व्रतके साथ मरण हुआ तो परलोकमें सुखको भोगता है ॥७७॥

पहले कहा था कि शक्तिके अनुसार तप भी करना चाहिए, उसीका विशेष कथन करते हैं—

इन्द्र चक्रवर्ती आदिके पदोंके साथ अन्तमें मोक्ष प्रदान करनेवाले पुष्पांजलि मुक्तावली रत्नत्रय आदि विधानको करके सम्पत्तिके अनुसार उद्यापन करना चाहिए। तथा नित्य कृत्यकी अपेक्षा नैमित्तिक अनुष्ठानमें मनको अधिक उत्साहित करना चाहिए ॥७८॥

अब व्रतोंको लेना, उनका रक्षण करना, यदि व्रत भंग हो जाये तो प्रायश्चित्त लेकर पुनः व्रत लेनेका उपदेश करते हैं—

अपने कल्याणके इच्छुक गृहस्थको अपनी तथा देश, काल, स्थान और सहायकोंकी अच्छी तरह समीक्षा करके व्रत ग्रहण करना चाहिए। और ग्रहण किये हुए व्रतको प्रयत्नपूर्वक पालना चाहिए। प्रमादसे या मदमें आकर यदि व्रतमें दोष लग जाये तो तत्काल प्रायश्चित्त लेकर पुनः व्रत ग्रहण करना चाहिए ॥७९॥

आगे व्रतका स्वरूप कहते हैं—

सेवनीय अपनी स्त्री और ताम्बूल आदिके विषयमें संकल्पपूर्वक नियम लेना, अथवा संकल्पपूर्वक अशुभ कर्म हिंसा आदिसे विरक्त होना, या संकल्पपूर्वक पात्रदान आदि शुभ कर्ममें प्रवृत्ति करना व्रत है ॥८०॥

---

१. 'व्रतमभिसन्धिकृतो नियमः' ।—सर्वार्थ. ७।१।

न हिंस्यात्सर्वभूतानीत्यार्षं धर्मी[1] प्रमाणयन् ।
सागसोऽपि सदा रक्षेच्छक्त्या किं नु निरागसः ॥८१॥
....जन्तूनां हिंसां संकल्पतस्त्यजेत् ॥८१॥ १
आरम्भेऽपि सदा हिंसां सुधीः साङ्कल्पिकीं त्यजेत् ।
घ्नतोऽपि कर्षकादुच्चैः पापोऽघ्नन्नपि धीवरः ॥८२॥
............किं अमुष्मतः स मासाद्यर्थित्वेन हन्मीति संकल्पपूर्विकाम्...........। ६
'[अघ्नन्नपि भवेत्पापी निघ्नन्नपि-] न पापभाक् ।
अभिध्यानविशेषेण यथा धीवरकर्षकौ ॥' [सो. उपा. ३४१] ॥८२॥

विशेषार्थ—यह इतनी वस्तु मैं इतने काल तक सेवन नहीं करूँगा, अथवा यह इतनी वस्तु इतने काल तक मैं सेवन करूँगा, इस प्रकारसे मनमें निर्णय करके नियम लेनेको व्रत कहते हैं। जबतक संकल्पपूर्वक नियम नहीं लिया जाता तबतक व्रत नहीं कहाता। नियम करनेसे मन उस वस्तुकी ओरसे निवृत्त हो जाता है। अन्यथा सेवनकी भावना बनी रहती है ॥८०॥

आगम विशेषपर विश्वासका आलम्बन लेकर प्राणिरक्षाका उपदेश देते हैं—

'समस्त त्रस और स्थावर जीवोंको नहीं मारना चाहिए' इस प्रकारके ऋषियोंके वचनको 'यही सत्य है' इस प्रकार प्रमाण माननेवाले धार्मिकको अपराध करनेवाले जीवोंकी भी सदा रक्षा करनी चाहिए। तब जो निरपराधी हैं उनका तो कहना ही क्या है? उनकी रक्षा तो अवश्य ही करनी चाहिए ॥८१॥

विशेषार्थ—'मा हिंस्यात्सर्वभूतानि'—सब प्राणियोंकी हिंसा नहीं करनी चाहिए यह श्रुतिवचन है। जो वेदपर श्रद्धा रखते हैं उन्हें इस श्रुतिवाक्यको प्रमाण मानकर अपराधी जीवोंका भी प्राण नहीं लेना चाहिए। मनुस्मृतिमें कहा है—'जो अपने सुखके लिए अहिंसक जीवोंका वध करता है वह जीता हुआ और मरकर भी सुखी नहीं होता'[2] ॥८१॥

संकल्पी हिंसाके त्यागका उपदेश देकर दृष्टान्तके द्वारा उसका समर्थन करते हैं—

हिंसाके फलको निश्चित रूपसे जाननेवाला बुद्धिमान् पुरुष कृषि आदि आरम्भ करते हुए भी संकल्पी हिंसाको छोड़े। क्योंकि मारते हुए भी किसानसे नहीं मारता हुआ भी मछलीमार अधिक पापी है ॥८२॥

विशेषार्थ—हिंसाका पालन इसलिए अशक्य-जैसा प्रतीत होता है क्योंकि ऐसी कोई क्रिया नहीं है जिसमें हिंसा न होती हो। किन्तु इसीलिए जैन धर्ममें हिंसाके अनेक भेद करनेके साथ ही गौण और मुख्य भावोंपर विशेष बल दिया है। हिंसाके मुख्य दो भेद हैं—अनारम्भी या संकल्पी हिंसा और आरम्भी हिंसा। 'मैं मांस आदिके लिए अमुक प्राणीको मारूँ' यह संकल्पी हिंसा है। किन्तु आरम्भमें होनेवाली हिंसाको टालना तो अशक्य है क्योंकि गृहस्थाश्रम आरम्भके बिना चल नहीं सकता और आरम्भमें हिंसा अवश्य होती है। अतः आरम्भमें भी संकल्पी हिंसा नहीं करनी चाहिए। आरम्भी हिंसा करनेवालेसे संकल्पी हिंसा

१. धर्मे मु.।

२. 'योऽहिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया ।
स जीवंश्च मृतश्चैव न क्वचित्सुखमेधते ॥'—मनुस्मृ. ५।४५।

अथ परे [विधेयतया व्यवस्थाप्यमानं हिंस्रादिप्राणिनो वधं प्रतिविधातुमाह—]

हिंस्र-दुःखि-सुखि-प्राणिघातं कुर्यान्न जातुचित् ।
अतिप्रसङ्ग-श्वभ्रार्ति-सुखोच्छेदसमीक्षणात् ॥८३॥

[अत्र केचिदाहुः हिंस्रजीवा हन्तव्याः] हिंस्रे ह्येकस्मिन् हते भूयसां रक्षा कृता भवति । ततश्च धर्मा[-धिगमः पापोपरमश्च स्यात्] इति तदयुक्तमतिप्रसङ्गात् । सर्वेषां प्राणिनां हिंस्रतया [हन्तव्यतानुषङ्गात् । तथा च लाभमिच्छतां तथावादिनां मूलोच्छेदः स्यात् । न च बहुरक्षणाभिप्रायेणापि हिंस्रं हिंसतो धर्मः पा-]पोच्छेदो वा युज्यते दयामूलत्वात्तयोः । उक्तं च—

'केचिद् वदन्ति...हन्तव्यता स्यात् । लाभमिच्छार्मूलक्षतिः स्फुटा ।
अहिंसा......हेतुः कालकूटं चेविवतायन जायते ॥'

यच्च संसारमोचकाः [प्रचक्षते दुःखिनो जीवा हन्तव्यास्तेषां विनाशे दुःखविनाशसंभवादिति । तदप्ययुक्तं तेषां स्वल्पदुःखाना निहताना नरकेऽनन्त] दुःखसंयोजनाया दुर्निवारत्वात् । उक्तं च—

'दुःखवतां भवति वधे धर्मो नेदमपि युज्यते वक्तुम् ।
मरणे नरके दुःखं घोरतरं वार्यते केन ॥' [अमि. श्रा. ६।३९]

करनेवाला अधिक पापी होता है। उदाहरणके लिए एक किसान खेत जोत रहा है और खेत जोतनेसे बहुत-से जीवोंका घात हो रहा है। तथा एक मछलीमार पानीमें जाल डाले बैठा है उस समय वह किसी की जान नहीं लेता। फिर भी किसानसे मछलीमार अधिक पापी है। क्योंकि किसानका भाव जीव मारनेका नहीं है अन्न पैदा करनेका है और मछलीमारका भाव मछली मारनेका है। अतः दोनोंके भावोंमें बहुत भेद है ॥८२॥

कुछ लोग हिंसक आदि प्राणियोंको मारनेका विधान करते हैं। उनका निषेध करते हैं—

हिंसक, दुःखी और सुखी प्राणीका घात कभी भी नहीं करना चाहिए; क्योंकि ऐसा करनेसे अतिप्रसंग, नरककी पीड़ा और सुखका विनाश देखा जाता है ॥८३॥

विशेषार्थ—कुछ लोग कहते हैं कि हिंसक जीवोंको मार देना चाहिए, क्योंकि एक शेर वगैरहको मार देनेपर बहुत-से जीवोंकी रक्षा हो जाती है। और ऐसा होनेसे धर्मकी प्राप्ति और पापसे छुटकारा होता है। किन्तु ऐसा कहना ठीक नहीं है, इसमें तो अतिप्रसंग आता है। क्योंकि यदि यह नियम बनाया जाता है कि हिंसकको मार देना चाहिए तो जो हिंसकको मारेगा वह भी हिंसक होगा। तब उसे भी मार देना चाहिए। उसे जो मारेगा वह भी हिंसक होगा। अतः उसे भी मार देना होगा। इस तरह सभीके हिंसक होनेसे सभीको मार डालनेका प्रसंग आयेगा। तब लाभके बदलेमें मूलका ही उच्छेद हो जायेगा। तथा बहुत जीवोंकी रक्षाके अभिप्रायसे हिंसकको मारनेवालेको न तो धर्म ही होना सम्भव है और न पापका ही उच्छेद होना सम्भव है। क्योंकि उनका मूल तो दया है। पहले एक मतवालोंका कहना था कि दुःखी जीवोंको मार देना चाहिए इससे वे दुःखसे छूट जाते हैं। किन्तु यह भी ठीक नहीं है क्योंकि यहाँ तो उन्हें कम दुःख है। यदि मरनेपर वे नरकमें गये तो उनको अनन्त दुःख उठाना होगा। कहा है—दुखी जीवोंको मरनेमें धर्म होता है ऐसा कहना भी उचित नहीं है। क्योंकि मरनेपर नरकके घोर दुःखसे कौन बचा सकता है। किन्हीं-का मत है कि संसारमें सुख दुर्लभ है अतः सुखी जीवोंको मार देना चाहिए क्योंकि सुखी जीव मरकर अगले भवमें सुखी ही होंगे। यह कथन भी ठीक नहीं है क्योंकि सुखीको

अन्ये त्वाहुः—सुखिनो हन्तव्याः यतः संसारे सुखं दुर्लभं, सुखिनश्च हताः सुखिन एव भवन्तीति। तदप्यसङ्गतं, सुखिनां हन्यमानानां दुःखावेशेन सुखोच्छेदस्यावश्यं भावात्, दुःखमृत्युना च दुर्ध्यानानुसन्धानाद्दुरन्तदुर्गतिदुःखावर्तनिर्वर्तनात्। तदलमतिप्रसङ्गेन। स्वगता परगता वा यथाकथंचित् क्रियामाणा हिंसा न धर्माय स्यात्। किं तर्हि? पातकसंभवायैवेति प्रतिपद्यमानैर्यथाशक्तितत्परित्यागे धर्मार्थिभिः सततं यतितव्यमित्याप्तसूत्रोपनिषत्। यदाह—

'को नाम विशतिमोहं नयभङ्गविशारदानुपास्य गुरून्।
विदितजिनमतरहस्यः श्रयन्नहिंसां विशुद्धमतिः ॥' [पुरुषार्थ. ९०] ॥८३॥

अथ पाक्षिकस्य दृग्विशुद्ध्यर्थां लोकानुवृत्त्यर्थाश्च क्रियाः कृत्यतयोपदिशति—

स्थूललक्षः क्रियास्तीर्थयात्राद्या दृग्विशुद्धये।
कुर्यात्तथेष्टभोज्याद्याः प्रीत्या लोकानुवृत्तये ॥८४॥

स्थूललक्षः—स्थूलव्यवहारं लक्षयत्यालोचयतीति स्थूललक्षो व्यवहारप्रधानो बहुप्रदश्च। तीर्थयात्रा—तीर्थान्यूर्जयन्तादीनि पुण्यपुरुषाध्युषितस्थानानि। तेषु यात्रा—गमनम्। आद्यशब्देन रथयात्रा-क्षपकयात्रा-निषिद्धिकागमनादयः। इष्टभोज्याद्याः—सधर्म-स्वजन-मित्रादयो भोज्यन्ते-स्वगृहे भोजनं कार्यन्ते यस्यां सा इष्टभोज्या क्रिया। आद्यशब्देनातिथिपूजन-भूतबल्यादयः। अत्राह श्रीसोमदेवपण्डितः—

'आवेशिकातिथिज्ञातिदीनात्मसु यथाक्रमम्।
यथौचित्यं यथाकालं यज्ञपंचकमाचरेत् ॥' [सो. उपा. ७९५]

मारनेपर उसे दुःख होगा। और इससे उसके सुखका विनाश अवश्य होगा। तथा दुःखपूर्वक मरण करनेसे खोटे ध्यानके प्रभावसे दुर्गतिमें जन्म लेना होगा और तब वहाँ दुःखोंका अन्त नहीं रहेगा। इस प्रकार पुरुषार्थ सिद्ध्युपायमें हिंसाके सम्बन्धमें बहुत-से प्रचलित विकल्पोंका निराकरण किया है। अतः किसी भी प्रकारसे की गयी हिंसा धर्मके लिए नहीं होती। किन्तु पापके ही लिए होती है। इसलिए धर्मार्थीको यथाशक्ति हिंसाको छोड़नेमें प्रयत्नशील रहना चाहिए ॥८३॥

पाक्षिक श्रावकको सम्यग्दर्शनकी विशुद्धि और लोगोंको अपने अनुकूल करनेके लिए करने योग्य क्रिया बतलाते हैं—

व्यवहारको प्रधानता देनेवाले पाक्षिक श्रावकको सम्यग्दर्शनको निर्मल करनेके लिए तीर्थयात्रा आदि क्रिया करनी चाहिए। तथा लोगोंके चित्तको अनुकूल करनेके लिए प्रेमपूर्वक जीमनवार आदि करना चाहिए ॥८४॥

विशेषार्थ—पाक्षिक श्रावकका आचार व्यवहार प्रधान होता है अतः उसे तीर्थयात्रा,

---

१. 'रक्षा भवति बहूनामेकस्यैवास्य जीवहरणेन।
इति मत्वा कर्तव्यं न हिंसनं हिंस्रसत्त्वानाम् ॥
बहुसत्त्वघातिनोऽमी जीवन्त उपार्जयन्ति गुरुपापम्।
इत्यनुकम्पां कृत्वा न हिंसनीया शरीरिणो हिंस्राः ॥
बहुदुःखाः संज्ञपिताः प्रयान्ति त्वचिरेण दुःखविच्छित्तिम्।
इति वासनाकृपाणीमादाय न दुःखिनोऽपि हन्तव्याः ॥
कृच्छ्रेण सुखावाप्तिर्भवन्ति सुखिनो हताः।
सुखिन एव इति तर्कमण्डलाग्रः सुखिनां घाताय नादेयः ॥—पुरुषार्थ. ८३-८६ श्लो.।

'होमभूतबली पूर्वेद्युको भक्तविशुद्धये ।
भुक्त्यादौ सलिलं सर्पिरूभस्यं च रसायनम् ॥
एतद्विधिर्न धर्माय नाधर्माय तदक्रिया ।
दर्भपुष्पाक्षतश्रोतृवन्दनादि विधानवत् ॥'

तथा—

'बहिर्विहृत्य संप्राप्तो नानाचम्य गृहं विशेत् ।
स्थानान्तरात्समायातं सर्वं प्रोक्षितमाचरेत् ॥'

[सो. उपा. ४७४, ४७५, ४७१] इत्यादि ॥८४॥

अथ श्रेयोर्थिनः कीर्तेरप्यर्जनीयत्वमाह—

अकीर्त्या तप्यते चेतश्चेतस्तापोऽशुभास्रवः ।
तत्तत्प्रसादाय सदा श्रेयसे कीर्तिमर्जयेत् ॥८५॥

अशुभास्रवः—पापहेतुः ॥८५॥

अथ कीर्त्युपार्जनोपायमाह—

परासाधारणान् गुण्यप्रगण्यानघमर्षणान् ।
गुणान् विस्तारयेन्नित्यं कीर्तिविस्तारणोद्यतः ॥८६॥

गुण्यप्रगण्यान्—गुणवद्भिः प्रकर्षेण माननीयान् । अघमर्षणान्—पापध्वंसिनः । गुणान्—दानसत्यशौचशीलादीन् ॥८६॥

रथयात्रा आदि करना चाहिए इससे उसकी श्रद्धामें प्रगाढ़ता और निर्मलता आती है। पहले लोग तीर्थयात्रासे लौटनेपर अपने इष्टमित्रों और साधर्मियोंको अपने घरपर भोजन कराया करते थे। इससे साधर्मी वात्सल्यमें वृद्धि होती है ॥८४॥

आगे यश कमानेपर भी जोर देते हैं—

यश न होनेसे मनुष्यके मनमें संक्लेश रहता है और चित्तमें संक्लेशके रहनेसे अशुभ कर्मोंका आस्रव होता है। इसलिए चित्तकी प्रसन्नताके लिए, जो कि पुण्य संचयका कारण है, सदा यश उपार्जन करना चाहिए ॥८५॥

विशेषार्थ—मनुष्य चाहता है कि लोगोंमें—समाजमें मेरा यश हो, लोग मेरे कार्योंकी बड़ाई करें। यदि ऐसा नहीं होता तो उसके मनमें दुःख रहता है। दुःखरूप परिणामोंसे पापकर्मका बन्ध होता है। अतः कल्याणके लिए पुण्यकर्मका उपार्जन आवश्यक है। और उसके लिए मनमें प्रसन्नता रहना जरूरी है। इसलिए गृहस्थको ऐसे भी काम करना चाहिए जिससे लोकमें ख्याति हो ॥८५॥

यश कमानेके उपाय कहते हैं—

अपना यश फैलानेमें तत्पर गृहस्थको दूसरोंमें न पाये जानेवाले, और गुणवानोंके द्वारा अति माननीय तथा पापोंका विनाश करनेवाले दान, सत्य, शौच, शील आदि गुणोंको नित्य बढ़ाना चाहिए ॥८६॥

विशेषार्थ—इन्होंने कीर्ति फैलानेका उपाय सद्गुणोंको फैलाना बतलाया है। यह कठिन है। किन्तु यथार्थमें यश तो सद्गुणोंके फैलावसे ही मिलता है। अन्यायसे धन उपार्जन करके उससे यश कमाना लौकिक दृष्टिमें भले ही उत्तम माना जाये। किन्तु सद्गुणोंके प्रकारमें योगदानसे अपना और सबका कल्याण होता है ॥८६॥

अथैवंविधाचारपरस्य श्रावकस्योत्तरोत्तरभूमिकाश्रयणेन सकलविरतिपदाधिरोहणविधिमुपदिशति—

सैष: प्राथमकल्पिको जिनवचोऽभ्यासामृतेनासकृ-
न्निर्वेदद्रुममावपन् शमरसोद्‍गारोद्धुरं बिभ्रति।
पाकं कालिकमुत्तरोत्तरमहान्त्येतस्य चर्याफला-
न्यास्वाद्योद्यतशक्तिरुद्धचरितप्रासादमारोहतु ॥८७॥

सैष:—स एष इत्यर्थ:। पादपूरणेऽत्र सेर्लोप:। प्राथमकल्पिक:—प्रारब्धदेशसंयम:। आवपन्—सिञ्चन्। उद्‍गार—अभिव्यक्ति:। कालिकं—कालकृतम्। चर्या:—दर्शनिकादिप्रतिमा:। उद्धचरितं—सल्लेखनान्तो यतिधर्म इति। भद्रम् ॥८७॥

इत्याशाधरदृब्धायां धर्मामृतपञ्जिकायां ज्ञानदीपिकापर-
संज्ञायामेकादशोऽध्याय:।

इस प्रकार पाक्षिकके आचारमें तत्पर श्रावकके उत्तरोत्तर प्रतिमाओंपर आरोहण करते हुए मुनिपद धारण करनेकी कामना करते हैं—

वही पाक्षिक श्रावक बार-बार जिनागमकी भावनारूप अमृतके द्वारा संसार शरीर भोगोंसे वैराग्यरूप वृक्षको सींचता हुआ, शान्तिरूपी रसकी अभिव्यक्तिसे लबालब भरे हुए काल पाकर पकनेवाले और उत्तरोत्तर महान् उस वृक्षके चारित्ररूपी फलोंको खाकर शक्तिके बढ़ जानेपर मुनिधर्मरूपी महलपर आरोहण करे ॥८७॥

विशेषार्थ—यहाँ वैराग्यको एक वृक्ष माना है। जैसे वृक्षको जलसे सींचते हैं वैसे ही यह वैराग्यरूपी वृक्ष बार-बार जिनेन्द्रके वचनोंके अभ्यासरूपी जलसे सींचा जाता है। फिर उसपर पहली, दूसरी, तीसरी आदि प्रतिमाके आचाररूप फल लगते हैं, जो समय पाकर पकते हैं और उत्तरोत्तर महान् होते हैं अर्थात् उत्तरोत्तर प्रतिमाओंमें चारित्र बढ़ता जाता है। तथा उन चारित्ररूपी फलोंमें शान्तिरूपी रस भरा होता है। उसके सेवनसे श्रावककी शक्ति बढ़ती जाती है और तब वह मुनिपद धारण करके सल्लेखनापूर्वक मरण करता है ॥८७॥

इस प्रकार पं. आशाधर रचित धर्मामृतके अन्तर्गत सागारधर्मकी भव्यकुमुद चन्द्रिका टीका तथा ज्ञानदीपिका पञ्जिकाकी अनुसारिणी हिन्दी टीकामें प्रारम्भसे ग्यारहवाँ और इस सागारधर्मकी अपेक्षा दूसरा अध्याय समाप्त हुआ॥

द्वादश अध्याय (तृतीय अध्याय)

अथ नैष्ठिकं दर्शयन्नाह—

देशयमघ्नकषायक्षयोपशमतारतम्यवशतः स्यात् ।
दर्शनिकाद्येकादशदशावशो नैष्ठिकः सुलेश्यतरः ॥१॥

देशयमघ्नाः—अप्रत्याख्यानावरणाख्याः । वशः—सामर्थ्यम् । दर्शनं निर्मलं मद्यादिविरत्याहिताशयं सम्यक्त्वमस्यास्तीत्यतिशायने ठावत इति ठः । एवं व्रतिकादयस्त्रयो व्युत्पाद्याः । उक्तं च—

'दंसण-वद-सामायिय-पोसह-सच्चित्त-राइभत्तेय ।
ब्रह्मारंभपरिग्गह अणुमणमुद्दिट्ठदेशविरदेदे ॥' [गो. जी. ४७६]

सुलेश्यतरः । लिम्पति स्वीकरोति पुण्यपापे स्वयं जीवो यया सा लेश्या ।
उक्तं च—

'लिम्पत्यात्मीकरोत्यात्मा पुण्यापुण्यैर्यथा स्वयम् ।
सा लेश्येत्युच्यते सद्भिर्द्विविधा द्रव्यभावतः ॥' [ ]

अथवा लिशत्यल्पीकरोत्यात्मानमिति लेश्या । कषायानुरंजिता योगप्रवृत्तिः । सैषा भावतः द्रव्यतस्तु शरीरच्छविर्लेश्या । सा च द्वितय्यपि कृष्णादिभेदात् षोढा । उक्तं च—

'प्रवृत्तिर्यौगिकी लेश्या कषायोदयरञ्जिता ।
भावतो द्रव्यतो देहच्छविः षाढोभयी मता ॥
कृष्णा नीलाथ कापोती पीता पद्मा सिता स्मृता ।
लेश्या षड्भिः सदा ताभिः गृह्यते कर्म जन्मिभिः ॥' [अमित. पञ्चसं. १।२५३-२५४]

नैष्ठिकका लक्षण कहते हैं—

देशचारित्रको घातनेवाली कषायके क्षयोपशमके उत्तरोत्तर उत्कर्षके कारण दर्शनिक आदि ग्यारह अवस्थाओंके अधीन तथा पाक्षिक की अपेक्षा उत्तम लेश्यावाला नैष्ठिक श्रावक होता है ॥१॥

विशेषार्थ—अप्रत्याख्यानावरण क्रोध, मान, माया, लोभ नामक कषाय देशचारित्रको घातती हैं। उसके क्षय अर्थात् उदयके अभावके साथ प्रत्याख्यानावरण कषायके उदयसे विशिष्ट सदवस्थारूप उपशमको क्षयोपशम कहते हैं। यह क्षयोपशम पहलेसे दूसरी, दूसरीसे तीसरी, इस तरह ऊपरकी प्रतिमाओंमें बढ़ता जाता है। इसीके कारण दर्शनिक, व्रतिक आदि ग्यारह अवस्थाएँ होती हैं। उन सब अवस्थावाले श्रावक नैष्ठिक कहलाते हैं। उनके उत्तरोत्तर उत्तम लेश्या होती है। यहाँ लेश्याका वर्णन किया जाता है। जिसके द्वारा जीव अपनेको पुण्य-पापसे लिम्पित करता है उसे लेश्या कहते हैं। लेश्याके दो भेद हैं—भावलेश्या और द्रव्य-लेश्या। कषायके उदयसे रंगी मन-वचन-कायकी प्रवृत्तिको भावलेश्या कहते हैं। और शरीरके रंगको द्रव्यलेश्या कहते हैं। प्रत्येकके छह भेद हैं—कृष्ण, नील, कापोत, पीत, पद्म और शुक्ल। प्रारम्भकी तीन लेश्या कषायकी तीव्रतामें होती हैं, शेष तीन कषायकी मन्दतामें होती हैं।

अपि च—

'योगाविरतिमिथ्यात्व-कषायजनितोऽङ्गिनाम् ।
संस्कारो भावलेश्यास्ति कल्मषास्रवकारणम् ॥
कापोती कथिता तीव्रो नीला तीव्रतरो जिनैः ।
कृष्णा तीव्रतमो लेश्या परिणामः शरीरिणाम् ॥
पीता निवेदिता मन्दः पद्मा मन्दतरो बुधैः ।
शुक्ला मन्दतमस्तासां वृद्धिः षट्स्थानयायिनी ॥
निर्मूलस्कन्धयोश्छेत्तुं भावाः शाखोपशाखयोः ।
उच्चये पतितादाने भावलेश्या फलार्थिनाम् ॥
षट् षट् चतुर्षु विज्ञेयास्तिस्रस्तिस्रः शुभास्त्रिषु ।
शुक्ला गुणेषु षट्स्वेका लेश्या निर्लेश्यमन्तिमम् ॥' [अमित. पं. सं. १।२६१-२६५]

तत्कर्माणः क्रमेण यथा—

'रागद्वेषग्रहाविष्टो दुर्ग्रहो दुष्टमानसः ।
क्रोधमानादिभिस्तीव्रैर्ग्रस्तोऽनन्तानुबन्धिभिः ॥
निर्दयो निरनुक्रोशो मद्यमांसादिलम्पटः ।
सर्वदा कदनासक्तः कृष्णलेश्यान्वितो नरः ॥
कोपी मानी मायी लोभी रागी द्वेषी मोही शोकी ।
हिंस्रः क्रूरश्चण्डश्चोरो मूर्खः स्तब्धः स्पर्धाकारी ॥
निद्रालुः कामुको मन्दः कृत्याकृत्यविचारकः ।
महामूर्छो महारम्भो नीललेश्यो निगद्यते ॥
शोकभीमत्सरासूया-परनिन्दा-परायणः ।
प्रशंसति सदात्मानं स्तूयमानः प्रहृष्यति ॥

जैसे कापोती तीव्र, नील तीव्रतर और कृष्णलेश्या तीव्रतम है। इसी तरह पीत मन्द, पद्म मन्दतर और शुक्ल मन्दतम है।

इन लेश्याओंमें षट्स्थान पतित हानि-वृद्धि हुआ करती है। एक दृष्टान्त द्वारा आगममें लेश्याओंका भाव स्पष्ट किया है कि छह पथिक जंगलमें मार्ग भूल गये। वे भूखे थे। उन्हें एक फलोंसे लदा वृक्ष मिला। एकने सोचा इस वृक्षको जड़से काटकर फल खायेंगे। उसके कृष्णलेश्या है। दूसरेने विचारा इसका तना काटकर फल खायेंगे। उसके नीललेश्या है। तीसरेके मनमें आया इसकी एक शाखा काटकर फल खायेंगे। उसके कापोतलेश्या है। चौथेके मनमें आया उपशाखा काटकर फल खायेंगे उसके पीतलेश्या है। पाँचवेंने विचारा पेड़पर चढ़कर फल तोड़कर खायेंगे उसके पद्मलेश्या है। छठेने विचारा—पेड़के नीचे गिरे फल चुनकर खायेंगे उसके शुक्ललेश्या है। प्रथम चार गुणस्थानोंमें छहों लेश्या होती हैं। पाँचवें, छठे, सातवें गुणस्थानोंमें तीन शुभलेश्या होती हैं। आठवेंसे तेरहवें तक छह गुणस्थानोंमें एक शुक्ललेश्या ही होती है। अन्तिम गुणस्थानमें लेश्या नहीं होती। इन लेश्यावाले जीवोंका लक्षण इस प्रकार है। जो राग द्वेष मदसे आविष्ट है, दुराग्रही है, दुष्ट अभिप्राय वाला है, अनन्तानुबन्धी क्रोध मान माया लोभसे ग्रस्त है, निर्दयी है, मद्य मांसमें आसक्त है, अभक्ष्यभोजी है वह कृष्ण लेश्यावाला होता है। क्रोधी, मानी, मायाचारी, लोभी, रागी, द्वेषी, मोही,

वृद्धिहानी न जानाति न मूढः स्वपरान्तरम् ।
अहंकारग्रहग्रस्तः समस्तां कुरुते क्रियाम् ॥
श्लाघितो नितरां दत्ते रणे मर्तुमपीहते ।
परकीययशोध्वंसी युक्तः कापोतलेश्यया ॥
समदृष्टिरविद्विष्टो हिताहितविवेचकः ।
वदान्यो सदयो दक्षः पीतलेश्यो महामनाः ॥
शुचिर्दानरतो भद्रो विनीतात्मा प्रियंवदः ।
साधुपूजोद्यतः साधुः पद्मलेश्योऽनघक्रियः ॥
निर्निदानोऽनहंकारः पक्षपातोज्झितोऽशठः ।
रागद्वेषपराचीनः शुक्ललेश्यः स्थिराशयः ॥' [अमित. पं. सं. १।२७२-२८१]

शोभना तेजःपद्मशुक्लानामन्यतमा लेश्या यस्यासौ सुलेश्यः । सद्दृष्टिपाक्षिकाभ्यामतिशयेन सुलेश्यः सुलेश्यतरः, उत्तमसंवेगप्राप्तत्वात् । यदाह—

'तेजः पद्मा तथा शुक्ला लेश्यास्तिस्रः प्रशस्तिकाः ।
संवेगमुत्तमं प्राप्तः क्रमेण प्रतिपद्यते ॥' [ ]

लेश्याविशुद्ध्यादिनैव च महाव्रतिनोऽपि सद्गतिः । यदाह—

'यो यया लेश्यया युक्तः कालं कुर्यान्महाव्रती ।
तल्लेश्ययैव स स्वर्गे तल्लेश्यायुजि जायते ।' [ ] ॥१॥

अथ दर्शनिकादीनुद्दिशंस्तेषां गृहित्व-ब्रह्मचारित्व-भिक्षुकत्वानि जघन्य-मध्यमोत्तमत्वानि च विभक्तुमार्याद्वयमाह—

शोक करनेवाला, हिंसक, क्रूर, चोर, मूर्ख, ईर्ष्या करनेवाला बहुत सोनेवाला, कामुक, कृत्य-अकृत्यका विचार न करनेवाला, महा धन-धान्यमें अति आसक्त प्राणी नील लेश्यावाला होता है। बहुत शोक, बहुत भय करनेवाला, निन्दक, दूसरोंकी चुगली करनेवाला, दूसरोंका तिरस्कार करनेवाला, अपनी प्रशंसा करनेवाला, अपनी प्रशंसासे प्रसन्न होनेवाला, किसीका विश्वास न करनेवाला और अपनी ही तरह दूसरोंको भी माननेवाला, हानि-लाभकी परवाह न करनेवाला, युद्धमें मरने-मारनेको तैयार व्यक्ति कापोतलेश्यावाला है। सर्वत्र समदृष्टि, कृत्य-अकृत्य और हित-अहितको जाननेवाला, दया-दानमें लीन, विद्वान्, पीतलेश्यावाला होता है। त्यागी, क्षमाशील, भद्र, सरल परिणामी, साधुओंकी पूजामें तत्पर जीव पद्मलेश्या-वाला होता है। सर्वत्र समभावी, पक्षपातसे रहित, निदान न करनेवाला, और राग-द्वेषसे रहित आत्मा शुक्ललेश्यावाला होता है। जो उत्तम संवेग भाव रखता है उसके पीत-पद्म-शुक्ललेश्या होती है। पाक्षिकसे नैष्ठिककी लेश्या प्रशस्त होती है। तथा नैष्ठिकके भी ग्यारह भेदोंमें उत्तरोत्तर प्रशस्त लेश्या होती है। कहा है—'जो उत्तम संवेगभावको प्राप्त होते हैं उनके क्रमसे पीत-पद्म-शुक्ल तीन प्रशस्त लेश्या होती हैं।' लेश्याविशुद्धि आदिसे ही महाव्रतीकी भी सद्गति होती है। कहा है—'जो महाव्रती जिस लेश्यासे मरण करता है वह उस लेश्यासे ही उसी लेश्यावाले स्वर्गमें जन्म लेता है' ॥१॥

जो चोरीका माल छिपकर खरीदता है वह चोर होता है और चोरी करनेसे व्रतका भंग होता है। किन्तु ऐसा करनेवाला समझता है कि मैं तो व्यापार करता हूँ, चोरी नहीं करता। इस प्रकारके संकल्पसे व्रतकी अपेक्षा रखनेसे व्रत भंग नहीं होता। किन्तु एक देशका भंग और एक देशका अभंग होनेसे अतीचार होता है। तीसरा अतिचार है अधिकहीनमानतुला, मापनेके गज बाट वगैरहको मान कहते हैं और तराजूको उन्मान कहते हैं। दो तरहके बाट तराजू रखना एक हीन और एक अधिक। हीन या कमसे दूसरोंको देता है। अधिकसे स्वयं लेता है। चौथा अतिचार है प्रतिरूपक व्यवहृति—प्रतिरूपक कहते हैं समान को। जैसे घीका प्रतिरूपक चर्बी, तेलका प्रतिरूपक मूत्र। असली सोने चाँदीका प्रतिरूपक नकली सोना चाँदी। घीमें चर्बी मिलाकर बेचना आदि प्रतिरूपक व्यवहार है। वस्तुतः इस तरहका काम पराये धनको लेनेवाला होनेसे चोरी ही है। किन्तु वह समझता है कि मकानमें सेंध लगाना वगैरह ही चोरी प्रसिद्ध है। मैं तो व्यापारकी कला मात्र करता हूँ। इस भावनासे व्रतकी रक्षाका भाव होनेसे इसे अतिचार कहा है। पाँचवा अतिचार है विरुद्ध राज्याति-क्रम—राजाके प्रजापालनके योग्य कर्मको राज्य कहते हैं। वह राज्य नष्ट हो जाये या किसीके द्वारा अपने अधिकारमें कर लिया जाये तो उसे विरुद्धराज्य कहते हैं। उसमें अतिक्रमका मतलब है उचित न्यायसे भिन्न ही प्रकारसे लेना देना। विरुद्ध राज्यमें सस्ती वस्तुओंको ऊँचे मूल्यपर बेचनेका प्रयत्न किया जाता है। अथवा परस्परमें विरोधी दो राजाओंका राज्य अर्थात् उनकी नियमित भूमि सेना वगैरह विरुद्ध राज्य है। उसका अतिक्रम अर्थात् व्यवस्थाका उल्लंघन। अर्थात् एक राज्यके निवासीका दूसरे राज्यमें प्रवेश करना। जैसे पाकिस्तान और भारतमें होता है। यद्यपि अपने राजाकी आज्ञाके बिना ऐसा करना बिना दी हुई वस्तुका ग्रहणरूप होनेसे तथा ऐसा करनेवालोंके चोरीके दण्डके योग्य होनेसे चोरी रूप ही है, तथापि ऐसा करनेवाले व्यापारीकी भावना यही रहती है कि मैं व्यापार करता हूँ चोरी नहीं करता। लोकमें भी उसे कोई चोर नहीं कहता। अतः व्रत सापेक्ष होनेसे अतिचार है। वास्तवमें तो ये पाँचों ही स्पष्ट रूपसे चोरीमें आते हैं। कोई चोर

अचौर्याणुव्रतातिचारस्वात्सद्वांस्त्यजेत् । सोमदेवपण्डितस्तु मानन्यूनताधिक्ये द्वावतिचारौ मन्यमानस्त्विदमाह—

'पौतवन्यूनताधिक्ये स्तेन कर्म ततो ग्रहः ।
विग्रहे संग्रहोऽर्थस्यास्तेयस्यैते निवर्तकाः ॥' [सो. उपा. ३७०] ॥५०॥

अथ स्वदारसंतोषाणुव्रतस्वीकारविधिमाह—

प्रतिपक्षभावनैव न रतौ रिरंसारुजि प्रतीकारः ।
इत्यप्रत्ययितमनाः श्रयत्वहिंस्रः स्वदारसंतोषम् ॥५१॥

प्रतिपक्षभावना—ब्रह्मचर्यस्य प्रागुक्तविधिना पुनः पुनश्चेतसि निवेशनं, रतिः—स्त्रीसम्भोगः । उक्तं च—

'स्त्रीसंभोगेन यः कामज्वरं प्रतिचिकीर्षति ।
स हुताशं घृताहुत्या विध्यापयितुमिच्छति ॥' [योगशा. २।८१]

रिरंसारुजि—योन्यादौ रन्तुमिच्छारूपायां वेदनायाम् । अप्रत्ययितमनाः—असंजातविश्वासचित्तः । उक्तं च—

'ये निजकलत्रमात्रं परिहर्तुं शक्नुवन्ति न हि मोहात् ।
निःशेषशेषयोषिन्निषेवणं तैरपि न कार्यम् ॥' [पुरुषार्थ. ११० [

अहिंस्रः—ईषद्विहिंसनशीलः ॥५१॥

व्यक्ति यदि चोरी न करनेका नियम लेता है तो उसकी दृष्टिसे इन्हें अतिचारकी श्रेणीमें रखा जा सकता है। प्रायः सभी ग्रन्थकारोंने ये पाँचों अतीचार बतलाये हैं। आचार्य समन्तभद्रने विरुद्धराज्यातिक्रमके स्थानमें विलोप नामक अतीचार रखा है। जिसका अर्थ है राजाज्ञाको न मानना। सोमदेवने अधिक बाट तराजू और कम बाट तराजूको अलग अतिचार गिनाया है। तथा विरुद्ध-राज्यातिक्रमके स्थानमें विग्रह और अर्थ संग्रह नामक अतीचारको स्थान दिया है। अर्थात् युद्धके समय पदार्थोंका संग्रह करना कि मूल्य बढ़नेपर बेचकर धन कमायेंगे। यह बराबर अतिचारकी कोटिमें आता है क्योंकि इसमें शुद्ध व्यापारकी भावना है ॥५०॥

अब स्वदारसन्तोष नामक अणुव्रतको ग्रहण करनेका उपदेश देते हैं—

योनि आदिमें रमण करनेकी इच्छारूप रोगकी शान्तिका उपाय उसके प्रतिपक्षी ब्रह्मचर्यको चित्तमें स्थान देना ही है, स्त्री सम्भोग नहीं। इस प्रकारका विश्वास जिसके चित्तमें उत्पन्न नहीं हुआ है वह अहिंसाणुव्रती स्वदार सन्तोष नामक ब्रह्माणुव्रत स्वीकार करे ॥५१॥

विशेषार्थ—हिंसा करना, झूठ बोलना और चोरी करना तो मनुष्यमें संगतिके असरसे आता है। किन्तु कामविकार तो युवावस्था होते ही जाग्रत् हो जाता है। जो जन्मसे ही अच्छी संगतिमें रहते हैं वे भी युवावस्थामें इस विकारसे बच नहीं पाते। अच्छे-अच्छे तपस्वियोंको भी इसने भ्रष्ट किया है। इसको जीतनेका उपाय है ब्रह्मचर्यके गुणोंका सतत चिन्तन और विषय सेवनसे होनेवाली हानियोंकी पूरी जानकारी। किन्तु यह समय सापेक्ष है। अतः गृहस्थको अपनी पत्नीमें ही सन्तुष्ट रहनेका व्रत लेना चाहिए। इसीको स्वदार सन्तोष नामक ब्रह्माणुव्रत कहते हैं। कहा है—'जो स्त्रीसम्भोगके द्वारा कामज्वरको रोकना चाहता है वह घीकी आहुतिसे अग्निको शान्त करना चाहता है।' अतः जो मोहवश अपनी स्त्रीको छोड़नेमें असमर्थ हैं उन्हें भी अपनी स्त्रीके सिवाय शेष सभी स्त्रियोंका सेवन नहीं करना चाहिए ॥५१॥

अथ स्वदारसंतोषिणं व्याचष्टे—

सोऽस्ति स्वदारसन्तोषी योऽन्यस्त्रीप्रकटस्त्रियौ ।
न गच्छत्यंहसो भीत्या नान्यैर्गमयति त्रिधा ॥५२॥

स्वदारसंतोषी—स्वदारेषु निजधर्मपत्न्यां संतुष्यति मैथुनसंज्ञां प्रतिचिकीर्षया तान् भजतीत्येवं व्रतः स्वदारेषु सन्तोषोऽस्यास्तीति वा । अन्यस्त्री—परदाराः परिगृहीता अपरिगृहीताश्च । तत्र परिगृहीताः स-स्वामिकाः, अपरिगृहीता स्वैरिणी प्रोषितभर्तृका कुलाङ्गना वाऽनाथा । कन्या तु भाविभर्तृकत्वात्पित्रादि-परतन्त्रत्वाद्वा सनाथेत्यन्यस्त्रीतो न विशिष्यते । प्रकटस्त्री—वेश्या । गच्छति—भजति । अहंसो भीत्या—पापाद्भिया न राजादिभयेन । अन्यैः—परदारादि लम्पटैः कर्तृभिः । त्रिधा—मनोवाक्कायैः कृतकारिताभ्या-मनुमत्यापि वा । उक्तं च—

'विषवल्लीमिव हित्वा पररामां सर्वथा त्रिधा दूरम् ।
सन्तोषः कर्तव्यः स्वकलत्रेणैव बुद्धिमता ॥
नासक्त्या सेवन्ते भार्यां स्वामपि मनोभवाकुलिताः ।
वह्निशिखात्यासक्त्या शीतार्तैः सेविता दहति ॥' [ ]

तदेतद् ब्रह्माणुव्रतं निरतिचारमद्यामिषक्षौद्रपञ्चोदुम्बरविरतिलक्षणाष्टमूलगुणान् प्रतिपन्नवतो विशुद्ध-सम्यग्दृशः श्रावकस्योपदिश्यते । यस्तु स्वदारवत् साधारणस्त्रियोऽपि व्रतयितुमशक्तः परदारानेव वर्जयति सोऽपि ब्रह्माणुव्रतोच्यते । द्विविधं हि तद्व्रतं स्वदारसन्तोषः परदारवर्जनं चेति । एतच्चान्यस्त्रीप्रकटस्त्रियाविति स्त्रीद्वयसेवाप्रतिषेधोपदेशाल्लभ्यते । तदुक्तं—

अब स्वदारसन्तोषीका स्वरूप कहते हैं—

जो गृहस्थ पापके भयसे परस्त्री और वेश्याको मन, वचन, काय और कृत कारित अनुमोदनासे न तो स्वयं सेवन करता है और न दूसरे पुरुषोंसे सेवन कराता है वह स्वदार-सन्तोषी है ॥५२॥

विशेषार्थ—परस्त्री दो प्रकार की होती है परिगृहीता और अपरिगृहीता । जिसका कोई स्वामी होता है वह परिगृहीता है और जो स्वच्छन्द है, जिसका पति परदेशमें है या अनाथ कुलीन स्त्री है वह अपरिगृहीता है । कन्याका स्वामी भविष्यमें उसका पति होनेवाला है और वर्तमानमें वह पिताके अधीन होनेसे सनाथ है अतः वह भी अन्यस्त्रीमें आती है । प्रकटस्त्री वेश्याको कहते हैं । इन दोनों प्रकारकी स्त्रियोंको जो पापके भयसे, न कि राजा या समाजके भयसे मन, वचन, काय और कृत कारित अनुमोदनासे न तो स्वयं भोगता है और न दूसरोंसे ऐसा कराता है वह स्वदारसन्तोषी है । यह ध्यानमें रखना चाहिए यह ब्रह्माणुव्रत निरतिचार मद्य मांस मधु और पाँच उदुम्बर फलोंसे विरतिरूप आठ मूल गुणोंके पालक विशुद्ध सम्यग्दृष्टी द्वितीय प्रतिमाधारी श्रावकके बतलाया है । द्वितीय प्रतिमाधारी श्रावकके व्रत निरतिचार होते हैं । जो व्रत प्रतिमा धारण न करके साधारण रूपसे अणुव्रत पालते हैं उनके अणुव्रतों और व्रत प्रतिमाधारीके अणुव्रतोंके लक्षणमें अन्तर होता है । रत्नकरण्ड श्रावकाचार, पुरुषार्थ सिद्ध्युपाय और सोमदेव उपासकाचारमें जो अणुव्रतके लक्षण कहे हैं वे व्रतप्रतिमाको लक्ष्यमें रखकर नहीं कहे गये हैं । वे तो साधारण अणुव्रतोंके लक्षण हैं जो कभी अष्ट मूलगुणोंमें गिने जाते थे । तत्त्वार्थ सूत्रमें भी जो अतिचार गिनाये हैं वे उन्हींको लक्ष्यमें रखकर गिनाये हैं । अन्यथा वे अतीचार अनाचार जैसे लगते हैं । पं. आशाधरजी

'षण्ढत्वमिन्द्रियच्छेदं वीक्ष्याब्रह्मफलं सुधीः ।
भवेत्स्वदारसंतुष्टोऽन्यदारान्वा विवर्जयेत् ॥' [योगशा. २।७१]

तत्राद्यमभ्यस्तदेशसंयमस्य नैष्ठिकस्येष्यते । द्वितीयं तु तदभ्यासोन्मुखस्य । तदाह श्रीसोमदेवपण्डितः—

'वधूवित्तस्त्रियौ मुक्त्वा सर्वत्रान्यत्र तज्जने ।
माता स्वसा तनूजेति मतिर्ब्रह्मगृहाश्रमे ॥' [सो. उपा. ४०५]

यस्तु 'पंचुंबरसहियाइं' इत्यादि वसुनन्दिसैद्धान्तमतेन दर्शनप्रतिमां प्रतिपन्नस्तस्येदं तन्मतेनैव व्रतप्रतिमां बिभ्रतो ब्रह्माणुव्रतं स्यात् । तद्यथा—

व्रतप्रतिमाके अन्तर्गत अणुव्रतोंका वर्णन करते हैं और अतिचार वे ही बतलाते हैं जो तत्त्वार्थ सूत्र आदिमें साधारण अणुव्रतोंके कहे हैं। स्वदारसन्तोषव्रतका उनका लक्षण भी दूसरोंसे भिन्न है। स्वामी समन्तभद्रने जो पापके भयसे परस्त्रियोंका सेवन न स्वयं करता है और दूसरोंसे कराता है उसे परदारनिवृत्ति या स्वदारसन्तोष नाम दिया है। किन्तु आशाधरजीने परदारनिवृत्ति और स्वदारसन्तोषको अलग व्रत स्वीकार किया है। वह इसी श्लोककी अपनी टीकामें लिखते हैं—यह निरतिचार ब्रह्माणुव्रत मद्य मांस मधु पाँच उदुम्बर फलोंके त्यागरूप अष्ट मूलगुणोंके धारक विशुद्ध सम्यग्दृष्टी श्रावकके बतलाया है। जो स्वस्त्रीके समान साधारण स्त्रियोंको भी त्यागनेमें असमर्थ है केवल परस्त्रियोंका ही त्याग करता है वह भी ब्रह्माणुव्रती माना जाता है। ब्रह्माणुव्रतके दो भेद हैं—स्वदारसन्तोष और परदारनिवृत्ति। ये भेद ऊपर ब्रह्माणुव्रतके लक्षणमें अन्यस्त्री और प्रकटस्त्री इन दो प्रकारकी स्त्रियोंके सेवनके निषेधसे प्रकट होते हैं। जो देशसंयममें अभ्यस्त नैष्ठिक श्रावक है वह स्वदारसन्तोषव्रतको धारण करता है। और जो देश संयमका अभ्यासी है वह परदारनिवृत्तिको स्वीकार करता है। सोमदेव पण्डितने कहा है—'स्वस्त्री और वित्तस्त्रीको छोड़कर अन्य सब स्त्रियोंमें माता, बहन, बेटीकी भावना रखना गृहस्थका ब्रह्माणुव्रत है।' वसुनन्दि सैद्धान्तिके मतसे जो पाँच उदुम्बर सहित सात व्यसनोंको छोड़ता है और जिसकी मति सम्यक्त्वसे विशुद्ध है वह प्रथम दर्शन प्रतिमा का धारी श्रावक है। उसी दर्शन प्रतिमाधारी श्रावकके ब्रह्माणुव्रतका लक्षण वसुनन्दिने [3]इस प्रकार कहा है—जो पर्वके दिनोंमें स्त्री सेवन नहीं करता और सदा अनंगक्रीड़ा नहीं करता, उसे जिनेन्द्रने परमागममें स्थूल ब्रह्मचारी कहा है।' किन्तु स्वामी समन्तभद्रने प्रथम दर्शन श्रावकका स्वरूप इस प्रकार कहा है—जो शुद्ध सम्यग्दर्शनका धारी है, संसार शरीर और भोगोंसे विरक्त है, पंच गुरुके चरण ही उसके शरण हैं तथा तत्त्व पथका उसे पक्ष है वह दर्शन प्रतिमाका धारी श्रावक है। उसी प्रथम प्रतिमाधारी श्रावकके ब्रह्माणुव्रतका स्वरूप अतिचार छुड़ानेके लिए ही यहाँ कहा है।'

---

१. 'वधूवित्तस्त्रियौ मुक्त्वा सर्वत्रान्यत्र तज्जने । माता स्वसा तनूजेति मतिर्ब्रह्मगृहाश्रमे ॥
—सो. उपा. ४०५ श्लो. ।

२. 'पंचुंबर सहियाई सत्तवि वसणाई जो विवज्जेइ । सम्मत्त विसुद्धमई सो दंसणसावयो भणिओ ॥'
—वसु. श्रा. २०५ गा. ।

३. पव्वेसु इत्थीसेवा अणंगकीड़ा सया विवज्जेइ ।
थूल यडबंभयारी जिणेहि भणिओ पवयणम्मि ॥ —वसु. श्रा. २१२ गा. ।

'पव्वेसु इत्थिसेवा अणंगकीडा सया विवज्जंतो ।
थूलयडब्रह्मयारी जिणेहि भणिदो पवयणम्मि ॥' [वसु. श्रा. २१२]

यश्च 'सम्यग्दर्शनशुद्ध' इत्यादि स्वामिमतेन दर्शनिको भवेत्तस्यैतद् ब्रह्माणुव्रतमतिचारवर्जनार्थमेवानूद्यते ॥५२॥

अथ यद्यपि गृहस्थस्य प्रतिपन्नं व्रतमनुपालयतो न तादृशः पापबन्धोऽस्ति तथापि यतिधर्मानुरक्तत्वेन तत्प्राप्तेः प्राग्गार्हस्थ्येऽपि कामभोगविरक्तः सन् श्रावकधर्मं परिपालयतीति तं वैराग्यकाष्ठामुपनेतुं सामान्येनाब्रह्मदोषानाह—

सन्तापरूपो मोहाङ्गसादतृष्णानुबन्धकृत् ।
स्त्रीसम्भोगस्तथाप्येष सुखं चेत्का ज्वरेऽक्षमा ॥५३॥

सन्तापरूपः स्त्रीसम्पर्कस्य पित्तप्रकोपहेतुत्वात् । यद्वैद्याः—

पं. आशाधरजीने इस तरह एक ही व्रतके दो नामोंको अलग करके ब्रह्माणुव्रतके दो भेद कर दिये हैं। उन्हें इन भेदोंके करनेमें मुख्य बल सोमदेवके लक्षणसे मिला प्रतीत होता है। सोमदेवने जो ब्रह्माणुव्रतीको स्वस्त्री और वित्तस्त्रीकी छूट दी है यह ब्रह्माणुव्रती देशसंयम का अभ्यासी ही हो सकता है। ऊपर आशाधरजीने उसीको लक्ष करके लिखा है कि जो स्वस्त्रीकी तरह साधारण स्त्रियोंका भी नियम लेनेमें असमर्थ है और केवल परस्त्रियोंका ही नियम लेता है वह भी ब्रह्माणुव्रती है। इसीलिए उन्होंने अपने लक्षणमें अन्य स्त्री और प्रकट स्त्री (वेश्या) का त्याग कराया है। यह प्रकट स्त्री वही है जिसको सोमदेवजीने वित्त स्त्री कहा है। साधारण स्त्री भी उसे ही कहते हैं। सोमदेवजीने पाँचों अणुव्रतोंके जो लक्षण कहे हैं वे सब देश संयमके अभ्यासीको लक्षमें रखकर कहे हैं। उनमेंसे किसीमें भी नौ संकल्पोंसे त्यागकी बात नहीं है। नौ संकल्पोंसे या कृतकी तरह कारितसे त्याग अभ्यासी नहीं कर सकता। तत्त्वार्थ सूत्रादिमें प्रतिपादित अतिचार भी अभ्यासीको ही लक्षमें रखकर कहे गये हैं। अस्तु, बुद्धिमान् मनुष्यको मन, वचन, कायसे विषवेलकी तरह परस्त्रीका सर्वथा त्याग करके स्वस्त्रीमें ही सन्तोष करना चाहिए। तथा कामसे पीड़ित होनेपर अपनी पत्नीका भी सेवन अति आसक्तिसे नहीं करना चाहिए। शीतसे पीड़ित मनुष्य यदि आगकी लपटोंका सेवन अति आसक्तिसे करे तो आग उन्हें जला देती है। कहा है—'विषय सेवनका फल नपुंसकता या लिंगच्छेद जानकर बुद्धिमान्को स्वदारसन्तोषी होना चाहिए और परस्त्रियोंका त्याग करना चाहिए ॥५२॥

यद्यपि स्वीकार किये गये व्रतको पालन करनेवाले गृहस्थको वैसा पापबन्ध नहीं होता जैसा अव्रतीको होता है। तथापि मुनिधर्मका अनुरागी ही गृहस्थ धर्मको पालता है इसलिए मुनिधर्म धारण करनेसे पहले गृहस्थ अवस्थामें भी जो कामभोगसे विरक्त होकर श्रावक धर्मको पालता है उसे वैराग्यकी अन्तिम सीमा पर ले जानेके लिए सामान्यसे अब्रह्मके दोष बतलाते हैं—

स्त्रीसम्भोग सन्तापरूप है, मोह, अंगसाद और तृष्णाको बढ़ानेवाला है फिर भी यदि यह सुख है अर्थात् हे आत्मन्! यदि तू सुख मानता है तो ज्वरमें कौन कमी है उसे भी सुख मानना चाहिए ॥५३॥

'कट्वाम्लोष्णविदाहितीक्ष्णलवणक्रोधोपवासातप-
स्त्रीसम्पर्कतिलातसीदधिसुराचुक्रारनालादिभिः ।
भुक्तैर्जीर्यति भोजने शरदि च ग्रीष्मे सति प्राणिनां,
मध्याह्ने च तदर्धरात्रसमये पित्तप्रकोपो भवेत् ॥' [ ]

अक्षमा—ज्वरोऽपि सुखमस्तीति भावः । तदुक्तमार्षे—

'स्त्रीभोगो न सुखं चेतः सम्मोहाद् गात्रसादनात् ।
तृष्णानुबन्धात्संतापरूपत्वाच्च यथा ज्वरः ॥'

तथा—

'क्षारमम्बु यथा पीत्वा तृष्यत्यतितरां नरः ।
तथा विषयसंभोगैः परं संतर्षमृच्छति ॥' [महापु. ११।१६५, १९६]

अपि च—

'विषवद्विषयाः पुंसामापाते मधुरागमाः ।
अन्ते विपत्तिफलदास्तत्सतामिह को ग्रहः ॥
देह द्रविणसंस्कारसमुपार्जनवृत्तयः ।
जितकामे वृथा सर्वास्तत्कामः सर्वदोषभाक् ॥' [सो. उपा. ४१०, ४१५] ॥५३॥

अथ परदाररतौ सुखाभावमुपपादयति—

समरसरसरङ्गोद्गममृते च काचित् क्रिया न निर्वृत्तये ।
स कुतः स्यादनवस्थितचित्ततया गच्छतः परकलत्रम् ॥५४॥

विशेषार्थ—स्त्री सम्भोग और ज्वर दोनों समान हैं। स्त्री सम्भोगसे पित्त कुपित हो जाता है वह सन्ताप पैदा करता है और ज्वर तो सन्तापकारी होता ही है उसमें समस्त शरीर तपता है। हित अहितका विवेक न रहनेको मोह कहते हैं। कामीको जब काम सताता है तो उसे हित अहितकी समझ नहीं रहती। ज्वरमें भी ऐसी ही दशा होती है। सम्भोग भी शरीरकी सहनशीलताको नष्ट करता है और ज्वर भी। स्त्रीसम्भोगसे तृष्णा बढ़ती है और ज्वरसे भी तृष्णा अर्थात् प्यास बढ़ती है। आयुर्वेदमें कहा है कि स्त्रीसम्भोगसे पित्त प्रकुपित हो जाता है जब दोनों ही समान हैं तो सम्भोगकी तरह ज्वरको भी अच्छा मानो। यदि ज्वरमें सुख नहीं है तो सम्भोगमें भी सुख मानना अज्ञान है। स्वामी जिनसेनाचार्यने भी ऐसा ही कहा है—जैसे चित्तको मोहित (मूर्छित) करनेसे, शरीरको शिथिल बनानेसे, तृष्णा (प्यास) को बढ़ानेसे और सन्तापकारक होनेसे ज्वर सुखरूप नहीं है वैसे ही स्त्रीसम्भोग भी सुखरूप नहीं है। तथा, जैसे खारे जलको पीनेसे मनुष्यकी प्यास बढ़ती है वैसे ही विषय-सम्भोगसे परमतृष्णा सताती है।' सोमदेव सूरिने कहा है—विषके समान विषय प्रारम्भमें मीठे लगते हैं किन्तु अन्तमें विपत्तिमें डालते हैं। अतः विषयोंमें सज्जनोंका आग्रह कैसा! जिसने कामको जीत लिया उसका शरीर संस्कार, धनोपार्जन आदि व्यर्थ है—क्योंकि इन सबकी जड़ काम है' ॥५३॥

परस्त्री गमनमें सुखका अभाव बतलाते हैं—

समरसरूप रसरंगकी उत्पत्तिके बिना आलिंगन आदि कोई भी क्रिया सुखके लिए नहीं होती। चित्तके आकुल होनेसे परस्त्रीके साथ विषय सेवन करनेवालेको समरस रूप रसरंगकी उत्पत्ति कैसे हो सकती है ॥५४॥

समरसरसरङ्गोद्गमं—समसमायोगम्। यन्नीतिः—'स्त्रीपुंसयोर्न समसमायोगात्परं वशीकरणमस्ति।' [नीतिवा. २५।१०२]

उक्तं च—

बहिस्तास्ताः क्रियाः कुर्वन्नरः संकल्पजन्मवान्।
भावाप्तावेव निर्वाति क्लेशस्तत्राधिकः परम् ॥' [सो. उपा. ४११] ॥५४॥

अथ स्वदाररतस्यापि भावतो द्रव्यतश्च हिंसासंभवं नियमयति—

स्त्रियं भजन् भजत्येव रागद्वेषौ हिनस्ति च।
[1]योनिजन्तून् बहून् सूक्ष्मान् हिंस्रः स्वस्त्रीरतोऽप्यतः ॥५५॥

'हिंस्यन्ते तिलनाल्यां तप्तायसि विनिहिते तिला यद्वत्।
बहवो जीवा योनौ हिंस्यन्ते मैथुने तद्वत् ॥' [पुरुषार्थ. १०८]

किं च, ये कामप्रधानास्तैरपि योनौ जन्तुसद्भावा...........

'रक्तजाः कृमयः सूक्ष्मा मृदुमध्याधिशक्तयः।
जन्मवर्त्मसु कण्डूतिं जनयन्ति तथाविधाम् ॥' [वा. कामसू.] ॥५५॥

अथ ब्रह्मचर्यमहिमानमभिष्टौति—

स्वस्त्रीमात्रेण सन्तुष्टो नेच्छेद्योऽन्याः स्त्रियः सदा।
सोऽप्यद्भुतप्रभावः स्यात् किं वर्ण्यं वर्णिनः पुनः ॥५६॥

विशेषार्थ—समरस ही सर्वत्र सुखकी अनुभूतिका कारण है। यदि मनमें शान्ति नहीं है तो विषय भोगमें भी सुखकी अनुभूति नहीं होती। परायी स्त्रीके पास जानेवालेका मन इस बातसे व्याकुल रहता है कि अपना या उस स्त्रीका कोई आदमी देख न ले। परस्त्रीगामियोंकी हत्याके समाचार प्रायः छपा करते हैं। ऐसे परस्त्री गमनमें सुखकी अनुभूति कैसे हो सकती है। कहा है—अनेक प्रकारकी बाह्य क्रियाओंका करनेवाला कामी पुरुष रति सुख मिलने पर ही सुखी होता है किन्तु उसमें क्लेश अधिक ही है ॥५४॥

आगे स्वस्त्रीगमनमें भी द्रव्यहिंसा और भावहिंसा बतलाते हैं—

क्योंकि स्त्रीको सेवन करनेवाला पुरुष राग-द्वेष अवश्य ही करता है। तथा स्त्रीकी योनिमें रहनेवाले बहुतसे सूक्ष्म जीवोंका घात करता है अतः स्वस्त्रीमें मैथुन करनेवाला भी हिंसक है ॥५५॥

राग-द्वेषकी उत्पत्तिका नाम भावहिंसा है और किसी जीवके प्राणोंके घातको द्रव्यहिंसा कहते हैं। जो आदमी अपनी स्त्रीमें मैथुन करता है उसे उस समय रागकी बहुलता तो रहती ही है, किन्तु यदि बात उसकी इच्छाके प्रतिकूल होती है तो तत्काल क्रोधादि भाव पैदा होता है अतः भावहिंसा है। कामशास्त्रके पण्डित वात्स्यायनने भी कहा है कि स्त्रीकी योनिमें सूक्ष्म जन्तु रहते हैं जो योनिमें खाज पैदा करते हैं। रमणके समय उनका घात होता है। अतः स्वस्त्रीगामी भी हिंसक है। किन्तु स्वस्त्रीकी अपेक्षा परस्त्रीगामीके राग-द्वेष तीव्र होते हैं ॥५५॥

ब्रह्मचर्यकी महिमा कहते हैं—

जो केवल अपनी ही स्त्रीमें सन्तुष्ट रहता है और अन्य स्त्रियोंकी सदा इच्छा नहीं करता, वह भी अद्भुत प्रभाव वाला होता है फिर जो सभी स्त्रियोंका त्याग कर ब्रह्मचर्य व्रत

---

१. 'मैथुनाचरणे मूढ म्रियन्ते जन्तुकोटयः। योनिरन्ध्रसमुत्पन्ना लिङ्गसंघट्टपीडिताः।'—ज्ञानार्णव

पुन:—प्राग्वर्णितप्रायत्वादित्यर्थः ॥५६॥

इदानीं स्वभर्तृमात्रव्रतायाः स्त्रिया बहुमान्यतां दृष्टान्तेन व्याचष्टे—

[1]रूपैश्वर्यकलावर्यमपि सीतेव रावणम् ।
परपुरुषमुज्झन्ती स्त्री सुरैरपि पूज्यते ॥५७॥

उज्झन्ति—हेतौ शतृङ् । परपुरुषोज्झनेन सुरपूजाया जन्यत्वात् ।

उक्तं च—

'एकेन व्रतरत्नेन पुरुषान्तरवर्जिना ।' [ ] ॥५७॥

अथ ब्रह्माणुव्रतातिचारानाह—

इत्वरिकागमनं परविवाहकरणं विटत्वमतिचाराः ।
स्मरतीव्राभिनिवेशोऽनङ्गक्रीडा च पञ्च तुर्ययमे ॥५८॥

इत्वरिकागमनं—अस्वामिका असती गणिकात्वेन पुंश्चलीत्वेन वा परपुरुषानेति गच्छतीत्येवंशीला इत्वरी । तथा प्रतिपुरुषमेतीत्येवंशीलेति व्युत्पत्त्या वेश्यापीत्वरी । तत्र कुत्सायां के इत्वरिका तस्यां गमनमासेवनम् । इयं चात्र भावना—भाटिप्रदानान्नियतकालस्वीकारेण स्वकलत्रीकृत्य वेश्यां [वेत्वरिकां सेवमानस्य स्वबुद्धिकल्पनया स्वदारत्वेन] व्रतसापेक्षचित्तत्वादल्पकालपरिग्रहाच्च न भङ्गो, वस्तुतोऽस्वदारत्वाच्च भङ्ग इति भङ्गाभङ्गरूपत्वात् इत्वरिकागमनमतिचारः । [यात्वस्वामिका पुंश्चली वेश्या वा स्वीकृता] तद्गमनमप्यनाभोगादिनाऽतिक्रमादिना वातिचारः । स एष द्विविधोऽप्यतिचारः स्वदारसंतोषिण एव न तु परदारवर्जकस्य, धनक्रीताया इत्वरिकाया [वेश्यात्वेनान्यस्यास्त्वनाथतयैव परदा] रत्वात् । किंचास्य भाट्यादिना परेण

स्वीकार कर चुका है उसका पुनः गुणगान क्या करें अर्थात् मुनिधर्मके वर्णनमें उसकी प्रशंसा कर चुके हैं ॥५६॥

अब केवल अपने पतिका ही सेवन करनेका व्रत लेनेवाली स्त्रीकी बहुमान्यताको दृष्टान्त द्वारा स्पष्ट करते हैं—

जैसे रूप ऐश्वर्य और कलासे श्रेष्ठ भी रावणको सीताने स्वीकार नहीं किया, उसी तरह रूप सम्पन्न, ऐश्वर्य सम्पन्न और गीत, नृत्य आदि कलामें निपुण भी पर पुरुषको स्वीकार न करनेवाली स्त्री देवताओंसे भी पूजित होती है ॥५७॥

विशेषार्थ—सीता अपने शीलके कारण ही देवोंसे पूज्य हुई जब रामचन्द्रजीने उसके शीलकी परीक्षा लेनेके लिए सीताको अग्निकुण्डमें कूदनेकी आज्ञा दी तो सीताके कूदते ही उसके शीलसे प्रभावित देवोंने अग्निकुण्डको सरोवर बना दिया। यह उसके शीलका ही प्रभाव था ॥५७॥

आगे ब्रह्माणुव्रतके अतिचार कहते हैं—

सार्वकालिक ब्रह्मचर्याणुव्रतमें इत्वरिकागमन, परविवाहकरण, विटत्व, स्मरतीव्र अभिनिवेश और अनंगक्रीडा ये पाँच अतिचार होते हैं ॥५८॥

विशेषार्थ—ब्रह्मचर्याणुव्रतका पहला अतिचार है इत्वरिकागमन। जिसका कोई स्वामी नहीं है और जो गणिका या दुराचारिणीके रूपमें पुरुषोंके पास जाती है उसे इत्वरी कहते हैं। तथा 'जो प्रत्येक पुरुषके पास जाती है' वह इत्वरी है। इस व्युत्पत्तिके अनुसार

---

१. ऐश्वर्यराजराजोऽपि रूपमीनध्वजोऽपि च ।
सीतया रावण इव त्याज्यो नार्या नरः परः ।—योगशास्त्र २।१०३ ।"

किंचित्कालं परिगृहीतां वेश्यां गच्छतो भङ्गः कथंचित्परदारत्वात्तस्याः, लोके तु परदारत्वारूढेर्न भङ्ग [इति भङ्गाभङ्गरूपोऽतिचारः । अन्ये त्वपरिगृ-] हीतकुलाङ्गनागमनमप्यन्यदारवर्जिनोऽतिचारमाहु- स्तत्कल्पनया परस्य भर्तुरभावेनापरदारत्वादभङ्गो लोके च परदारतया रूढेर्भङ्ग [इति भङ्गाभङ्गरूपत्वा- त्तस्य । एतेनेत्वरिका] परिगृहीतापरिगृहीतागमनलक्षणमतिचारद्वयं तत्त्वार्थशास्त्रोद्दिष्टमपि संगृहीतं भवति । परविवाहकरणादयस्तु चत्वारो द्वयोरपि [स्फुरन्तीति प्रथमोऽतिचारः ॥१॥ परविवाहकरणं—] स्वापत्यव्यतिरिक्तानां कन्याफललिप्सया स्नेहसंबन्धादिना वा परिणयनविधानम् । एतच्च स्वदारसन्तोषवता स्वकलत्रात् परदारवर्जकेन च स्वकलत्र[वेश्याभ्यामन्यत्र मनोवाक्कायैर्मै-]थुनं न कार्यं न च करणीय- मिति व्रतं यदा गृहीतं भवति तदाऽन्यविवाहकरणं मैथुनकारणमित्यर्थतः प्रतिषिद्धमेव च भवति । तद्व्रती तु मन्यते [विवाह एवायं मया क्रियते न मैथुनं] कार्यत इति व्रतसापेक्षत्वाददतिचारः । कन्याफललिप्सा च सम्यग्दृष्टेरव्युत्पन्नावस्थायां संभवति । मिथ्यादृष्टेस्तु भद्रकावस्थायामनुग्र[हार्थं व्रतादाने सा संभवति । ननु परविवाहन-] वत् स्वापत्यविवाहनेऽपि समान एव दोष इति चेत् सत्यं । किं तर्हि ? यदि स्वकन्याया विवाहो न कार्यते तदा स्वच्छन्दचारिणी स्यात् । ततश्च कुल[समयलोकविरोधः स्यात् । विहितविवाहा तु] पतिनियन्त्रितत्वेन न तथा स्यादेष न्यायः पुत्रेऽपि कल्पनीयः । यदि पुनः कुटुम्बचिन्ताकारकः कोऽपि स्ववद् भ्रात्रादिर्भवेत्तदा स्वापत्यविवाहनेऽपि नियम एव श्रेयान् । यदा तु स्वदारसंतुष्टो विशिष्टसंतोषाभावादन्य- त्कलत्रं परिणयति तदाऽप्यस्यायमतिचारः स्यात्परस्य कलत्रान्तरस्य विवाहकरणमात्मना वि[वाहनमिति

वेश्या भी इत्वरी है। इस इत्वरी शब्दसे कुत्साके अर्थमें 'क' प्रत्यय करने पर इत्वरिका शब्द बनता है। उसमें गमन करना अर्थात् उसका सेवन करना इत्वरिकागमन नामक अतिचार है। पं. आशाधरजीके अनुसार इसमें यह भावना है कि उसका शुल्क देकर कुछ कालके लिए उसे स्वीकार करनेसे अपनी स्त्री मानकर वेश्या या दुराचारिणी स्त्रीको सेवन करनेवाले- की उसमें 'यह मेरी स्त्री है' ऐसी कल्पना होनेसे व्रत सापेक्ष होनेसे तथा थोड़े ही समयके लिए उसे स्वीकार करनेसे व्रतका भंग नहीं हुआ। और वास्तवमें स्वस्त्री न होनेसे व्रतका भंग हुआ इस प्रकार भंग और अभंग रूप होनेसे अतिचार है। क्योंकि इत्वरिका तो वेश्या है और अन्य स्त्री अनाथ होनेसे परनारी है। तथा शुल्क देकर कुछ कालके लिए स्वीकार की गयी वेश्याको जो भोगता है उसका व्रत भंग होता है क्योंकि वह कथंचित् परस्त्री है। किन्तु लोकमें वेश्या परस्त्री नहीं मानी जाती इसलिए व्रत भंग नहीं हुआ। अतः एकदेशका भंग और एकदेशका अभंग होनेसे अतिचार है। अन्य ग्रन्थकार तो अपरिगृहीत कुलांगनाके सेवनको भी परस्त्रीत्यागीके लिए अतिचार कहते हैं। उनकी कल्पनाके अनुसार उसका कोई स्वामी न होनेसे वह परस्त्री नहीं है इसलिए व्रतका भंग नहीं होता। किन्तु लोकमें उसे परस्त्री माना जाता है इसलिए व्रतका भंग होता है। इससे तत्त्वार्थ सूत्रमें कहे गये अपरि- गृहीत इत्वरिका और परिगृहीत इत्वरिका गमन नामक दोनों अतिचारोंका ग्रहण होता है। पं. आशाधरजीने उक्त भावना श्वेताम्बराचार्य हेमचन्द्रके योगशास्त्रकी स्वोपज्ञ टीकाका अनुसरण करते हुए की है। किन्तु हेमचन्द्रने यह स्पष्ट कर दिया है कि ये दोनों अतिचार स्वदारसन्तोषीके ही होते हैं परस्त्री त्यागीके नहीं क्योंकि दोनों ही परस्त्री हैं। (योग. ३।९४) दूसरा अतिचार है परविवाहकरण अर्थात् अपनी सन्तानसे अतिरिक्त दूसरोंकी सन्तानका कन्याफलकी इच्छासे अथवा पारस्परिक स्नेहके होनेसे विवाह कराना। जब स्वदारसन्तोषव्रती 'अपनी स्त्रीके सिवाय अन्यमें मन वचन कायसे मैथुन न करूँगा, न कराऊँगा' ऐसा व्रत लेता है तथा परस्त्रीका त्यागी 'अपनी स्त्री और वेश्याके अतिरिक्त अन्यमें मन वचन कायसे

व्याख्यानादिति द्वि-]तीयोऽतिचारः। विटत्वं—भण्डिमा तत्प्रधानकायवाक्प्रयोगः। स्मरतीव्राभिनिवेशः—कामेऽतिमात्रमाग्रहः परित्यक्तान्यव्यापारस्य तद्व्यवसायितेत्यर्थः। यथा [मुखक-] क्षोपस्थान्तरेष्ववितृप्ततया लिङ्गं प्रक्षिप्य महतीं वेलां निश्चलो मृत इवास्ते। चटक इव चटकां मुहुर्मुहुः स्त्रियमारोहति। जातबलक्षयश्च वाजिकरणान्युपयुङ्क्ते अनेन खल्वौषधादिप्रयोगेण गजप्रसेकी तुरगावमर्दी च पुरुषो भवतीति बुद्धया इति चतुर्थः ॥४॥ अनङ्गक्रीडा—अङ्गं साधनं देहावयवो वा। तच्चेह मैथुनापेक्षया योनिर्मेहनम्। ततोऽन्यत्र मुखादिप्रदेशे रतिः। यतश्च चर्मादिमयैर्लिङ्गैः स्वलिङ्गेन कृतार्थोऽपि स्त्रीणामवाच्यदेशं पुनः पुनः कुद्राति केशाकर्षणादिना वा क्रीडन् प्रबलरागमुत्पादयति। साप्यनङ्गक्रीडोच्यते। इह च श्रावकोऽत्यन्तपापभीरुतया ब्रह्मचर्यं चिकीर्षुरपि यदा वेदोदयासहिष्णुतया तत्कर्तुं न शक्नोति तदा यापनामात्रार्थं स्वदारसन्तोषादि प्रतिपद्यते। मैथुनमात्रेणैव यापनायां संभवन्त्यां विटत्वादित्रयमर्थतः प्रतिषिद्धमेव। तत्प्रयोगे हि न कश्चिद् गुणः प्रत्युत सद्योऽतिरागोद्दीपनं बलक्षयस्तात्कालिकीच्छिदा राजयक्ष्मादिरोगाः स्युः। तदुक्तम्—

'ऐदंपर्यमतो मुक्त्वा भोगानाहारवद् भजेत्।
देहदाहोपशान्त्यर्थमभिध्यानविहानये ॥' [सो. उपा. ४१७]

मैथुन न करूँगा न कराऊँगा,' ऐसा व्रत लेता है तब मैथुनका कारण जो अन्यविवाहकरण है उसका प्रतिषेध हो ही जाता है। किन्तु वह ऐसा समझता है कि मैं तो मात्र विवाह करा रहा हूँ, मैथुन तो नहीं कराता हूँ। इस प्रकार व्रतकी सापेक्षता होनेसे अतिचार है। कन्यादानके फलकी आकांक्षा सम्यग्दृष्टिको भी अव्युत्पन्न अवस्थामें होती है। मिथ्यादृष्टि भी जब भद्र अवस्थामें व्रत धारण करता है तब कन्यादानके फलकी इच्छा रहती है।

शंका—परविवाहकरणकी तरह अपनी सन्तानका विवाह करनेमें भी तो उक्त दोष लगता है?

समाधान—यह तो ठीक है किन्तु गृहस्थ यदि अपनी कन्याका विवाह न करे तो वह स्वच्छन्दचारिणी हो जाये। और तब कुल, लोक और आगमका विरोध उपस्थित हो। किन्तु विवाह हो जानेपर एक नियत पतिके होनेसे वैसा होना सम्भव नहीं है। यही बात पुत्रके सम्बन्धमें भी जानना। किन्तु यदि कुटुम्बकी चिन्ता करनेवाला कोई भाई वगैरह हो तो अपनी सन्तानका भी विवाह न करनेका नियम लेना ही श्रेष्ठ है। जब स्वदारसन्तोषी विशेष सन्तोष न होनेसे अपना दूसरा विवाह करता है तब भी यह अतिचार लगता है। 'पर' अर्थात् अन्य स्त्रीके साथ विवाहकरण अर्थात् अपना विवाह करना, यह परविवाहकरणकी व्याख्या करना चाहिए।

३. विटत्व भण्डपनको कहते हैं। भण्ड वचन बोलना तीसरा अतिचार है। ४. कामसेवनकी अत्यधिक लालसाको स्मरतीव्राभिनिवेश कहते हैं। अर्थात् अन्य सब काम छोड़कर उसीमें आसक्त रहना चतुर्थ अतीचार है। जैसे मुख, काँख और योनिमें लिंगको स्थापित करके बहुत समय तक मुर्देकी तरह निश्चल पड़े रहना। या जैसे चिड़ा चिड़ियापर बार-बार चढ़ता है उस तरह बार-बार स्त्रीभोग करना, और शक्ति क्षीण होनेपर बाजीकरणका प्रयोग करना कि अमुक औषधिके सेवनसे पुरुष घोड़े या हाथीकी तरह समर्थ होता है। ये सब कामसेवनकी तीव्र अभिलाषाके सूचक हैं। ५. पाँचवाँ अतिचार अनंगक्रीड़ा है। अंग साधनको या शरीरके अवयवको कहते हैं। यहाँ मैथुनकी अपेक्षा योनि और लिंग अंग हैं। उससे अन्यत्र मुख आदिमें रति करना अनंगक्रीड़ा है। या अपने लिंगसे कामसेवन करने-

एवं प्रतिषिद्धाचरणाद्भङ्गो नियमाबाधनाच्चाभङ्ग इत्येतेऽपि विटत्वादयस्त्रयोऽतिचाराः। स्त्रियास्तु पूर्ववत्परविवाहकरणादयः। प्रथमस्तु यदा स्वकीयपतिर्वारकदिने स्वपत्न्या परिगृहीतो भवति तदा सपत्नीवारकं विलुप्य तं परिभुञ्जानाया अतिचारोऽक्रमादिना च परपुरुषं स्वपतिं वा ब्रह्मचारिणमभिसरन्त्याः स्यात्। पञ्च। यत्स्वामी—

'अन्यविवाहकरणानङ्गक्रीडा विटत्वविपुलतृषः।
इत्वरिकागमनं चास्मरस्य पञ्च व्यतीचाराः॥' [रत्न. श्रा. ६०]

सोमदेवबुधस्त्विदमाह—

'परस्त्रीसङ्गमोऽनङ्गक्रीडाऽन्योपयमक्रिया।
तीव्रता रतिकैतव्ये हन्युरेतानि तद्व्रतम्॥' [सो. उपा. ४१८] ॥५८॥

पर भी चमड़े आदिके बने कृत्रिम लिंगोंसे स्त्रियोंके गुह्य स्थानको बार-बार कुरेदना, या केशोंके आकर्षण आदिके द्वारा क्रीड़ा करके प्रबल राग उत्पन्न करना भी अनंगक्रीड़ा है। यद्यपि श्रावक अत्यन्त पापभीरु होनेसे ब्रह्मचर्य पालना चाहता है। तथापि जब वेदके उदयको न सह सकनेके कारण ब्रह्मचर्यको पालनेमें असमर्थ होता है तब निर्वाहके लिए स्वदारसन्तोष आदि व्रत लेता है। मैथुन मात्रसे निर्वाह होनेपर विटत्व आदि तीनका प्रतिषेध वास्तवमें हो जाता है। क्योंकि उनसे कुछ भी लाभ नहीं है। बल्कि शीघ्रपतन, बलक्षय, मूर्च्छा, राजयक्ष्मा आदि रोग हो जाते हैं। कहा भी है—'आसक्तिको छोड़कर शरीरके सन्तापकी शान्ति तथा दुर्ध्यानको कम करनेके लिए भोगोंको आहारकी तरह भोगना चाहिए।' इस प्रकार निषिद्ध आचरण करनेसे व्रतका भंग और नियममें बाधा न करनेसे व्रतका अभंग होनेसे ये विटत्व आदि तीनों अतिचार रहते हैं।

अथवा स्वदारसन्तोषी 'मैंने वेश्या आदिमें मैथुनका ही त्याग किया है', ऐसा मानकर मैथुन नहीं करता किन्तु विटत्व आदि करता है। तथा परस्त्रीका त्यागी परस्त्रियोंमें मैथुन नहीं करता परन्तु अशिष्ट वचनका प्रयोग, आलिंगन आदि क्रिया करता है। अतः कथंचित् व्रतकी अपेक्षा होनेसे विटत्व आदि अतिचार होते हैं। स्वपति सन्तोष या परपुरुषत्यागका व्रत लेनेवाली स्त्रियोंमें भी परविवाहकरण आदि अतिचार पुरुषकी तरह लगा लेना चाहिए। पहला अतिचार इस प्रकार जानना कि यदि किसी पतिकी दो या अधिक स्त्रियाँ हैं और उसने प्रत्येक स्त्रीका दिन नियत कर दिया है। तो जिस दिन दूसरी स्त्रीका नियत है उस दिन स्वयं अपने पतिको भोगनेसे प्रथम अतिचार लगता है। अथवा अपने पतिको परपुरुष जैसा मानकर भोग करनेसे प्रथम अतिचार होता है। हेमचन्द्राचार्यने स्त्रीके स्वपुरुषसन्तोष और परपुरुषत्याग व्रतको एक ही माना है। तथा स्वदारसन्तोषव्रती पुरुषके पाँचों अतिचार कहे हैं और परस्त्रीत्यागीके अन्तिम तीन ही अतिचार कहे हैं। तथा एक दूसरे मतके अनुसार परस्त्रीत्यागीके पाँच और स्वदारसन्तोषीके तीन अतिचार कहे हैं। इससे प्रतीत होता है कि ब्रह्मचर्याणुव्रतके अतिचारोंकी व्याख्यामें मतभेद है। पं. आशाधर जीने जो स्वदारसन्तोषीके लिए वेश्यासेवनको अतिचार कहा है उसपर सोमदेव सूरिके ब्रह्माणुव्रतके लक्षणका भी प्रभाव प्रतीत होता है। आचार्य समन्तभद्रने परदारनिवृत्ति और स्वदार सन्तोषको भिन्न नहीं माना। एक ही माना है। उन्होंने अन्य विवाहकरण, अनंगक्रीड़ा, विटत्व, विपुलतृषा, और इत्वरिकागमन ये पाँच अतिचार कहे हैं और सोमदेव

अथ परिग्रहपरिमाणाणुव्रतं व्याचष्टे—

ममेदमिति सङ्कल्पश्चिदचिन्मिश्रवस्तुषु ।
ग्रन्थस्तत्कर्शनात्तेषां कर्शनं तत्प्रमाव्रतम् ॥५९॥

मिश्रं—चेतनाचेतनम् । बहिः पुष्पवाटिकादिकमन्तश्च मिथ्यात्वादिकम् । तत्प्रमाव्रतं—परिग्रह-परिमाणाख्यमणुव्रतम् । उक्तं च—

'ममेदमिति संकल्पो बाह्याभ्यन्तरवस्तुषु ।
परिग्रहो मतस्तत्र कुर्याच्चेतो निकुञ्चनम् ॥' [सो. उपा. ४३२]

अपि च—

'धनधान्यादिग्रन्थं परिमाय ततोऽधिकेषु निस्पृहता ।
परिमितपरिग्रहः स्यादिच्छापरिमाणनामापि ॥' [रत्न. श्रा. ६१] ॥५९॥

सूरिने परस्त्रीसंगम, अनंगक्रीड़ा, अन्य विवाहकरण, तीव्रता और विटत्वको अतिचार कहा है। उन्होंने इत्वरिकागमनके स्थानमें 'परस्त्रीसंगम' रखा है क्योंकि इत्वरिकामें तो वेश्या भी आ जाती है ॥५८॥

अब परिग्रहपरिमाण अणुव्रतको कहते हैं—

चेतन, अचेतन और चेतन-अचेतन वस्तुओंमें 'ये मेरी है' इस प्रकारके संकल्पको परिग्रह कहते हैं। और उस ममत्व परिणामरूप परिग्रहको कम करके उन चेतन, अचेतन और चेतन-अचेतन वस्तुओंका कम करना परिग्रहपरिमाण व्रत है ॥५९॥

विशेषार्थ—स्त्री-पुत्र आदि चेतन वस्तु हैं। घर-सुवर्ण आदि अचेतन वस्तु हैं। और बाह्य पुष्पवाटिका आदि तथा अभ्यन्तर मिथ्यात्व आदि चेतन-अचेतन हैं। ये चेतन या अचेतन या चेतन-अचेतन वस्तु मेरी हैं, मैं इनका स्वामी हूँ इस प्रकारके मानसिक अध्यवसायको—ममत्वपरिणामको परिग्रह कहते हैं। तत्त्वार्थसूत्रमें भी मूर्च्छाको परिग्रह कहा है। उसकी व्याख्या करते हुए पूज्यपाद स्वामीने सर्वार्थसिद्धिमें कहा है—बाह्य गाय, भैंस मणि मुक्ता आदि चेतन-अचेतन वस्तुओंके तथा राग आदि अभ्यन्तर परिग्रहोंके संरक्षण, उपार्जन, संस्कार आदिरूप संलग्नताको मूर्छा कहते हैं। इसपरसे यह प्रश्न होता है कि यदि ममत्व परिणामरूप मूर्च्छा परिग्रह है तो बाह्य सम्पत्ति स्त्री-पुत्रादि परिग्रह नहीं कहलायेंगे; क्योंकि मूर्च्छाको परिग्रह माननेसे तो आध्यात्मिकका ही ग्रहण होता है। इसके समाधानमें कहा है कि आपका कहना सत्य है। ममत्वभाव ही प्रधान परिग्रह है अतः उसीका ग्रहण किया है। बाह्य परिग्रहके नहीं होते हुए भी जिसमें यह मेरा है इस प्रकारका ममत्वभाव है वह परिग्रही होता है। तब पुनः प्रश्न हुआ कि तब तो बाह्य परिग्रह नहीं ही होती। इसके उत्तरमें कहा है कि बाह्य भी परिग्रह होती है क्योंकि वह मूर्छाका कारण है। स्त्री, पुत्र, धनादिके होनेपर ममत्वभाव होता है और जहाँ ममत्वभाव हुआ, तत्काल उसके संरक्षण आदिकी चिन्ता हो जाती है। किन्तु परिग्रहका मूल ममत्वभाव है इसलिए उसमें कमी करके बाह्य परिग्रहको कम करना परिग्रहपरिमाण व्रत है। इसीसे स्वामी समन्तभद्रने

---

१. 'मूर्च्छा परिग्रहः' ।—त. सू. ७।१७ ।
'या मूर्छा नामेयं विज्ञातव्यः परिग्रहो ह्येषः ।
मोहोदयादुदीर्णो मूर्च्छा तु ममत्वपरिणामः ॥

अथान्तरङ्गसङ्गनिग्रहोपायमाह—

उद्यत्क्रोधादिहास्यादिषट्कवेदत्रयात्मकम् ।
अन्तरङ्गं जयेत्सङ्गं प्रत्यनीकप्रयोगतः ॥६०॥

उद्यन्ति—विपच्यमानानि । उदितानां दुर्जयत्वात् । क्रोधादयः अनन्तानुबन्ध्यप्रत्याख्यानवर्जास्ता-न्मिथ्यात्वसहितान्निगृह्यैव देशसंयमस्य प्रवृत्तत्वात् । प्रत्यनीकप्रयोगतः—उत्तमक्षमादिभावनया ॥६०॥

इस व्रतका दूसरा नाम इच्छापरिमाण दिया है। उन्होंने धन-धान्य आदिका परिमाण करके उससे अधिककी इच्छा न करनेको परिग्रहपरिमाण व्रत कहा है और उसका दूसरा नाम इच्छापरिमाण कहा है। इच्छाका परिमाण करके ही परिग्रहका परिमाण किया जाता है। यदि इच्छाकी सीमा न हो तो परिग्रहका परिमाण करना व्यर्थ ही है। मनुष्यकी तृष्णामें उससे कमी नहीं होती। और तृष्णाको कम करनेके लिए ही यह व्रत होता है। अमृतचन्द्राचार्यने भी अपने पुरुषार्थसिद्ध्युपायमें उक्त सब कथन किया है ॥५९॥

आगे अन्तरंग परिग्रहके निग्रहका उपाय कहते हैं—

उदयको प्राप्त प्रत्याख्यानावरण और संज्वलन क्रोध-मान-माया-लोभ, हास्य-रति-अरति-शोक-भय-जुगुप्सा, स्त्रीवेद-पुरुषवेद-नपुंसक वेद इस अन्तरंग परिग्रहको इनके विरोधी उत्तम क्षमा आदि भावनाओंके द्वारा परिग्रह परिमाणव्रती वशमें करे ॥६०॥

विशेषार्थ—परिग्रहके मूल भेद दो हैं—अन्तरंग और बाह्य। अन्तरंग परिग्रहके चौदह भेद हैं और बाह्य परिग्रहके दस भेद हैं। मिथ्यात्व, क्रोध-मान-माया-लोभ, हास्य, रति-अरति, शोक-भय, जुगुप्सा, स्त्रीवेद, पुरुषवेद और नपुंसक वेद, ये सब मोहनीय कर्मका परिवार अन्तरंग परिग्रह है। यहाँ ग्रन्थकारने मिथ्यात्वको नहीं गिनाया है। तथा क्रोधादिके चार प्रकारोंमें-से भी अनन्तानुबन्धी और अप्रत्याख्यानावरणको नहीं गिनाया है। क्योंकि मिथ्यात्वके साथ इन आठ कषायोंका निग्रह करनेपर ही सम्यग्दर्शनपूर्वक देशसंयम प्रकट होता है। और यहाँ देशसंयमीका ही कथन है। अतः उसके शेष आठ कषाय, हास्य आदि छह और तीन वेद ही रहते हैं। यहाँ उनके साथ 'उद्यत्' शब्दका प्रयोग किया है। उसका अर्थ होता है उदयको प्राप्त। जब कोई कषाय उदयमें आती है तो उसको जीतना कठिन होता है। इनको जीतनेका उपाय है उत्तम क्षमा, उत्तम मार्दव, उत्तम आर्जव, उत्तम शौच आदिकी भावना। उसीसे इनको जीता जा सकता है ॥६०॥

मूर्छालक्षणकरणात्सुघटा व्याप्तिः परिग्रहत्वस्य ।
सग्रन्थो मूर्च्छावान् विनापि किल शेषसंगेभ्यः' ॥—पुरुषार्थः १११-११२ आदि ।

१. 'मिथ्यात्ववेदरागास्तथैव हास्यादयश्च षड्दोषाः ।
चत्वारश्च कषायाश्चतुर्दशाभ्यन्तरा ग्रन्थाः' ॥—पुरुषार्थ. ११६ श्लो. ।

२. 'तत्त्वार्थाश्रद्धाने निर्युक्तं प्रथममेव मिथ्यात्वम् ।
सम्यग्दर्शनचौराः प्रथमकषायाश्च चत्वारः ॥
प्रविहाय च द्वितीयान् देशचरित्रस्य संमुखायातः ।
नियतं ते हि कषाया देशचरित्रं निरुन्धन्ति ॥
निजशक्त्या शेषाणां सर्वेषामन्तरङ्गसङ्गानाम् ।
कर्तव्यः परिहारो मार्दवशौचादिभावनया ॥'—पुरुषार्थ. १२४-१२६ ।

अथ बहिरङ्गसङ्गत्यागविधिमाह—

अयोग्यासंयमस्याङ्गं सङ्गं बाह्यमपि त्यजेत् ।
मूर्छाङ्गत्वादपि त्यक्तुमशक्यं कृशयेच्छनैः ॥६१॥

अयोग्यः—श्रावकस्य कर्तुमनुचितोऽसंयमः । स चेहानारम्भजस्त्रसवधो व्यर्थः स्थावरवधः परदारगमनादिश्च । तदुक्तम्—

'बहिरङ्गादपि सङ्गाद्यस्मात्प्रभवत्यसंयमोऽनुचितः ।
परिवर्जयेदशेषं तमचित्तं वा सचित्तं वा ॥' [पुरुषार्थ. १२७]

कृशयेत्—स्वल्पयेत् । उक्तं च—

'योऽपि न शक्यस्त्यक्तुं धनधान्यमनुष्यवास्तुवित्तादिः ।
सोऽपि तनूकरणीयो निवृत्तिरूपं यतस्तत्त्वम् ॥' [पुरुषा. १२८]

शनैः—मनाक् मनाक् । परिग्रहसंज्ञाया अनादिसंतत्या प्रवर्तमानत्वात् सहसा तत्त्यागस्य कर्तुमशक्यत्वात्कृतस्यापि तद्वासनावशाद्भङ्गसम्भावनाच्चैतदुच्यते ॥६१॥

एतदेव प्रपञ्चयन्नाह—

देशसमयात्मजात्याद्यपेक्षयेच्छां नियम्य परिमायात् ।
वास्त्वादिकमामरणात्परिमितमपि शक्तितः पुनः कृशयेत् ॥६२॥

जात्यादि । आदिशब्देन स्वान्वयवयः.........................॥६२॥

आगे बहिरंग परिग्रहको त्यागनेकी विधि बतलाते हैं—

मूर्च्छाका कारण होनेसे बाह्य परिग्रह श्रावकोंके न करने योग्य असंयमका कारण होती है। इसलिए पंचम अणुव्रतीको उसे भी छोड़ना चाहिए। और जिस परिग्रहको छोड़नेमें असमर्थ है उसे धीरे-धीरे घटाना चाहिए ॥६१॥

विशेषार्थ—बाह्य परिग्रह दस हैं। वे सब मोहके उदयमें निमित्त हैं। इसलिए श्रावकके लिए न करने योग्य असंयमका कारण है। संकल्पी त्रसहिंसा, व्यर्थ स्थावर हिंसा, परस्त्रीगमन आदि असंयम श्रावकके करने योग्य नहीं हैं। परिग्रहकी बहुलतामें ये सब होता है इसलिए बाह्य परिग्रह भी छोड़ना चाहिए। किन्तु परिग्रह संज्ञा तो अनादिकालसे चली आ रही है, उसका त्याग सहसा नहीं किया जा सकता। और कर भी दिया जाये तो परिग्रह संज्ञाकी अनादि वासनाके वश त्यागका भंग होनेकी सम्भावना रहती है। इसलिए कहते हैं कि परिग्रहका छोड़ना शक्य न हो तो धीरे-धीरे कम करना ही उचित है। अमृतचन्द्राचार्यने कहा है—'बाह्य परिग्रहसे भी अनुचित असंयम होता है इसलिए समस्त सचित्त और अचित्त परिग्रह छोड़ना चाहिए। जो धन, धान्य, मनुष्य, मकान, धन आदि छोड़नेमें अशक्य है उसे भी कम करना चाहिए, क्योंकि तत्त्व तो निवृत्तिरूप है' ॥६१॥

उसी कम करनेकी विधिको बतलाते हैं—

श्रावक देश, काल, आत्मा स्वयं, और जाति आदि की अपेक्षा परिग्रह-विषयक तृष्णाको सन्तोषकी भावनाके द्वारा रोककर मकान, खेत, धन, धान्य, दासी-दास, पशु, शय्या, आसन, सवारी और भाण्ड इन दस प्रकारकी परिग्रहोंका जीवनपर्यन्तके लिए परिमाण करे। तथा किये हुए परिमाणवाली परिग्रहको भी निष्परिग्रहत्वकी भावनासे उत्पन्न हुई अपनी शक्तिके अनुसार पुनः कम करे ॥६२॥

विशेषार्थ—परिग्रहका परिमाण करते समय श्रावकको अपने परिवार, उसके रहन-

अविश्वासतमोनक्तं लोभानलघृताहुतिः ।
आरम्भमकराम्भोधिरहो श्रेयः परिग्रहः ॥६३॥
'असन्तोषमविश्वासमारम्भं दुःखकारणम् ।
मत्वा मूर्छाफलं कुर्यात्परिग्रहनियन्त्रणम् ॥' [योगशा. २।१०६] ॥६३॥

अथ पञ्चमाणुव्रतातिचारपञ्चकनिषेधविधिमाह—

वास्तुक्षेत्रे योगाद्धनधान्ये बन्धनात् कनकरूप्ये ।
दानात्कुप्ये भावान्न गवादौ गर्भतो मितिमतीयात् ॥६४॥

वास्तु—गृहादि ग्रामनगरादि च । तत्र गृहादि त्रेधा, खातोच्छ्रिततदुभयभेदात् । तत्र खातं भूमिगृहादिक मुच्छ्रितं प्रासादादिकम् । खातोच्छ्रितं च भूमिगृहस्योपरि गृहादिसन्निवेशः । क्षेत्रं सस्योत्पत्तिभूमिः । तत्त्रेधा— सेतुकेतूभयभेदात् । तत्र सेतुक्षेत्रं यदरघट्टादिजलेन सिच्यते । केतुक्षेत्रमाकाशोदकपातनिष्पाद्यसस्यम् ।

सहन तथा देश-काल और जातिका ध्यान रखकर ही परिमाण करना चाहिए जिससे आगे निर्वाहमें कोई कठिनाई उपस्थित न हो। इसके साथ ही ऐसा लम्बा-चौड़ा परिमाण भी न लेना चाहिए जिसमें कुछ त्यागना ही न पड़े। उदाहरणके लिए पासमें दस हजारकी पूँजी होते हुए एक लाखका परिणाम करना एक तरहसे निरर्थक है। किन्तु कुछ भी परिमाण न करनेसे परिमाण करना श्रेष्ठ है उससे मनुष्यकी तृष्णापर नियन्त्रण होता है। यह इस व्रतका उद्देश्य भी है ॥६२॥

वक्रोक्ति द्वारा परिग्रहके दोष बतलाते हैं—

अविश्वासरूप अन्धकारके लिए रात्रिके समान, लोभरूपी अग्निके लिए घीकी आहुतिके समान और आरम्भरूपी मगरमच्छोंके लिए समुद्रके समान परिग्रह पुरुषोंके लिए सेवनीय है अथवा कल्याणकारी है यह आश्चर्य है ॥६३॥

विशेषार्थ—जैसे रात्रि अन्धकारका कारण है वैसे ही परिग्रह अविश्वासका कारण है। परिग्रही व्यक्ति किसीका भी विश्वास नहीं करता। रात्रिमें सोता नहीं, और दिनमें भी सशंक रहता है कि कोई मेरा धन न हर ले। तथा जैसे आगमें घी डालनेसे आग प्रज्वलित होती है वैसे ही परिग्रहके बढ़नेसे लोभ बढ़ता है। और लोभ आगके ही समान चित्तको सन्ताप देनेवाला होता है। तथा जैसे समुद्रमें मगरमच्छ रहते हैं वैसे ही परिग्रह होनेसे मनुष्य खूब रोजगार-धन्धा फैलाता है। उसकी कभी तृप्ति नहीं होती। ऐसे परिग्रहको लोग अच्छा मानते हैं यही आश्चर्य है। कहा है—'परिग्रहका फल असन्तोष, अविश्वास, आरम्भ और ममत्व है जो दुःखका कारण है इसलिए परिग्रहका नियन्त्रण करना चाहिए' ॥६३॥

आगे परिग्रह परिमाण अणुव्रतके पाँच अतिचारोंका निषेध करते हैं—

घर और खेतमें दूसरा घर और खेत मिलाकर, धन और धान्यमें बन्धनको लेकर, सोने-चाँदीमें दानसे, सोने-चाँदीसे अतिरिक्त काँसा आदिमें भावसे और गाय-भैंस आदिमें गर्भसे किये गये परिग्रह परिमाणकी मर्यादाका उल्लंघन श्रावकको नहीं करना चाहिए ॥६४॥

विशेषार्थ—तत्त्वार्थसूत्रमें क्षेत्र, वास्तु, हिरण्य, सुवर्ण, दासी, दास, धन-धान्य और कुप्यके प्रमाणके अतिक्रमको परिग्रह परिमाण व्रतके अतीचार कहा है। पुरुषार्थसिद्ध्युपाय

---

१. 'बन्धनाद् भावतो गर्भाद्योजनाद् दानतस्तथा ।
प्रतिपन्नव्रतस्यैष पञ्चधाऽपि न युज्यते ॥—योगशास्त्र ३।९६ ।

उभयमुभयजलनिष्पाद्यसस्यम् । वास्तु च क्षेत्रं च वास्तुक्षेत्रमिति समाहारनिर्देशोऽत्र, उत्तरत्र च बाह्य-ग्रन्थस्य पञ्चविधत्वकल्पनया अतिचारपञ्चकस्य सुखयोजनार्थम् । तत्र वास्तुक्षेत्रे योगाद् भित्तिवृत्त्याद्यपनयनेन वास्तुक्षेत्रान्तरमीलनान्तरमाश्रित्य परिमितपरिग्रहः श्रावको, न मितिमतीयात्— देवगुरुसाक्षिकं व्रतग्रहण-काले यावज्जीवं चतुर्मासादिकालावधि वा प्रतिपन्नां संख्यां नातिक्रमेत् । वास्त्वादिकमेव मया विपुलीक्रियते, न प्रतिपन्ना तत्संख्यातिक्रम्यत इति बुद्धया तद्विषयं वा हस्तादिपरिमाणं सहसाकारादिना नातिक्रमेदन्यथा वास्तुक्षेत्रप्रमाणातिक्रमो नाम प्रथमोऽतिचारः स्याद् । व्रतसापेक्षस्यैव स्वबुद्धया व्रतभङ्गमकुर्वत एवातिचारत्व-व्यवस्थापनात् ॥१॥ धनं गणिमादिभेदाच्चतुर्धा । तत्र गणिमं पूगजागजातिफलादि । धरिमं कुङ्कुमकर्पूरादि । मेयं स्नेहलवणादि । परीक्ष्यं रत्नवस्त्रादि । धान्यं व्रीह्यादिभेदात् सप्तदशधा । उक्तं च—

'व्रीहिर्यवो मसूरो गोधूमो मुद्गमाषतिलचणकाः ।
अणवः प्रियङ्गुकोद्रव-मयूष्ठकाः शालिराढक्यः ॥' [ ]

किंच, कुलायकुलत्थोषणः सप्तदशधान्यानीति । धनं च धान्यं च धनधान्यम् । तत्र स्वगृहगतधनादे-विक्रये व्यये वा कृते गृहीष्यामीति भावनया बन्धनाद् रज्ज्वादिनियन्त्रणलक्षणात् सत्यङ्कारदानादिरूपाद्वा स्वीकृत्य धनधान्यं विक्रेतृगृह एवावस्थापयन् मितिमतीयादन्यथा द्वितीयोऽतिचारः स्यात् ॥२॥ कनकं सुवर्णं

(श्लो. १८७) में भी ऐसा ही कथन है। किन्तु इनके प्रमाणका अतिक्रम कैसे किया जाता है इसको पं. आशाधरजीने स्पष्ट किया है। इस श्लोककी टीकामें स्पष्ट करते हुए उन्होंने कहा है—'घर आदि और ग्राम-नगर आदिको वास्तु कहते हैं। घर आदि तीन प्रकारके होते हैं—खात, उच्छ्रित और खात-उच्छ्रित। भूमि खोदकर जो तलघर बनाया जाता है वह खात है। भूमिके ऊपर जो महल आदि बनाया जाता है वह उच्छ्रित है। और नीचे तलघरके साथ जो ऊपर मकान बनाया जाता है वह खात-उच्छ्रित है। जिस भूमिमें अनाज पैदा होता है उसे क्षेत्र कहते हैं। उसके भी तीन भेद हैं—सेतु, केतु और सेतुकेतु। जिन खेतोंकी सिंचाई रहट वगैरहके पानीसे होती है उन्हें सेतु कहते हैं। जिन खेतोंमें वर्षाके जलसे धान्य पैदा होता है उन्हें केतु कहते हैं। और जिनमें दोनों प्रकारके जलसे अन्न पैदा होता है उन खेतोंको सेतुकेतु कहते हैं। बाह्य परिग्रहको पाँच मानकर पाँच अतीचारोंका सुख पूर्वक बोध करानेके लिए यहाँ वास्तु और क्षेत्रको मिला दिया है। वास्तु और क्षेत्रमें बीचकी दीवार वगैरह हटाकर मकानमें दूसरा मकान और खेतमें दूसरा खेत मिलाकर परिग्रह परिमाण व्रतके धारी श्रावकको देव गुरुकी साक्षि पूर्वक व्रत ग्रहण करते समय जीवन पर्यन्तके लिए या चतुर्मास आदिकी अवधिके लिए स्वीकार की हुई संख्याका उल्लंघन नहीं करना चाहिए। मैं तो मकान वगैरहको बढ़ाता हूँ, स्वीकार की गयी संख्याको तो नहीं बढ़ाता' इस प्रकारकी भावनासे परिमाणका अतिक्रम नहीं करना चाहिए। अन्यथा वास्तुक्षेत्र प्रमाणातिक्रम नामका प्रथम अतिचार होता है; क्योंकि जो व्रतकी अपेक्षा रखते हुए अपनी बुद्धिसे व्रत भंग नहीं करता उसे ही अतिचार कहा है ॥१॥

धनके चार भेद हैं। सुपारी जातिफल आदिको गणिम कहते हैं। केसर कपूर आदि-को धरिम कहते हैं। तेल नमक आदिको मेय कहते हैं। रत्न वस्त्र आदिको परीक्ष्य कहते हैं। धान्य पन्द्रह प्रकारके होते हैं। धान, जौ, मसूर, गेहूँ, मूँग, उड़द, तिल, चना, अणव, प्रियंगु, कोदो, शालि, अरहर वगैरह। अपने घरमें वर्तमान धन आदिके बिक जाने पर या खर्च हो जाने पर लेलूँगा, इस भावनासे धन धान्यको विक्रेताके घरमें ही बन्धक रखकर परिमाणका अतिक्रम नहीं करना चाहिए। अन्यथा दूसरा अतिचार होता है ॥२॥

घटितमघटितं चानेकप्रकारमेवं रूप्यमपि। कनकं च रूप्यं च कनकरूप्यम्। तत्र दानात् स्वव्रतकालावधौ पूर्णे गृहिष्यामीत्यभिप्रायेण तुष्टराजादितः स्वप्रतिपन्नसंख्यातोऽधिके लब्धेऽन्यस्मै वितरणान्न मितिमतीयादन्यथा तृतीयोऽतिचारः स्यात्। कुप्ये रूप्यसुवर्णव्यतिरिक्ते कांस्यलोहताम्रसीसक-त्रपु-मृद्भाण्ड-वंशविकारोदङ्किका-काष्ठमञ्चकमञ्चिका-मसूरक-रथ-शकट-हलप्रभृतिद्रव्ये। भावात् द्वयोर्द्वयोर्मिलनैनैकीकरणरूपात्पर्यायान्तराद् व्रतावधौ पूर्णे गृहीष्यामीत्यन्यप्रदेयतया व्यवस्थापनेनार्थित्वरूपादभिप्रायाद्वा न मितिमतीयादन्यथा चतुर्थोऽतिचारः स्यात्। कुप्यस्य हि या संख्या कृता तस्याः कथंचिद्द्विगुणे सति व्रतभङ्गभयाद्भावतो द्वयोर्द्वयोर्मिलनेनैकीकरणरूपात्पर्यायान्तरात् स्वाभाविकसंख्याबारनात् [-ख्याबाधनात्] संख्यामात्रपूरणाच्चातिचारः। अथवा भावतोऽभिप्रायादर्थित्वलक्षणाद् विवक्षितकालावधेः परतो गृहिष्याम्यतो नान्यस्मै प्रदेयमिति पराप्रदेयतया व्यवस्थापयतोऽसौ स्यात् ॥४॥ गवादौ—गौरादिर्यस्य द्विपदचतुष्पदवर्गस्यासौ गवादिः। आदिशब्देन हस्त्यश्वमहिषादिचतुष्पदानां शुकसारिकादिद्विपदपक्षिणां पत्न्युपरुद्धदासपदात्यादीनां च संग्रहः। तत्र गर्भतो न मितिमतीयात्। गवादीनां गर्भग्रहणादुपलक्षणादन्येषां यथास्वमनाभोगादिनातिक्रमादिना वा संख्यां नातिक्रमेत्। गोमहिषीवडवादेर्हि विवक्षितसंवत्सराद्यवधिमध्य एव प्रसवे अधिकगवादिभावाद् व्रतभङ्गः स्यादिति तद्भयात् कियत्यपि काले गते गर्भग्रहणाद् गर्भस्थगवादिभावेन बहिस्तदभावेन च कथंचिद् व्रतभङ्गात् पञ्चमोऽतिचारः स्यात् ॥५॥ एते च—

'क्षेत्रवास्तुहिरण्यसुवर्णधनधान्यदासीदासकुप्यप्रमाणातिक्रमाः' [त. सू.]

इति तत्त्वार्थमतेन पञ्चातिचाराः प्ररूपिताः। स्वामिमतेन त्विमे—

'अतिवाहनातिसंग्रहविस्मयलोभातिभारवहनानि।
परिमितपरिग्रहस्य च विक्षेपाः पञ्च लक्ष्यन्ते ॥' [रत्न. श्रा. ६२]

सोना-चाँदी घड़ा हुआ या बिना घड़ा अनेक प्रकारका होता है। अपने व्रतके समयकी अवधि पूरी होनेपर ग्रहण कर लूँगा इस भावनासे राजाने प्रसन्न होकर अपनी मर्यादासे अधिक द्रव्य दिया तो दूसरेके यहाँ रखकर परिमाणका अतिक्रमण नहीं करना चाहिए। अन्यथा तीसरा अतिचार होता है ॥३॥

चाँदी-सोनेसे अतिरिक्त काँसा, लोहा, ताँबा, सीसा, मिट्टीके बरतन, बाँससे बनी वस्तुएँ, काष्ठके मंच, रथ, गाड़ी, हल वगैरह कुप्य कहाते हैं। दो-दो बरतनोंको मिलाकर एक करना या व्रतकी अवधि पूरी हो जानेपर ग्रहण करूँगा इस अभिप्रायसे दूसरेको देकर परिमाणका उल्लंघन नहीं करना चाहिए। अन्यथा चौथा अतिचार होता है। कुप्यका जो परिमाण किया था उसको किसी प्रकार दुगुना कर लेनेसे, व्रत भंग होनेके भयसे, भावसे, दो-दो वस्तुओंको मिलाकर एक करनेसे, स्वाभाविक संख्यामें बाधा आनेसे तथा संख्या मात्र पूरी करनेसे अतीचार होता है। अथवा किसी वस्तुकी आवश्यकताके अभिप्रायसे उस वस्तुके स्वामीसे यह कहकर कि अमुक कालके बाद मैं इसे ले लूँगा, तुम किसीको देना नहीं, वह वस्तु उसीके पास रखनेसे भी अतिचार होता है ॥४॥

गाय आदिसे हाथी, घोड़ा, भैंस आदि चौपाये, तोता, मैना आदि दोपाये, और पत्नीके द्वारा रखे गये दास, प्यादा आदि लेना। इनमें गर्भसे परिमाणका उल्लंघन नहीं करना चाहिए। अर्थात् गाय, भैंस, घोड़ी वगैरह यदि मेरी ली हुई मर्यादामें ही बच्चा देंगी तो संख्या बढ़ जानेसे व्रत भंग होगा। इस भयसे कितना ही काल बीतनेपर उन्हें गर्भ धारण कराना पाँचवाँ अतिचार है। ये पाँच अतिचार तत्त्वार्थ सूत्रके अनुसार होते हैं। स्वामी

अत्रातिवाहनं लोभावेशवशाद् वृषादीनां शक्त्यतिक्रमेण हठान्मार्गे नयनम् । अतिसंग्रहः—इदं धान्यादिकमग्रे विशिष्टं लाभं च दास्यतीति लोभावेशादतिशयेन तत्संग्रहणम् । अतिविस्मयः—धान्यादौ प्रपन्नलाभेन विक्रीते मूलतोऽप्यसंगृहीते वा तत्क्रयाणकेनाधिकेऽर्थे लब्धे लोभावेशादधिकविषादः । अतिलोभः—विशिष्टेऽर्थे लब्धेऽपि अधिकलाभाकाङ्क्षा । अतिभारवाहनं—लोभावेशादधिकभारारोपणम् । सोमदेवपण्डितस्त्विदमाह—

'कृतप्रमाणाल्लोभेन धनादधिकसंग्रहः ।
पञ्चमाणुव्रतज्यानिं करोति गृहमेधिनाम् ॥' [सो. उपा. ४४४]

तदेतच्च 'परेऽप्यूह्यास्तथाऽत्ययाः' इत्यनेन संगृहीतम् ॥६४॥

[एवं निर्मलीकृतपरिग्रहव्रतपालकस्य फलं दृष्टान्तेन स्फुटयन्नाह—]

यः परिग्रहसंख्यानव्रतं पालयतेऽमलम् ।
जयवज्जितलोभोऽसौ पूजातिशयमश्नुते ॥६५॥

[यः पालयते रक्षयति । किं तत्, परिग्रहसंख्यानव्रतम् । कथं कृत्वा, अमलं यथोक्तातिचाररहितम् । असौ श्रावकः पूजातिशयं शक्रादिकृतमर्चनामश्नुते लभते । किंविशिष्टः, यतो जितलोभः जितलोभत्वादित्यर्थः । किंवत्, जयवत् मेघस्वराख्यकुरुराजो यथा ॥६५॥]

समन्तभद्रके मतसे पाँच अतिचार इस प्रकार हैं—अतिवाहन अर्थात् लालचवश बैल वगैरहको उसकी शक्तिसे अधिक जबरदस्ती चलाना । अतिसंग्रह—यह धान्य वगैरह आगे बहुत लाभ देगा इस लोभसे अतिसंग्रह करना । विस्मय—धान्य आदिको प्राप्त लाभसे बेच देनेपर या धान्यका संग्रह ही न करनेपर और उसके खरीदनेवालोंको अधिक लाभ हुआ देखकर खेदखिन्न होना । अतिलोभ—खूब लाभ होनेपर भी और अधिक लाभकी इच्छा होना । अतिभारवहन—लोभके आवेशमें अधिक भार लादना । ये पाँच अतिचार स्वामी समन्तभद्रके मतसे हैं । सोमदेव पण्डितने कहा है—'लोभमें आकर किये हुए प्रमाणसे धन-धान्यका अधिक संग्रह गृहस्थोंके पाँचवें अणुव्रतकी हानि करता है । इन सब अतिचारोंका ग्रहण पहले कहे गये इस वाक्यसे हो जाता कि अन्य भी अतिचार विचारणीय हैं ॥६४॥

इस प्रकार निरतिचार परिग्रह व्रतको पालन करनेवालेको प्राप्त फलका कथन दृष्टान्त-पूर्वक करते हैं—

जो निरतिचार परिग्रह परिमाण व्रतको पालता है वह लोभको जीतनेसे कुरुराज जयकुमारकी तरह इन्द्रादिकके द्वारा पूजित होता है ॥६५॥

विशेषार्थ—आचार्य समन्तभद्रने परिग्रह परिमाण व्रतमें जयकुमारका उल्लेख किया है । यह हस्तिनापुरके राजा सोमप्रभके पुत्र थे । इनकी रानीका नाम सुलोचना था । एक बार जयकुमार सुलोचनाके साथ कैलास पर्वतकी वन्दनाके लिए गये । उधर इन्द्रने अपनी सभामें जयकुमारके परिग्रह परिमाण व्रतकी प्रशंसा की तो एक देव उनकी परीक्षा लेने आया । उसने स्त्रीका रूप बनाया तथा अन्य चार स्त्रियोंके साथ आकर जयकुमारसे बोला—सुलोचनाके स्वयंवरके समय जिसने तुम्हारे साथ संग्राम किया था उस विद्याधरोंके स्वामी नमिकी रानी बहुत सुन्दर है । वह तुम्हें चाहती है । यदि उसका राज्य और जीवन चाहते हो तो उसे स्वीकार करो । यह सुनकर जयकुमारने उत्तर दिया—'मैं परिग्रह परिमाणव्रती

अथैवं निरतिचाराणुव्रतपरिणत्यनुपालनाय निर्मलशीलपालनायामुपासकमुत्थापयितुं तदनुभावमाह—

पञ्चाप्येवमणुव्रतानि समतापीयूषपानोन्मुखे
सामान्येतरभावनाभिरमलीकृत्यार्पितान्यात्मनि ।
त्रातुं निर्मलशीलसप्तकमिदं ये पालयन्त्यादरात्
ते संन्यासविधिप्रमुक्ततनवः सौर्वीः श्रियो भुञ्जते ॥६६॥

पञ्चापि—अपिशब्दादेकं द्वे त्रीणि चत्वारि वा । सामान्यभावनाः मैत्र्यादयः । इतरभावनाः प्रतिव्रतं पञ्चशो नियमिताः । अमलीकृत्य, उद्योतनोक्तिरियम् । अर्पितानि—उद्यवनप्रकाशनेयम् । त्रातुं—निर्वहणार्थमिदम् । इदं—उत्तरत्र वक्ष्यमाणम् । उक्तं च—

'परिधय इव नगराणि व्रतानि परिपालयन्ति शीलानि ।
व्रतपालनाय तस्माच्छीलान्यपि पालनीयानि ॥' [पुरुषार्थ. १३६]

संन्यासेत्यादि—सति साधने निस्तरणभणितिरियम् ।

सौर्वीः—स्व स्वर्गे भवा इति भद्रम् ।

इत्याशाधरदृब्धायां धर्मामृतपञ्जिकायां ज्ञानदीपिकापरसंज्ञायां त्रयोदशोऽध्यायः ।

हूँ । मेरे लिए परवस्तु तुच्छ है । अतः मैं राज्य और रानीको स्वीकार नहीं कर सकता ।' इसपर-से उस देवने उनपर घोर उपसर्ग किया । किन्तु जयकुमार विचलित नहीं हुए । तब देव उनके चरणोंमें विनत हुआ और उनका बहुत आदर किया ॥६५॥

इस प्रकार श्रावकको निरतिचार अणुव्रतोंका पालन करनेके लिए निर्मल सात शीलोंके पालन करनेमें उत्साहित करते हुए उनके माहात्म्यको बतलाते हैं—

इस प्रकार जो भव्य जीव मैत्री, प्रमोद आदि सामान्य भावनाओंसे और महाव्रतके अधिकारमें कही गयी प्रत्येक व्रतकी विशेष भावनाओंके द्वारा उस व्रतके अतीचारोंको दूर करके समतारूपी अमृतको पीनेके लिए तत्पर आत्मामें धारण किये गये पाँचों ही प्रकारके अणुव्रतोंका पालन करनेके लिए आगेके अध्यायमें कहे जानेवाले निरतिचार सात शीलोंको आदरपूर्वक पालते हैं वे अन्तिम अध्यायमें कही गयी समाधिमरणकी विधिके द्वारा शरीरको छोड़कर सौधर्म स्वर्गसे लेकर अच्युत स्वर्ग पर्यन्तकी लक्ष्मीको भोगते हैं ॥६६॥

विशेषार्थ—व्रत धारणका लक्ष्य है समतारूपी अमृतका पान । जिसे उसको पीनेकी तीव्र उत्कण्ठा है उसे पाँच अणुव्रत अपनाकर भावनाओंके द्वारा निरतिचार बनाना चाहिए और तब उनको पुष्ट करनेके लिए सात शील पालना चाहिए । अमृतचन्द्रजीने कहा है—'जैसे कोटसे नगरकी रक्षा होती है वैसे ही शीलोंसे व्रतोंकी रक्षा होती है । अतः शीलोंका भी पालन करना चाहिए ।' ऐसा करते हुए समाधिपूर्वक मरण करनेसे स्वर्गकी प्राप्ति होती है ॥६६॥

इस प्रकार पं. आशाधररचित धर्मामृतके अन्तर्गत सागारधर्मकी स्वोपज्ञ संस्कृत टीका तथा ज्ञानदीपिकाकी अनुसारिणी हिन्दी टीकामें आदिसे तेरहवाँ और सागार धर्मका चौथा अध्याय पूर्ण हुआ ।

चतुर्दश अध्याय (पञ्चम अध्याय)

अथ शीलसप्तकं व्याकर्तुकामस्तद्विकल्पभूतानि गुणव्रतानि तावल्लक्षयति—

यद्गुणायोपकारायाणुव्रतानां व्रतानि तत् ।
गुणव्रतानि त्रीण्याहुर्दिग्विरत्यादिकान्यपि ॥१॥

दिग्विरत्यादिकानि । आदिशब्देनानर्थदण्डविरतिर्भोगोपभोगपरिमाणं च संगृह्यते । यत्स्वामी—

'दिग्व्रतमनर्थदण्डव्रतं च भोगोपभोगपरिमाणम् ।
अनुबृंहणाद्गुणानामाख्यान्ति गुणव्रतान्यार्याः ॥' [रत्न. श्रा. ६७]

आ...............

'अनर्थदण्डेभ्यो विरतिः स्याद्गुणव्रतम् ।
भोगोपभोगसंख्यानमप्याहुस्तद्गुणव्रतम् ॥' [ ]

अपिशब्दः सितपटोक्तखरकर्मव्रतज्ञापनार्थम् ।

आगे सात शीलोंका वर्णन करनेके अभिप्रायसे पहले उनके भेद गुणव्रतोंका लक्षण कहते हैं—

यतः ये व्रत अणुव्रतोंके गुण अर्थात् उपकारके लिए होते हैं अतः दिग्विरति आदि तीनों ही व्रतोंको गुणव्रत कहते हैं ॥१॥

विशेषार्थ—दिग्विरति, अनर्थदण्डविरति और भोगोपभोग परिमाण ये तीन गुणव्रत स्वामी समन्तभद्रके मतानुसार ग्रन्थकारने कहे हैं। सात शीलव्रतके दो मुख्य भेद हैं—गुणव्रत और शिक्षाव्रत। गुणव्रत तीन और शिक्षाव्रत चार होते हैं। इस तरह शीलोंकी संख्यामें तथा गुणव्रत और शिक्षाव्रतके भेदोंकी संख्यामें कोई मतभेद नहीं है। किन्तु गुणव्रत और शिक्षाव्रतके अवान्तर भेदोंमें अन्तर है। जैसे आचार्य कुन्दकुन्दने[1] दिशाविदिशापरिमाण, अनर्थदण्डत्याग और भोगोपभोगपरिमाणको गुणव्रत कहा है। ऐसा ही कथन पद्मपुराणमें[2] है। और भावसंग्रहमें[3] भी ऐसा ही है। तत्त्वार्थ सूत्रमें दिग्विरति और देशविरतिको अलग-अलग गिनाया है। उसके टीकाकार पूज्यपाद दिग्विरति, देशविरति और अनर्थदण्ड विरति को गुणव्रत कहते हैं। महापुराणमें[4] भी इन्हें ही गुणव्रत कहा है किन्तु यह भी लिखा है कि कोई-कोई भोगोपभोग परिमाणको गुणव्रत कहते हैं। पुरुषार्थसिद्ध्युपाय, सोमदेव उपासकाध्ययन, चारित्रसार, अमितगति उपासकाचार, पद्मनन्दि पंचविंशतिका और लाटी-संहिता तत्त्वार्थसूत्रके अनुगामी हैं। स्वामीकार्तिकेयानुप्रेक्षा और सागार धर्मामृत रत्नकरण्ड श्रावकाचारके अनुगामी हैं। श्वेताम्बर परम्परामें भी रत्नकरण्डवाला मत ही मान्य है। रत्नकरण्डमें कहा है कि ये तीनों व्रत गुणोंको बढ़ाते हैं इसलिए उन्हें गुणव्रत कहते हैं। श्लोक-में आया 'अपि' शब्द श्वेताम्बरों द्वारा कहे खरकर्मव्रतके ज्ञापनके लिए है ॥१॥

---

१. चारित्र प्रा. गा. २४ । २. पर्व ४।१९ । ३. गा. ३५४ । ४. ७।२१ । ५. १०।६५-६६ । ६. गा. ३४१ आदि ।

अथ दिग्विरतिव्रतं लक्षयति—

यत्प्रसिद्धैरभिज्ञानैः कृत्वा दिक्षु दशस्वपि।
नात्येत्यणुव्रती सीमां तत्स्याद्दिग्विरतिर्व्रतम् ॥२॥

प्रसिद्धैः—दिग्विरतिमर्यादाया दातुर्गृहीतुश्च प्रतीतैः। अभिज्ञानैः—समुद्रनद्यादिभिश्चिह्नैः। कृत्वा—प्रतिपद्य। अपि—एकद्वित्र्यादिष्वपि यावज्जीवमल्पकालं वेत्यपीत्येवमर्थः। नात्येति—नातिक्रम्य गच्छति अणुव्रती न तु महाव्रती तस्य सर्वारम्भपरिग्रहविरतत्वेन समितिपरत्वेन च नृलोके यथाकामं संचाराद्दिग्विरत्यनुपपत्तेः। उक्तं च—

'सदा सामायिकस्थानां यतीनां तु यतात्मनाम्।
नदी शिक्ष्व च न स्यातां विरत्यं विरती इमे ॥' (?) [ ]

दिग्विरतिः—नियमितसीम्नोर्बहिर्यातायातनिवृत्तिः। व्रतं—गुणव्रतमित्यर्थः। नामैकदेशे हि वृत्ताः शब्दा नाम्न्यपि वर्तन्ते भीमादिवत् ॥२॥

दिग्व्रतका स्वरूप कहते हैं—

अणुव्रती जो दसों दिशाओंमें प्रसिद्ध समुद्र, नदी आदि चिह्नोंसे मर्यादा करके उसको उल्लंघन नहीं करता उसे दिग्विरति व्रत कहते हैं ॥२॥

विशेषार्थ—दिग्विरति शब्दका अर्थ है दिशाओंमें नियमित सीमासे बाहर आने-जानेसे निवृत्ति। यही इस व्रतका लक्षण है। यह नियम अणुव्रतीके लिए है, महाव्रतीके लिए नहीं है क्योंकि महाव्रती तो समस्त आरम्भ और परिग्रहसे विरत होता है और समितिका पालन करनेमें तत्पर रहता है। अतः मनुष्य लोकमें इच्छानुसार विचरण कर सकता है। ऊपर श्लोकमें जो 'अपि' शब्द है वह ग्रन्थकारके अनुसार यह बतलाता है कि एक-दो दिशाओंकी भी मर्यादा की जा सकती है तथा वह मर्यादा जीवनपर्यन्तके लिए भी होती है और कुछ समयके लिए भी होती है। पं. आशाधर जी-का यह कथन स्वामी समन्तभद्रके प्रतिकूल है। उन्होंने कहा है—'दिशाओंकी मर्यादा करके मैं इसके बाहर मृत्युपर्यन्त नहीं जाऊँगा ऐसा नियम दिग्व्रत है। लाटी संहितामें भी कहा है कि जबतक मैं सचेतन हूँ, तबतक इस शरीरसे मर्यादाके बाहर नहीं जाऊँगा। इसी तरह दिग्व्रतमें दसों दिशाओंकी मर्यादा आवश्यक है एक-दो दिशाओंकी मर्यादाको दिग्व्रत नहीं कहा है। इसी तरह पिछले अध्यायके अन्तिम श्लोकमें 'पञ्चाप्येवमणुव्रतानि'से पाँचों अणुव्रतोंके पालनके लिए सात शील कहे हैं। यहाँ भी अपि शब्द है। टीकामें कहा है कि 'अपि' शब्दसे एक या दो या तीन या चार अणुव्रत लेना चाहिए। अर्थात् एक अणुव्रतके पालनके लिए भी सात शील पाल सकता है किन्तु ऐसेको तो अणुव्रती ही नहीं कहा। सर्वार्थसिद्धि[3]में यह शंका की गयी है कि जो हिंसा आदि पाँच पापोंमें-से एकका त्याग करे क्या वह अगारी व्रती है? उत्तर दिया गया-

---

१. 'दिग्वलयं परिगणितं कृत्वाऽतोऽहं बहिर्न यास्यामि।
इति संकल्पो दिग्व्रतमामृत्यणुपापविनिवृत्यै ॥'—रत्न. श्रा. ६८ श्लो.।

२. 'पूर्वस्यां दिशि गच्छामि यावद्गंगाम्बुकेवलम्।
तद्बहिर्वपुषाऽनेन न गच्छामि सचेतनः ॥'—लाटी. ६।११३।

३. अत्राह किं हिंसादीनामन्यतमस्माद्यः प्रतिनिवृत्तः स खल्वगारी व्रती? नैवम्। किं तर्हि? पञ्चतय्या अपि विरतेर्वैकल्येन विवक्षितः इत्युच्यते—'अणुव्रतोऽगारी'—सर्वार्थसि. ७।२०।

अथ दिग्व्रतेनाणुव्रतिनोऽपि महाव्रतित्वमुपपादयति—

दिग्विरत्या बहिः सीम्नः सर्वपापनिवर्तनात् ।
तप्तायोगोलकल्पोऽपि जायते यतिवद् गृही ॥३॥

सर्वपापानि—स्थूलेतरहिंसादीनि भोगोपभोगादीनि च । तप्तायोगोलकल्पः—संतप्तलोहपिण्ड इवारम्भपरिग्रहपरत्वेन सर्वत्र गमनभोजनशयनादिक्रियासु जीवोपमर्दकरत्वात् । तदुक्तम्—

'तत्तायगोलकप्पो पमत्तजीवो णिवारियप्पसुरो ।
सव्वत्थ किण्ण कुज्जा पावं तक्कारणाणुगओ ॥' [ ]

साधूनां तु समितिगुप्तिप्रधानव्रतशालिनां नायं दोष इति न तेषां दिग्विरतिव्रतम् । उक्तं च—

'अवधेर्बहिरणुपापप्रतिविरतेर्दिग्व्रतानि धारयताम् ।
पञ्चमहाव्रतपरिणतिमणुव्रतानि प्रपद्यन्ते ॥' [रत्न. श्रा. ७०] ॥३॥

अथैतदेव दृढयन्नाह—

दिग्व्रतोद्रिक्तवृत्तघ्नकषायोदयमान्द्यतः ।
महाव्रतायतेऽलक्ष्यमोहे गेहिन्यणुव्रतम् ॥४॥

नहीं है, जो पाँचोंका एकदेशत्याग करता है वही गृही अणुव्रती है। अतः ग्रन्थकारके उक्त कथन विचारणीय हैं, अस्तु। दिशाओंकी मर्यादाके स्थान प्रसिद्ध होना चाहिए जो मर्यादा देनेवाले और लेनेवालेके परिचित हों। अन्यथा भूल जानेकी सम्भावना है। यह व्रत अणुव्रती के लिए है, महाव्रतीके लिए नहीं है। महाव्रती तो समस्त आरम्भ और परिग्रहसे विरत तथा समितिमें तत्पर होता है। अतः वह मनुष्यलोकमें यथेच्छ गमनागमन कर सकता है ॥२॥

आगे दिग्व्रतके द्वारा अणुव्रतीको महाव्रतीपना सिद्ध करते हैं—

दिग्व्रतके द्वारा मर्यादाके बाहर स्थूल और सूक्ष्म हिंसा आदि सब पापोंसे विरत होनेसे तपाये हुए लोहेके पिण्डके भी समान श्रावक महाव्रतीके समान होता है ॥३॥

विशेषार्थ—जो समस्त पापोंसे विरत होता है वह महाव्रती होता है। यद्यपि श्रावककी आन्तरिक स्थिति तपाये हुए लोहेके गोलेके समान है। क्योंकि वह आरम्भ और परिग्रहमें लगा रहनेसे सर्वत्र जाने-आने, भोजन-शयन आदि क्रियाओंमें जीवोंका घात करता है। किन्तु दिशाओंकी सीमा बाँध लेनेसे की हुई मर्यादाके बाहर न वह त्रस जीवोंकी हिंसा करता है और न स्थावर जीवोंकी हिंसा करता है। तथा मर्यादाके बाहर व्यापार करनेसे प्रचुर लाभ होनेपर भी वह व्यापार नहीं करता। इससे लोभका भी निराश होता है। अतः उसे उस क्षेत्रकी अपेक्षा महाव्रतीपना प्राप्त होता है। कहा है—'मर्यादाके बाहर सूक्ष्म पापसे भी विरत होनेसे दिग्व्रतके धारण करनेवालोंके अणुव्रत पंचमहाव्रतके रूपमें परिणत हो जाते है।' समिति गुप्ति प्रधानव्रतधारी साधुओंको यह दोष नहीं होता। इसलिए उनके दिग्विरति व्रत नहीं होता ॥३॥

आगे उक्त कथनकी पुष्टि करते हैं—

दिग्व्रतके द्वारा चारित्रको घातनेवाली प्रत्याख्यानावरण कषायके उदयकी मन्दताके बढ़ जानेसे गृहस्थका प्रत्याख्यानावरण नामक चारित्रमोह परिणाम इतना सूक्ष्म रह जाता है कि उसका निश्चय करना अशक्य होता है। इसीसे उसके अणुव्रत महाव्रतके समान होते हैं ॥४॥

दिग्व्रतेत्यादि। दिग्व्रतेनोद्रिक्तमुत्कर्षं नीतं वृत्तघ्नकषायाणां—प्रत्याख्यानावरणद्रव्यक्रोधादीनामुदयस्य विपाकस्य मान्द्यमनीत्कट्यं तस्मात् दिग्विरतिमन्दतरीकृतप्रत्याख्यानावरणविपाकादित्यर्थः। अलक्ष्यमोहे—निश्चेतुमशक्यभावप्रत्याख्यानावरणपरिणामे गृहिणि अणुव्रतं महाव्रता[यते महाव्रतमिवाचरति नियमित-दिग्विभा]गाद् बहिः सर्वसावद्यनिवर्तकत्वात्, न तु महाव्रतं भवति तत्प्रतिबन्धकोदयसद्भावात्। तदुक्तम्—

'प्रत्याख्यानतनुत्वान्मन्दतराश्चरणमोहपरिणामाः।
सत्त्वेन दुरवधारा महाव्रताय प्रकल्पन्ते ॥
पञ्चानां पापानां हिंसादीनां मनोवचःकायैः।
कृतकारितानुमननैस्त्यागस्तु महाव्रतं महताम् ॥' [रत्न. श्रा. ७१-७२] ॥४॥

अथ दिग्विरत्यतिचारमाह—

[1]सीमविस्मृतिरूर्ध्वाधस्तिर्यग्भागव्यतिक्रमाः।
अज्ञानतः प्रमादाद्वा क्षेत्रवृद्धिश्च तन्मलाः ॥५॥

सीमविस्मृतिः—नियमितमर्यादाया अज्ञानतो मत्यपाटवसन्देहादिना प्रमादाद्वातिव्याकुलत्वान्यमनस्कत्वादिना स्मृतिभ्रंशः। तथाहि—केनचित् पूर्वस्यां दिशि योजनशतरूपं परिमाणं कृतमासीत्। गमनकाले च स्पष्टतया न स्मरति किं शतपरिमाणं कृतमुत पञ्चाशत्। तस्य चैवं पञ्चाशतमतिक्रामतोऽतिचारः, शतमतिक्रामतो भङ्गः सापेक्षत्वान्निरपेक्षत्वाच्चेति प्रथमोऽतिचारः। ऊर्ध्वेत्यादि। ऊर्ध्वं गिरितरुशिखरादेः, अधो ग्राम-

---

विशेषार्थ—भावकर्म और द्रव्यकर्ममें निमित्तनैमित्तिक सम्बन्ध है। द्रव्यकर्मका उदय भावकर्मके उदयमें निमित्त पड़ता है और भावकर्मके उदयका निमित्त पाकर द्रव्यकर्म बन्धता है। प्रत्याख्यानावरण कषाय महाव्रतकी घातक है उसके उदयमें महाव्रत नहीं होता। श्रावकके इस कषायका जबतक उदय है तबतक उसके महाव्रतरूप परिणाम नहीं हो सकते। ऐसी स्थितिमें यह प्रश्न होता है कि श्रावकके अणुव्रत महाव्रत कैसे हो सकते हैं। उसीके समाधानके लिए यह कथन है कि दिग्व्रत धारण करनेसे प्रत्याख्यानावरण नामक द्रव्य क्रोधादिका उदय बहुत मन्द हो जाता है और उससे उस श्रावकके प्रत्याख्यानावरण नामक चारित्रमोहरूप परिणाम भी इतने क्षीण हो जाते हैं कि उसके अस्तित्वका भी निर्णय करना कठिन होता है। फलतः मर्यादाके बाहर सर्व पापसे विरत होनेसे अणुव्रत उस क्षेत्रकी अपेक्षा महाव्रत होते हैं। स्वामी समन्तभद्रने ऐसा ही कहा है। यथा—प्रत्याख्यानावरण कषायके मन्द उदयके कारण चारित्रमोह रूप परिणाम मन्दतर होनेसे उनका अस्तित्व भी कठिनतासे ही प्रतीत होता है। इसीसे अणुव्रत महाव्रतके तुल्य प्रतीत होते हैं ॥४॥

दिग्व्रतके अतिचार कहते हैं—

अज्ञान या प्रमादसे सीमाका भूल जाना, ऊपर-नीचे और तिर्यक् प्रदेशकी मर्यादाका व्यतिक्रम तथा क्षेत्रवृद्धि ये पाँच दिग्व्रतके अतीचार हैं ॥५॥

विशेषार्थ—जो मर्यादा निर्धारित की थी, बुद्धिकी मन्दतासे या सन्देह होनेसे अथवा किसी प्रकारकी व्याकुलता होनेसे या चित्त दूसरी ओर होनेसे भूल जाना सीमविस्मृति है। जैसे, किसीने पूरब दिशामें सौ योजनका परिमाण किया था। गमन करते समय स्पष्ट रूपसे स्मरण नहीं रहा कि सौ योजनका परिमाण किया था या पचासका। ऐसी स्थितिमें यदि वह

---

१. 'ऊर्ध्वाधस्तिर्यग्व्यतिक्रमक्षेत्रवृद्धिस्मृत्यन्तराधानानि'—त. सू. ७।३०।

भूमिगृहकूपादेः, तिर्यक् पूर्वादिदिक्षु येऽमी भागा नियमितप्रदेशास्तेषां व्यतिक्रमा लङ्घनानि। एते च त्रयोऽनाभोगातिक्रमादिभिरेवातिचारा भवन्त्यन्यथा प्रवृत्तौ तु भङ्गा एव। क्षेत्रवृद्धिः—क्षेत्रस्य पूर्वादिदेशस्य दिग्व्रतविषयस्य ह्रस्वस्य सतो वृद्धिः पश्चिमादिक्षेत्रान्तरपरिमाणप्रक्षेपेण दीर्घीकरणम्। तथाहि—केनापि पूर्वापरदिशोः प्रत्येकं योजनशतं परिमाणीकृत्यैकत्र क्षेत्रं गमनकाले वर्धयतो व्रतसापेक्षत्वादतिचारः। यदि च अप्रणिधानात्क्षेत्रपरिमाणमतिक्रान्तं भवति तदा निवर्तितव्यं ज्ञाते वा न गन्तव्यमन्योऽपि न विसर्जनीयः। अथानाज्ञाया (अथाज्ञतया) कोऽपि गतः स्यात्तदा यत्तेन लब्धं स्वयं वा विस्मृतितो गतेन लब्धं तत्त्याज्यमिति पञ्चमः ॥५॥

अथानर्थदण्डव्रतं लक्षयति—

पीडा[1] पापोपदेशाद्यैर्देहाद्यर्थाद्विनाऽङ्गिनाम्।
अनर्थदण्डस्तत्त्यागोऽनर्थदण्डव्रतं मतम् ॥६॥

अर्थः प्रयोजनम्। उक्तं च—

'पापोदेशहिंसादानापध्यानदुःश्रुतीः पञ्च।
प्राहुः प्रमादचर्यामनर्थदण्डानदण्डधराः ॥' [र. श्रा. ७५] ॥६॥

पचास योजनसे आगे जाता है तो अतिचार है। और यदि सौ योजनसे भी आगे जाता है तो व्रतका भंग है क्योंकि पचाससे आगे जानेमें तो व्रतकी सापेक्षता है। किन्तु सौसे भी आगे जानेपर व्रतकी सापेक्षता नहीं है। इस तरह यह प्रथम अतिचार है ॥१॥ ऊपर अर्थात् पहाड़ और वृक्षके ऊपर, नीचे अर्थात् गाँवके कुएँ वगैरहमें और तिर्यक् अर्थात् पूर्वादि दिशाओंमें ली हुई मर्यादाका उल्लंघन ऊर्ध्वातिक्रम, अधोअतिक्रम और तिर्यगतिक्रम नामक अतिचार है। ये तीनों अज्ञान या प्रमादसे होनेपर ही अतिचार होते हैं। जान-बूझकर उल्लंघन करनेपर तो व्रतका भंग ही होता है॥ क्षेत्र अर्थात् पूर्व आदि देशकी मर्यादामें कमी करके पश्चिम आदि देशकी मर्यादाको बढ़ा लेना क्षेत्रवृद्धि नामक अतिचार है। जैसे, किसीने पूर्व और पश्चिम दिशामें-से प्रत्येकमें सौ योजन जानेका परिमाण किया। दोनों परिमाणोंको जोड़कर गमन करते समय पूरबमें १५० या पश्चिममें १५० योजन चले जाना कि हम दूसरी दिशामें कम जायेंगे यह व्रत सापेक्ष होनेसे अतिचार है। यदि असावधानीवश क्षेत्रके परिमाणका अतिक्रमण हुआ है तो वहाँसे लौट आना चाहिए और यह बात ज्ञात होनेपर जाना नहीं चाहिए। यदि कोई अज्ञानवश चला गया है तो वहाँसे जो लाभ हुआ हो उसे त्याग देना चाहिए। इस प्रकार यह पाँचवाँ अतिचार है ॥५॥

अनर्थदण्डव्रतका लक्षण कहते हैं—

अपने तथा अपने सम्बन्धियोंके किसी मन-वचन-काय सम्बन्धी प्रयोजनके बिना पापोपदेश, हिंसादान, दुश्रुति, अपध्यान और प्रमादचर्याके द्वारा प्राणियोंको पीड़ा देना अनर्थदण्ड है। और उसका त्याग अनर्थदण्ड व्रत माना है ॥६॥

विशेषार्थ—दिग्व्रतकी मर्यादाके भीतर भी पापके कार्य निष्प्रयोजन न करनेका नाम अनर्थदण्ड व्रत है। दण्ड कहते हैं मन-वचन-कायकी प्रवृत्तिको। और अनर्थका अर्थ होता है बिना प्रयोजन। बिना प्रयोजन मन-वचन-कायकी प्रवृत्तिके द्वारा त्रस-स्थावर जीवोंको

---

१. 'अभ्यन्तरं दिगवधेरपार्थिकेभ्यः सपापयोगेभ्यः।
विरमणमनर्थदण्डव्रतं च विदुर्व्रतधराग्रण्यः ॥'—रत्न. श्रा. ७४ श्लो.।

अथ पापोपदेशस्वरूपं तद्विरतिं चाह—

पापोपदेशो यद्वाक्यं हिंसाकृष्यादिसंश्रयम् ।
तज्जीविभ्यो न तं दद्यान्नापि गोष्ठ्यां प्रसञ्जयेत् ॥७॥

हिंसेत्यादि । हिंसामृषावादादिभिः कृषिवाणिज्यादिभिश्च संश्रयः संबन्धो यस्य तत्तद्विषयमित्यर्थः । तज्जीविभ्यः व्याधवञ्चकचौरादिभ्यः कृषिबलकिरातादिभ्यश्च न तं दद्यात्, मृगास्तोयाशयमायाताः किमुपविष्टास्तिष्ठतेत्यादिरूपेण न प्रसञ्जयेत् पुन पुनः प्रवर्तयेत् । उक्तं च—

'विद्यावाणिज्यमषिकृषिसेवाशिल्पजीविनां पुंसाम् ।
पापोपदेशदानं कदाचिदपि नैव कर्तव्यम् ॥' [पुरुषार्थ. १४२] ॥७॥

अथ हिंसोपकरणदानपरिहारमाह—

हिंसादानं विषास्त्रादिहिंसाङ्गस्पर्शनं त्यजेत् ।
पाकाद्यर्थं च नाग्न्यादि दाक्षिण्याविषयेऽर्पयेत् ॥८॥

कष्ट देना अनर्थदण्ड है। उसके पाँच भेद हैं—पापोपदेश, हिंसादान, दुश्रुति, अपध्यान और प्रमादचर्या। आचार्य समन्तभद्रने भी ऐसा ही कहा है ॥६॥

पापोपदेशका स्वरूप और उसके त्यागको कहते हैं—

जो वचन हिंसा, झूठ आदि और खेती व्यापार आदिसे सम्बन्ध रखता है उसे पापोपदेश कहते हैं। जो इनसे आजीविका करनेवाले व्याध, ठग, चोर, किसान, भील आदि हैं उन्हें पापोपदेश नहीं देना चाहिए और न गोष्ठीमें इस तरहकी चर्चाका प्रसंग लाना चाहिए ॥७॥

विशेषार्थ—पशु-पक्षियोंको कष्ट पहुँचानेवाला व्यापार, हिंसा, आरम्भ, ठगी आदिकी चर्चा करना, वह भी उन लोगोंमें जो यही काम करते हों, पापोपदेश है। उसे नहीं करना चाहिए। आचार्य अमृतचन्द्रजीने तो विद्या, वाणिज्य, लेखनी, कृषि, सेवा और शिल्पसे आजीविका करनेवालोंको भी पापोपदेश देनेका निषेध किया है। इसमें षट्कर्मोंसे आजीविका करनेवाले सभी आ जाते हैं। अतः किसी भी प्रकारकी आजीविकाका उपदेश अमृतचन्द्रजीके मतसे पापोपदेश है। अनर्थदण्डके त्यागीको यह नहीं करना चाहिए।[1] लाटी संहितामें अनर्थ-दण्डविरतिको श्रावकके बारह व्रतरूपी वृक्षोंका मूल कहा है। और कहा है—एक अनर्थदण्डके त्यागसे प्राणी बिना किसी प्रयत्नके व्रती हो जाता है और उसके बिना करोड़ों प्रयत्न करने पर भी व्रती नहीं होता। उसका यह कथन यथार्थ है। यदि मनुष्य बिना प्रयोजन पाप कार्योंमें प्रवृत्ति न करे तो उसे रुपयेमें बारह आना पापकार्योंसे छुटकारा मिल सकता है ॥७॥

हिंसाके उपकरण देनेका निषेध करते हैं—

अनर्थदण्ड व्रतका पालक श्रावक प्राणिवधके साधन विष, अस्त्र आदिके देने रूप हिंसादान नामक अनर्थदण्डको छोड़े। और पारस्परिक व्यवहारके सिवाय किसी दूसरेको पकाने आदिके लिए अग्नि वगैरह न देवे ॥८॥

---

१. 'व्रतं चानर्थदण्डस्य विरतिर्गृहमेधिनाम् । द्वादशव्रतवृक्षाणामेतन्मूलमिवाद्वयम् ॥
एकस्यानर्थदण्डस्य परित्यागो न (–गेन) देहिनाम् ।
व्रतित्वं स्यादनायासान्नान्यथायास कोटिभिः' ॥—ला. सं. ६।१३५-१३६ ।

अस्त्रादि। आदिशब्देन हल-शकट-कुशि-कुद्दालादि। अङ्गं—उपकरणम्। स्पर्शनं—दानम्। अग्न्यादि—वह्निघरट्टमुसलोदूखलादि। दाक्षिण्याविषये—परस्परव्यवहारविषयादन्यत्र। उक्तं च—

'असि-धेनु-विष-हुताशन-लाङ्गल-करवाल-कार्मुकादीनाम्।
वितरणमुपकरणानां हिंसायाः परिहरेद् यत्नात्॥' [पुरुषार्थ. १४४] ॥८॥

अथ दुःश्रुत्यपध्यानयोः स्वरूपं परिहारं चाह—

चित्तकालुष्यकृत्कामहिंसाद्यर्थश्रुतश्रुतिम्।
न दुःश्रुतिमपध्यानं नार्तरौद्रात्म चान्वियात्॥९॥

कामेत्यादि। काम हिंसा आदिर्येषामारम्भादीनां ते अर्था येषां तानि कामाद्यर्थानि श्रुतानि। तत्र कामशास्त्रं—वात्स्यायनादि। हिंसाशास्त्रं—ठकादिमतम्। आरम्भपरिग्रहशास्त्रं वार्तानीतिः। साहसशास्त्रं वीरकथा। मिथ्यात्वशास्त्रं ब्रह्माद्वैतादिमतम्। मदशास्त्रं 'वर्णानां ब्राह्मणो गुरुः' इत्यादिग्रन्थः। रागशास्त्रं वशीकरणादितन्त्रम्। तेषां श्रुतिः आकर्णनम्। उपलक्षणादर्जनाद्यपि। अपध्यानं—अपकृष्टं ध्यानमेकाग्रचिन्तानिरोधः। आर्तं ऋते दुःखे भवम्। यदि वा अर्तिः पीडा याचना च तत्र भवम्। रौद्रं—रोधयत्यपरानिति रुद्रो दुःखहेतुस्तेन कृतं तस्य वा कर्म। नान्वीयात्—नानुवर्तयेत्। दुःश्रुति—कामादिशास्त्रश्रवणलक्षणाम्। अपध्यानं च नरेन्द्रत्वखचरत्वाप्सरोविद्याधरीपरिभोगादिविषयमार्तं वैरिघाताग्निघातादिविषयं च रौद्रम्। प्रसङ्गवशादायातमपि तत्क्षणान्निवर्तयेदित्यर्थः। तदुक्तम्—

'रागादिवर्धनानां दुष्टकथानामबोधबहुलानाम्।
न कदाचन कुर्वीत श्रवणार्जनशिक्षणादीनि॥' [पुरुषार्थ. १४५]

विशेषार्थ—सभी श्रावकाचारोंमें हिंसाके साधन फरसा, तलवार, फावड़ा, आग, शस्त्र, सींग, साँकल, विष, कोड़ा, दण्डा, हल, धनुष आदि दूसरोंको देना हिंसादान कहा है। और हिंसादान न करनेका निषेध किया है। किन्तु गृहस्थोंके लिए कभी-कभी अणुव्रती गृहस्थको भी आग, मूसल, ओखली आदि दूसरे गृहस्थोंसे लेनेकी आवश्यकता होती है। यदि वह स्वयं दूसरोंको नहीं देगा तो दूसरे कैसे उसे देंगे। गृहस्थ पं. आशाधरजीको इस कठिनाईका अनुभव होगा। इसलिए उन्होंने इतना विशेष कथन करना उचित समझा कि जिनसे हमारा पारस्परिक देने-लेनेका व्यवहार चलता है उनको तो रसोई बनानेके लिए अग्नि, मूसल आदि देना चाहिए किन्तु जिनसे हमारा ऐसा व्यवहार नहीं है उन्हें रसोई बनानेके लिए भी आग वगैरह नहीं देना चाहिए। ऐसी घटनाएँ ग्रामोंमें सुनी गयीं कि अपरिचित आदमीने आग माँगी और उसी गाँवमें उससे आग लगाकर लापता हो गया। अमृतचन्द्रजीने तो तलवार, धनुष, विष, आग, हल आदि हिंसाके साधनोंको देनेका ही निषेध किया है॥८॥

दुःश्रुति और अपध्यानका स्वरूप तथा उनके त्यागको कहते हैं—

जिन शास्त्रोंमें काम, हिंसा आदिका कथन है उनके सुननेसे चित्त राग-द्वेषके आवेशसे कलुषित होता है, अतः उनके सुननेको दुःश्रुति कहते हैं यह नहीं करना चाहिए। तथा आर्त और रौद्ररूप खोटे ध्यान भी नहीं करना चाहिए॥९॥

विशेषार्थ—कुछ शास्त्र ऐसे होते हैं जिनमें मुख्य रूपसे काम भोग सम्बन्धी या हिंसा, चोरी आदिका ही कथन रहता है। जैसे, वात्स्यायनका काम सूत्र है, कोकशास्त्र है, जासूसी उपन्यास हैं, वशीकरण आदि तन्त्र आदिके ग्रन्थ हैं, आरम्भ परिग्रह विषयक शास्त्र हैं। इनके सुननेसे मन खराब होता है, पढ़कर कामविकार उत्पन्न होता है, बुरी आदतें पड़ जाती हैं अतः ऐसी पुस्तकों को या शास्त्रोंको नहीं पढ़ना चाहिए। इसी तरह अपध्यान नहीं करना

अपि च—

'आपद्धेतुषु रागरोषनिकृतिप्रायेषु दोषेष्वलं
मोहात् सर्वजनस्य चेतसि सदा सत्सु स्वभावादपि ।
तन्नाशाय च संविदे सफलवत्काव्यं कवेर्जायते,
शृङ्गारादिरसं तु सर्वजगतो मोहाय दुःखाय च ॥' [ ]

तथा—

'पापर्धिजयपराजयसंगरपरदारगमनचौर्याद्याः ।
न कदाचनापि चिन्त्याः पापफलं[1] केवलं ह्यपध्याने ॥' [पुरुषार्थ. १४१] ॥९॥

अथ प्रमादचर्यालक्षणं तत्त्यागं च श्लोकद्वयेनाह—

प्रमादचर्या विफलं क्ष्मानिलाग्न्यम्बुभूरुहाम् ।
खातव्याघातविध्यापसेकच्छेदादि नाचरेत् ॥१०॥

व्याघातः—स्वयमागच्छतो वा तस्य कपाटादिना प्रतिघातः । विध्यापः—जलादिनाऽग्नेर्विध्यापनम् । च्छेदादि—आदिशब्देन पत्रपुष्पफलत्रोटनादि । उक्तं च—

'भूखनन-वृक्षमोटन-शाड्वलदलनाम्बुसेचनादीनि ।
निष्कारणं न कुर्याद्दलफलकुसुमोच्चयानपि च ॥' [पुरुषार्थ. १४३] ॥१०॥

चाहिए। एक ही विषयमें मनके लगानेको ध्यान कहते हैं। ध्यानके चार भेद हैं। उनमें आर्त, रौद्र खोटे ध्यान हैं। आर्त पीड़ा या कष्ट को कहते हैं, उसके ध्यानको आर्तध्यान कहते हैं। जैसे धर्म करनेसे स्वर्ग मिलता है और स्वर्गमें अप्सरायें होती हैं यह जानकर उनके भोग-उपभोगका चिन्तन करना भी आर्तध्यान है। इसी तरह वैरिघात आदिका चिन्तन करना रौद्रध्यान है। रुद्र कहते हैं निर्दयभावको। उससे जो ध्यान होता है वह रौद्रध्यान है। ये ध्यान भी नहीं करना चाहिए। यदि प्रसंगवश इनका ध्यान हो आवे तो तत्काल उसे दूर कर देना चाहिए। आचार्य अमृतचन्द्रजीने कहा है—'रागादिको बढ़ानेवाली अज्ञानसे भरी खोटी कथाओंका कभी भी श्रवण, धारण, शिक्षण आदि नहीं करना चाहिए। और भी कहा है—'मोहवश सभी मनुष्योंके चित्तमें सदा स्वभावसे ही आपत्तिके कारण राग, द्वेष, छल, कपट आदि दोष रहते हैं। उनके विनाशके लिए कविका काव्य सफल होता है। शृङ्गार आदि रस तो समस्त जगत्को मोह और दुःख उत्पन्न करता है। तथा शिकार, जय, पराजय, युद्ध, परस्त्री गमन, चोरी आदिका चिन्तन कभी नहीं करना चाहिए। क्योंकि उनका फल केवल पापबन्ध है' ॥९॥

प्रमादचर्याका लक्षण और उसका त्याग दो श्लोकोंमें कहते हैं—

विना प्रयोजन भूमिका खोदना, वायुको रोकना, अग्निको बुझाना, पानी सींचना. वनस्पतिका छेदन भेदन आदि करना प्रमादचर्या है। उसे नहीं करना चाहिए ॥१०॥

विशेषार्थ—विना प्रयोजन भूमिको नहीं खोदना चाहिए, विना प्रयोजन स्वयं आती हुई वायुको द्वार वगैरह बन्द करके नहीं रोकना चाहिए। विना प्रयोजन आगको पानीसे नहीं बुझाना चाहिए। विना प्रयोजन पानीको भूमि पर नहीं डालना चाहिए। विना प्रयोजन वनस्पतिका छेदन पत्र, पुष्प, फल आदिको तोड़ना नहीं चाहिए । यही बात अमृतचन्द्रजीने

---

१. फलं केवलं यस्मात्—पुरुषा. ।

तद्वच्च न सरेद्व्यर्थं न परं सारयेन्नहि[1] ।
जीवघ्नजीवान् स्वीकुर्यान्मार्जारशुनकादिकान् ॥११॥

न सरेत्—करचरणादिव्यापारं न कुर्यात् । न हीत्यादिनियमेन फलवतोऽपि न परिगृह्णीयादित्यर्थः । उक्तं च—

'मण्डल-विडाल-कुक्कुट-मयूर-शुक-सारिकादयो जीवाः ।
हितकाम्यैर्न ग्राह्याः सर्वे पापोपकारपराः ॥' [अमि. श्रा. ६।८२] ॥११॥

अथ अनर्थदण्डविरति-अतिचारत्यागमाह—

मुञ्चेत्[2]कन्दर्प-कौत्कुच्य-मौखर्याणि तदत्ययान् ।
असमीक्ष्याधिकरणं सेव्यार्थाधिकतामपि ॥१२॥

कन्दर्पः—कामस्तत्प्रधानो वा वाक्प्रयोगोऽपि कन्दर्पः, रागोद्रेकात् प्रहासमिश्रोऽशिष्टवाक्प्रयोग इत्यर्थः । कौत्कुच्यं—कुदिति कुत्सायां निपातानामानन्त्यात् । कुत्सितं कुचति भ्रू-नयनोष्ठनासाकरचरणमुखविकारैः संकुचतीति कुत्कुचः संकोचादिक्रियाभाक् तद्भावः कौत्कुच्यम् । प्रहासो—भण्डिमावचनं च भण्डिमोपेत-

भी कही है ।

बिना प्रयोजन पृथ्वी खोदने आदिकी तरह बिना प्रयोजन हाथ-पैर आदिको हलन चलन न स्वयं करे और न दूसरेसे करावे । तथा प्राणियोंका घात करनेवाले कुत्ता-बिल्ली आदि जन्तुओंको नहीं पाले ॥११॥

विशेषार्थ—श्वेताम्बराचार्य हेमचन्द्रने अपने योगशास्त्रमें (३।७३-७४) अनर्थदण्डके चार ही भेद किये हैं । दुःश्रुति भेद नहीं किया । तथा जैसे आशाधरजीने परस्परके व्यवहारके अतिरिक्त आग वगैरह देनेका निषेध किया है वैसा उन्होंने भी किया है साथ ही उन्होंने पापोपदेशके सम्बन्धमें भी ऐसा ही कहा है । लिखा है—यह पापरूप उपदेश श्रावकको नहीं करना चाहिए । जो सर्वत्र पापोपदेशका नियम करनेमें असमर्थ है उनके लिए यह अपवाद कहते हैं—बन्धु, पुत्र आदिको पापका उपदेश न करना अशक्य है क्योंकि वर्षाकाल आनेपर खेत जोतने बीज बोने आदिके लिए कहना ही होगा । अतः परस्परके व्यवहारसे बाहरके लोगोंमें पापोपदेश नहीं करना चाहिए[3] । यह उनका मत है । अमृतचन्द्राचार्यने जुआ खेलनेको भी अनर्थदण्ड माना है । लिखा है—'जुआ सब अनर्थोंमें (सब व्यसनोंमें) प्रथम है, सन्तोष-का नाशक है, मायाचारका घर है, चोरी और असत्यका स्थान है । इसे दूरसे ही छोड़ना चाहिए[4] ।' अमितगतिने कुत्ता, बिल्ली, मुर्गा, मोर, तोता, मैना आदिको पालनेका निषेध किया है ॥१०-११॥

अनर्थदण्डव्रतके अतिचारोंको छोड़नेके लिए कहते हैं—

अनर्थदण्डके त्यागीको कन्दर्प, कौत्कुच्य, मौखर्य, असमीक्ष्याधिकरण और सेवनीय पदार्थोंकी अधिकता इन अतिचारोंको छोड़ना चाहिए ॥१२॥

१. येन्महीम् मु. ।
२. 'कन्दर्पकौत्कुच्य मौखर्यासमीक्ष्याधिकरण भोगोपभोगानर्थक्यानि ॥'—त. सू. ७।३२ ।
३. वृषभान् दमय क्षेत्रं कृष षण्ढय वाजिनः ।
दाक्षिण्याविषये पापोपदेशोऽयं न कल्पते ॥—योगशास्त्र ३।७६ ।
४. 'सर्वानर्थप्रथमं मथनं शौचस्य सद्म मायायाः ।
दूरात्परिहरणीयं चौर्यासत्यास्पदं द्यूतम् ॥'—पुरुषार्थ. १४६ श्लो. ।

कायव्यापारप्रयुक्तमित्यर्थः। एषः पूर्वश्च द्वावपि प्रमादचर्याविरतेरतीचारौ। मौखर्यं—मुखमस्यास्तीति मुखरोऽनालोचितभाषी वाचालस्तस्य भावो धाष्टर्यप्रायमसत्यासंबद्धबहुप्रलापित्वम्। अयं च पापोपदेशविरतेरतिचारो मौखर्ये सति पापोपदेशसंभवादिति तृतीयः। असमीक्ष्याधिकरणं—प्रयोजनमनालोच्य कार्यस्याधिक्येन करणम्। यथा बहुमपि कटं पातयत यावता मे प्रयोजनं तावन्तमहं क्रेष्यामि। शेषमन्ये बहवोऽर्थिनः सन्ति तेऽपि क्रेष्यन्त्यहं वा विक्रापयिष्यामीत्येवमनालोच्य बह्वारम्भतृणाजीविभिः कारयति। एवं काष्ठच्छेदेष्टकापाकादिष्वपि वाच्यम्। तथा हिंसोपकरणं हिंसोपकरणान्तरेण संयुक्तं धारयति। यथा संयुक्तमुलूखलेन मुसलं, हलेन फालं, शकटेन युगं, धनुषा शरानित्यादि। तथा सति हि यः कश्चित्संयुक्तमुलूखलमुसलादिकमाददीत, वियुक्ते तु तस्मिन् सुखेन परः प्रतिषेद्धुं शक्यते। एतच्च हिंसोपकारिदानविरतेरतिचारः। सेव्यार्थाधिकतां—सेव्यस्य भोगोपभोगलक्षणस्य जनको यावानर्थस्ततोऽधिकस्य तस्य करणं भोगोपभोगानर्थक्यमित्यर्थः। अत्रायं सम्प्रदायः। यदि बहूनि स्नानसाधनानि तैलखल्यामलकादीनि गृह्णाति तदा लौल्येन बहवः स्नानार्थं तडागादौ गच्छन्ति ततश्च पूर्तरकाप्कायकादिवधोऽधिकः स्यान्न चैवं युज्यते। ततो गृह एव स्नातव्यम्। तदसंभवे तु तैलादिभिर्गृह एव शिरो घर्षयित्वा तानि सर्वाणि साधयित्वा तडागादितटे निविष्टो गालितजलाञ्जलिभिः स्नायात्। तथा येषु पुष्पादिषु संसक्तिः संभवति तानि परिहरेदिति सर्वत्र वक्तव्यमिति। एषोऽपि प्रमादचर्याविरतेरतिचारः॥१२॥

विशेषार्थ—अनर्थदण्डविरतको उस व्रतके अतिचारोंको छोड़ना चाहिए। उनका स्पष्टीकरण इस प्रकार है—कन्दर्प कामविकारको कहते हैं। जो वचन कामविकारको उत्पन्न करनेवाले होते हैं या जिनमें उसीकी प्रधानता होती है उन वचनोंके प्रयोगको भी कन्दर्प कहते हैं। अतः कन्दर्पका अर्थ है—रागकी तीव्रतासे हँसीसे मिश्रित असभ्य वचनोंका प्रयोग। भौं, आँख, ओष्ठ, नाक, हाथ, पैर और मुखके विकारोंके द्वारा कुचेष्टाके भावको कौत्कुच्य कहते हैं। अर्थात् परिहास और भाण्डपनेको लिये हुए शारीरिक कुचेष्टा कौत्कुच्य है। कन्दर्प और कौत्कुच्य ये दोनों प्रमादचर्याविरतिरूप अनर्थदण्डव्रतके अतिचार हैं। बिना विचारे अण्ट-सण्ट बोलनेवालेको मुखर कहते हैं और मुखरके भावको मौखर्य कहते हैं। अर्थात् धृष्टताको लिए हुए असत्य और असम्बद्ध बकवाद करना मौखर्य है। यह पापोपदेशविरति नामक अनर्थदण्डव्रतका अतिचार है क्योंकि मौखर्य होनेपर पापोपदेशका होना सम्भव होता है यह तीसरा अतिचार है। आवश्यकताका विचार किये बिना अधिक कार्य करना असमीक्ष्याधिकरण नामक चतुर्थ अतिचार है। जैसे तृणोंकी चटाई बनानेवालोंसे कहना, बहुत-सी चटाइयाँ लाना। जितनी मुझे आवश्यकता होगी मैं खरीद लूँगा। बाकीको और भी बहुत-से खरीदनेवाले हैं वे खरीद लेंगे। नहीं तो मैं बिकवा दूँगा। इस प्रकार बिना विचारे बहुत आरम्भ कराना असमीक्ष्याधिकरण है। इसी प्रकार लकड़ी काटनेवालोंसे बहुत सी लकड़ी कटवा लेना, ईंट पकानेवालोंसे बहुत-सी ईंटे पकवा लेना भी असमीक्ष्याधिकरण है। तथा अपने उपकरण हिंसाके अन्य उपकरणोंके साथ रखना, जैसे ओखलीके पास मूसल रखना, हलके साथ फाली रखना, गाड़ीके साथ जुआ रखना, धनुषके साथ बाण रखना आदि। ऐसा होनेसे कोई भी ओखली और मूसल ले जाता है। यदि दोनों अलग-अलग रखे हों तो लेनेवालेको सरलतासे टाला जा सकता है कि हमारे पास मूसल नहीं है या ओखली नहीं है। यह हिंसोपकरणदान विरतिका अतिचार है। सेवनीय अर्थात् भोगोपभोगका जनक जितना अर्थ है उससे अधिक करना सेव्यार्थाधिकता नामक अतिचार है

१. पूरकायाप्का. भ. कु. च.।

अथ भोगोपभोगपरिमाणाख्यतृतीयगुणव्रतस्वीकरणविधिमाह—

भोगोऽयमियान् सेव्यः समयमियन्तं न[1] वोपभोगोऽपि ।
इति परिमायानिच्छंस्तावधिको तत्प्रमाव्रतं श्रयतु ॥१३॥

भोग इत्यादि । अयं भोग्यतया प्रसिद्धो भोगो माल्यताम्बूलादिः समयमियन्तं यावज्जीवं दिवसमासादि-परिच्छिन्नं वा कालं न सेव्यो नोपयोक्तव्यो मया । इयान्वा इदं परिमाणः सेव्य इति संबन्धः कार्यः । एवमुपभोगेऽपि ॥१३॥

अथ भोगोपभोगयोर्लक्षणं तत्त्यागस्य च यावज्जीविकस्य नियतकालस्य च संज्ञाविशेषमन्वाचष्टे—

भोगः सेव्यः सकृदुपभोगस्तु पुनः-पुनः स्रगम्बरवत् ।
तत्परिहारः परिमितकालो नियमो यमश्च कालान्तः ॥१४॥

उसका अर्थ होता है भोगोपभोगके पदार्थोंका अनावश्यक संग्रह करना। इससे आशय यह है कि यदि स्नानके साधन तेल, साबुन वगैरह बहुत हों तो बहुत-से आदमी तालाब आदिमें स्नानके लिए जाते हैं उससे जलकायके जीवोंका अधिक वध होता है। ऐसा करना उचित नहीं है अतः घरपर ही स्नान करना चाहिए। यह सम्भव न हो तो घरपर ही तेल आदि सिरमें लगाकर तालाबके किनारे बैठकर छने जलसे अंजुली भरकर स्नान करे। तथा जिन पुष्प आदिमें आसक्ति हो उन्हें त्याग दे। अन्यथा यह छठा भी प्रमाद विरतिका अतिचार है ॥१२॥

अब भोगोपभोग परिमाण नामक तीसरे गुणव्रतको स्वीकार करनेकी विधि कहते हैं—

यह इतना भोग और यह इतना उपभोग मेरे द्वारा इतने समय तक सेवन करने योग्य है। अथवा यह इतना भोग और यह इतना उपभोग मेरे द्वारा इतने समय तक सेवन करने योग्य नहीं है। इस प्रकार परिमाण करके सेवन करनेके योग्य और सेवन करनेके अयोग्य रूपसे प्रतिज्ञा किये गये भोग और उपभोगसे अधिककी इच्छा नहीं करनेवाला गुणव्रती श्रावक भोगोपभोग परिमाण व्रतको स्वीकार करे ॥१३॥

विशेषार्थ—भोगोपभोग परिमाणव्रतमें भोग और उपभोगका परिमाण दो रूपसे किया जाता है—एक विधि रूपसे और दूसरा निषेध रूपसे। मैं इस इतने भोग और उपभोगका सेवन इतने समय तक करूँगा, यह विधिरूप है। और मैं इस इतने भोग और उपभोगका सेवन इतने समय तक नहीं करूँगा। यह निषेध रूप है। इस तरह दोनों प्रकारसे त्यागका कथन अन्य श्रावकाचारोंमें नहीं किया है। यद्यपि एकसे दूसरेका ग्रहण स्वतः हो जाता है ॥१३॥

आगे भोग और उपभोगका लक्षण तथा यावज्जीवन और नियत समयके लिए किये गये त्यागके नाम बतलाते हैं—

जो एक बार ही सेवन किया जाता है, एक बार भोगकर पुनः नहीं भोगा जाता, उसे भोग कहते हैं। जैसे फूल-माला। और जो बार-बार सेवन किया जाता है अर्थात् एक बार सेवन करके पुनः सेवन किया जाता है वह उपभोग है। जैसे वस्त्र। एक-दो आदि दिन-मास आदिके परिमित कालके लिए भोग-उपभोगके त्यागको नियम कहते हैं। और मरण पर्यन्त किये गये त्यागको यम कहते हैं ॥१४॥

१. -र्थ मयोप- । न्तं सदोप-। मु. ।

सगम्बरवत् । उपलक्षणात् माल्यचन्दनादिर्भोगो वस्त्राभरणादिश्चोपभोग इत्यर्थः । उक्तं च—

'भुक्त्वा परिहातव्यो भोगो भुक्त्वा पुनश्च भोक्तव्यः ।
उपभोगोऽशनवसनप्रभृतिः पञ्चेन्द्रियो विषयः ॥' [र. श्रा. ८३]

कालान्तः—मरणावसानः । उक्तं च—

'नियमो यमश्च विहितौ द्वेधा भोगोपभोगसंहारे ।
नियमः परिमितकालो यावज्जीवं यमो ध्रियते ॥' [रत्न. श्रा. ८७] ॥१४॥

अथ भोगोपभोगपरिसंख्यानस्य त्रसघातबहुवधप्रमादानिष्टानुपसेव्यविषयभेदात्पञ्चविधत्वख्यापनार्थमाह—

**पलमधुमद्यवदखिलस्त्रसबहुघातप्रमादविषयोऽर्थः ।
त्याज्योऽन्यथाप्यनिष्टोऽनुपसेव्यश्च व्रताद्धि फलमिष्टम् ॥१५॥**

त्रसघातविषयः—अन्तःसुषिरप्रायं नालीनलपलक्या-मृणालनालप्रमुखमागन्तुजन्तूनां सम्मूर्छिमजन्तूनां च योग्यमध्यावकाशम् । तथा बहुजन्तुयोनिस्थानं केतकी-निम्बार्जुनारणिशिग्रुपुष्पमधूकबिल्वादि च वस्तु । बहुघातविषयः—अनन्तकायिकं गुडूचीमूलकलशुनार्द्रशृङ्गवेरादिकम् । उक्तं च—

'अल्पफलबहुविघातान्मूलकमार्द्राणि शृङ्गवेराणि ।
नवनीतनिम्बकुसुमं कैतकमित्येवमवहेयम् ॥' [र. श्रा. ८५]

विशेषार्थ—तत्त्वार्थ सूत्रमें[1] इस व्रतका नाम उपभोगपरिभोग परिमाण है। और टीकाकार पूज्यपाद स्वामीने जो एक ही बार वस्तु भोगी जाती है उसे उपभोग और जो बार-बार भोगी जाये उसे परिभोग कहा है। सोमदेवने[2] भोगपरिभोग परिमाण नाम दिया है और जो एक बार सेवन किया जाये उसे भोग तथा जो बार-बार सेवन किया जाये उसे परिभोग कहा है। स्वामी समन्तभद्रके अनुसार तो 'जो एक बार भोगनेमें आता है वह भोग है जैसे भोजन। और जो बार-बार भोगा जा सके वह उपभोग है जैसे वस्त्र। तथा उनका त्याग कुछ समयके लिए करना नियम है और जीवन पर्यन्तके लिए करना यम है' ॥१४॥

आगे त्रसघात, बहुघात, प्रमादविषय, अनिष्ट और अनुपसेव्य पदार्थोंके त्यागरूप पाँच व्रतोंका भी अन्तर्भाव इसी व्रतमें करते हैं—

भोगोपभोग परिमाणव्रतीको मांस, मधु और मदिराकी तरह जिनमें त्रस जीवोंका घात होता है या बहुत जीवोंका घात होता है या जिसके सेवनसे प्रमाद सताता है ऐसे समस्त पदार्थ छोड़ने चाहिए। और जिसमें त्रसघात आदि नहीं होता किन्तु अपनेको इष्ट नहीं है या प्रकृतिके अनुकूल नहीं है तथा उच्च कुलवालोंके सेवनके अयोग्य है उन्हें भी छोड़ना चाहिए, क्योंकि व्रतसे इष्ट फलकी प्राप्ति होती है ॥१५॥

विशेषार्थ—स्वामी समन्तभद्रने भोगोपभोग परिमाणव्रतका कथन करते हुए कहा[3] है कि जिन भगवान्‌के चरणोंकी शरणमें आये हुएको त्रसघातसे बचनेके लिए मांस और मधु तथा प्रमादसे बचनेके लिए मद्यपान छोड़ना चाहिए। पूज्यपाद स्वामीने भी मधु, मद्य,

---

१. सर्वार्थ. ७।२१

२. 'यः सकृत्सेव्यते भावः स भोगो भोजनादिकः । भूषादिः परिभोगः स्यात्पौनःपुन्येन सेवनात् ॥'—सोम. उपा. ७५९ श्लो. ।

३. त्रसहतिपरिहरणार्थं क्षौद्रं पिशितं प्रमादपरिहृतये ।
मद्यं च वर्जनीयं जिनचरणौ शरणमुपयातैः ॥—र. श्रा. ८४ श्लो. ।

प्रमादविषयः—दूषिविषभाङ्गिका धत्तूरकादिवस्तु। अर्थः—इन्द्रियोपभोग्यं धनं च। एतेन धनार्थं क्रूरव्यापाराणामपि त्याज्यत्वमुक्तं स्यात्। अन्यथापि—त्रसघाताद्यविषयोऽप्यर्थो योऽनिष्टो यदा स्वस्यानभिमतः प्रकृतिसात्मको वा न भवति सोऽपि तदा त्याज्यः।

उक्तं च—

'अविरुद्धा अपि भोगा निजशक्तिमपेक्ष्य धीमता त्याज्याः।
अत्याज्येष्वपि सीमा कार्यैकदिवा-निशोपभोग्यतया ॥' [पुरुषार्थ. १६४]

अनुपसेव्यः इष्टोऽपि शिष्टानां शीलनायोग्यश्चित्रवस्त्रविकृतवेषाभरणादिरुद्गारलाला-मूत्रपुरीष-श्लेष्मादिश्च।

मांसको सदा छोड़नेके लिए कहा है। और उन्हींके अनुसार चारित्रसारमें कथन है। श्वेताम्बराचार्य हेमचन्द्रने भी मद्य, मांस, मधु, मक्खन, रात्रिभोजन आदिका त्याग इसी व्रतमें कराया है। किन्तु अमृतचन्द्रजीने अपने पुरुषार्थ सिद्ध्युपायमें भोगोपभोग परिमाण-व्रतीसे इस तरहका कोई त्याग नहीं कराया। और यही उचित है; क्योंकि जब प्रारम्भमें ही अष्टमूल गुणोंके कथनमें मद्य-मांस आदिका त्याग कराया जा चुका तब भोगोपभोग परिमाणव्रतमें उनके त्यागकी चर्चा करना भी उचित नहीं है। इसीसे पं. आशाधरजीने स्वामी समन्तभद्रके रत्नकरण्ड श्रावकाचारका अनुसरण करते हुए भी मद्य-मांसके त्यागकी बात न कहकर मद्य-मांस-मदिराको तरह ही त्रसघात आदिवाले अन्य पदार्थोंके त्यागकी बात कही है। किन्तु रत्नकरण्डमें तो अष्टमूलगुणोंके कथनमें मद्य, मांस, मधुका त्याग आ चुका है। सम्भवतः इसीसे स्वामीजीने जिन भगवान्के चरणोंकी शरणमें आये हुओंसे मद्य-मांस छोड़नेके लिए कहा है। किन्तु फिर भी यह शंका रहती है कि यहाँ यह कहनेकी आवश्यकता ही क्या थी। ऐसा प्रतीत होता है कि अष्टमूल गुणोंकी परम्परा बारह व्रतोंकी तरह प्राचीन नहीं है इसीसे उत्तर कालमें अष्टमूल गुण परिवर्तित हो गये किन्तु बारह व्रतोंमें उस तरहका परिवर्तन नहीं हुआ। यद्यपि मद्य-मांस अभक्ष्य माने जाते रहे हैं किन्तु प्रारम्भसे ही उनके त्यागपर जोर उत्तरकालमें ही दिया गया है। यही कारण है कि सम्यग्दर्शनकी उत्पत्तिके लिए उनके त्यागकी कोई चर्चा कहीं नहीं मिलती। अस्तु, पं. आशाधरजीने कहा है कि जिस प्रकार त्रसघातका आश्रय होनेसे मांस त्यागा जाता है, बहुघातका आश्रय होनेसे मधुका त्याग किया जाता है और प्रमादका आश्रय होनेसे मद्य त्यागा जाता है वैसे ही जिसमें भी त्रसघात आदि हों उन्हें छोड़ देना चाहिए। जैसे जिनकी नालके मध्यमें छिद्र होते हैं, जैसे कमलकी नाल है जिनमें बाहरसे आनेवाले जीव और सम्मूर्छन जीव रहते हैं, तथा अन्य भी बहुत जीवोंके स्थान केतकीके फूल, नीमके फूल, सहजनके फूल, अरणिके फूल, महुआ आदि फल नहीं खाना चाहिए। बहुघातवाले गुरुच, मूली, लहसुन, अदरक आदि, नशा करनेवाले भाँग, धतूरा आदि सेवन नहीं करना चाहिए। इससे धनोपार्जनके लिए क्रूर कर्मवाले व्यापारोंको भी त्याज्य समझना चाहिए। तथा धर्मके अभिलाषीको जिसमें त्रसघात आदि तो नहीं होते किन्तु अपनेको इष्ट नहीं है या अपनी प्रकृतिके अनुकूल नहीं है उसे भी सदाके लिए छोड़ देना चाहिए। तथा जो इष्ट होनेपर भी शिष्ट पुरुषोंके सेवनके अयोग्य है जैसे चित्र-विचित्र वस्त्र, विकृत वेश, आभूषण आदि लार, मूत्र, विष्टा, कफ आदि। उनका भी त्याग करना चाहिये। इनका त्याग करनेमें हेतु यह है कि जिस वस्तुका त्याग नहीं है उसका सेवन न करनेपर भी उसके त्यागसे होनेवाला फल नहीं प्राप्त होता और इसका कारण यह है

उक्तं च—

'यदनिष्टं तद् व्रतयेद्यच्चानुपसेव्यमेतदपि जह्यात् ।
अभिसन्धिकृता विरतिर्विषयाद्योगाद् व्रतं भवति ॥' [र. श्रा. ८६]॥१५॥

अथोक्तमेवार्थं संव्यवहारप्रसिद्ध्यर्थं श्लोकत्रयेणाह—

[1]नालीसूरणकालिन्दद्रोणपुष्पादि वर्जयेत् ।
आजन्म तद्भुजां ह्यल्पं फलं घातश्च भूयसाम् ॥१६॥

नालीत्यादि ।

'यदन्तःसुषिरप्रायं हेयं नालीनलादि तत् ।
अनन्तकायिकप्रायं वल्लीकन्दादि च त्यजेत् ॥' [सो. उपा. ३२९] ॥१६॥

अनन्तकायाः—साधारणशरीरिणः । उक्तं च—

कि उनकी ओर कभी भी मनकी प्रवृत्ति जा सकती है इसलिए उनका व्रत ले लेनेसे ही इष्ट फलकी प्राप्ति होती है। रत्नकरण्ड श्रावकाचारमें भी कहा है कि जो अनिष्ट हो उसका व्रत लेवे और जो सेवनके अयोग्य हो उसे भी छोड़े, क्योंकि योग्य विषयसे अभिप्रायपूर्वक विरत होनेसे तो व्रत होता है। तथा अल्पफल और बहुघात होनेसे मूली, अदरक, मक्खन, नीम और केतकीके फूलको भी त्याज्य कहा है। पूज्यपाद स्वामीने भी रत्नकरण्डके ही कथनका अनुसरण किया है। किन्तु अनिष्टको स्पष्ट करते हुए कहा है कि सवारी और आभरण आदिमें मुझे इतना ही इष्ट है इस तरह अनिष्टसे निवृत्त होना चाहिए। यह निवर्तन कुछ कालके लिए भी होता है और जीवन पर्यन्तके लिए भी होता है।' चारित्रसारमें पूज्यपादका ही अनुसरण है। सर्वार्थसिद्धिमें अनुपसेव्यकी चर्चा नहीं है। चारित्रसारमें चित्र-विचित्र वेष, वस्त्र, आभरण आदिको अनुपसेव्य कहा है। अमृतचन्द्रजीने पुरुषार्थ सिद्ध्युपायमें (१६२-१६५ श्लो.) भी अनन्तकायको और मक्खनको त्याज्य कहा है और लिखा है कि जो परिमित भोगोंसे सन्तुष्ट होकर बहुत-से भोगोंको छोड़ देता है वह बहुत-सी हिंसासे विरत होता है अतः उसके विशिष्ट अहिंसा होती है। सोमदेवने भी अपने उपासकाध्ययनमें प्याज, केतकी और नीमके फूल तथा सूरणको आजन्म त्याज्य कहा है ॥१५॥

आगे उक्त कथनको तीन श्लोकोंके द्वारा कहते हैं—

धर्मका अभिलाषी श्रावक नाली, सूरण, कलींदा, द्रोण पुष्प आदि जीवन पर्यन्त छोड़े। क्योंकि उनको खानेवालोंका फल तो थोड़ा होता है अर्थात् जितना समय खानेमें लगता है उतने समय तक ही स्वाद आता है किन्तु उनके खानेसे उनमें रहनेवाले बहुत-से जीवोंका घात होता है ॥१६॥

विशेषार्थ—अमृतचन्द्रजीने अनन्तकाय वनस्पतियोंके त्यागपर जोर दिया है; क्योंकि एकके मारनेपर सब मर जाते हैं। सोमदेवजीने भी अनन्तकायिक नाली, लता, कन्द आदिका निषेध किया है ॥१६॥

उक्त कथनको ही व्रतकी दृढ़ताके लिए पुनः विशेष रूपसे कहते हैं—

१. 'पलाण्डुकेतकीनिम्बसुमनःसूरणादिकम् । त्यजेदाजन्म तद्रूपबहुप्राणिसमाश्रयम् ॥'
—सोम. उपासका., ७६२ श्लो.

२. रत्न. श्रा. ८५-८६ श्लो.।

३. सर्वा. सि. ७।२१ ।

अनन्तकायाः सर्वेऽपि सदा हेया दयापरैः ।
यदेकमपि तं हन्तुं प्रवृत्तो हन्त्यनन्तकान् ॥१७॥

'एकमपि प्रजिघांसुर्निहन्त्यनन्तान् यतस्ततोऽवश्यम् ।
करणीयमशेषाणां परिहरणमनन्तकायानाम् ॥' [पुरुषा. १६२] ॥१७॥

आमगोरससंपृक्तं द्विदलं प्रायशोऽनवम् ।
वर्षास्वदलितं चात्र पत्रशाकं च नाहरेत् ॥१८॥

द्विदलं—मुद्गमाषादि । उक्तं च—

'आमगोरससंपृक्त-द्विदलादिषु जन्तवः ।
दृष्टाः केवलिभिः सूक्ष्मास्तस्मात्तानि विवर्जयेत् ॥' [योगशा. ३।७१]

अनवं—पुराणम् । प्रायग्रहणात्पुराणस्यापि चिरकालकृष्णीभूतकुलित्थादिरदृष्टजन्तुसम्मूर्छनस्याप्रतिषेधः । उक्तं च—

दयालु श्रावकोंको सदा सभी अनन्तकाय वनस्पति त्यागनी चाहिए, क्योंकि उनमें-से जो एक भी संख्यावाली अनन्तकाय वनस्पतिको खाने आदिके द्वारा मारनेमें प्रवृत्त होता है वह अनन्त जीवोंका घात करता है ॥१७॥

विशेषार्थ—जिनमें अनन्त जीवोंका आश्रय होता है उन्हें अनन्तकाय कहते हैं। मूल आदिसे पैदा होनेवाली वनस्पति अनन्तकाय होती है। इसके सात प्रकार हैं—एक जो मूलसे पैदा होती है जैसे अदरक, हल्दी वगैरह। दूसरी जो अग्र भाग बोनेसे पैदा होती है जैसे नेत्रबाला। तीसरी जो पर्वसे पैदा होती है जैसे ईख, बेंत वगैरह। चौथी कन्दसे पैदा होती है जैसे प्याज, सूरण वगैरह। पाँचवीं जो स्कन्धसे पैदा होती है, जैसे ढाक, सलई वगैरह। छठी, जो बीजसे पैदा होती है, जैसे गेहूँ, धान वगैरह। सातवीं सम्मूर्छिम, जो नियत बीजके अभावमें अपने योग्य पुद्गलोंसे ही शरीर प्राप्त करती है जैसे घास वगैरह। गोम्मटसारमें कहा है कि ये वनस्पतियाँ प्रत्येक भी होती हैं और अनन्तकाय भी होती हैं। उनके आश्रयसे उनमें निगोदिया जीवोंका आवास रहता है। धवला टीकामें कहा है कि प्रत्येक शरीर वनस्पतिके आश्रयसे बादर निगोद जीव रहते हैं ऐसा आगममें कहा है। जैसे थूहर, अदरख, मूली वगैरह। अतः इनका भक्षण नहीं करना चाहिए। क्योंकि निगोदिया[3] साधारणकायके अनन्त जीवोंका एक साथ जन्म और एक साथ मरण होता है। एकके मरने पर सब जीव मर जाते हैं ॥१७॥

दयालु श्रावक कच्चे अर्थात् जिसे आगपर नहीं पकाया गया है ऐसे दूध, दही और बिना पकाये दूधसे तैयार हुए मठेके साथ मिले हुए द्विदल अर्थात् मूँग, उड़द आदि धान्यको न खावे। तथा प्रायः करके पुराने द्विदलको न खावे। तथा वर्षा ऋतुमें बिना दले हुए द्विदलको और पत्तेकी शाक-भाजीको न खावे ॥१८॥

१. 'मूलग्गपोरबीजा कंदा तह खंदबीजबीजरुहा । सम्मुच्छिमा य भणिया पत्तेयाणंतकाया य ॥'
—गो. सार जी., १८६ गाथा।

२. 'बादरनिगोदप्रतिष्ठिताश्चार्षान्तरेषु श्रूयते । के ते ? स्नुग्गार्दकमूलकादयः ॥—पु. १, पृ. १७१।

३. 'जत्थेक्क मरइ जीवो तत्थ दु मरणं हवे अणंताणं ।
वक्कमई जत्थ एक्क वक्कमणं तत्थ णंताणं ॥'—गो. जी., गा. १९३।

'द्विदलं द्विदलं प्राश्यं प्रायेणानवतां गतम् ।
शिम्बयः सकलास्त्याज्याः साधिताः सकलाश्च याः ॥' [सो. उपा. ३३०]

अदलितं—अकृतद्विधाभावं द्विदलम् । प्रावृषि हि मुद्गादीनामन्तःप्ररोहस्यायुर्वेदप्रसिद्धत्वात् त्रससंमूर्छनस्य च दृष्टत्वेन संभाव्यमानत्वादभोज्यत्वम् । एतेन विरूढानामपि तेषां निषेध उक्तः स्यात् । अत्र वर्षासु त्रसस्थावरसंसक्तबहुलत्वात्पत्रशाकस्य ॥१८॥

अथैतद्व्रतस्य विशेषादानृशंस्यसिद्ध्यङ्गत्वमुपदिशति—

भोगोपभोगकृशनात्कृशीकृतधनस्पृहः ।
धनाय कोट्टपालादिक्रियाः क्रूराः करोति कः ॥१९॥

विशेषार्थ—कच्चे दूध, कच्चे दूधसे जमे दही तथा उससे बने मठेमें मिले द्विदलको अभक्ष्य कहा है, क्योंकि आगममें उसमें बहुत सूक्ष्म जीवोंकी उत्पत्ति कही है । लोकव्यवहार-में दूध कच्चा हो या पकाया हो उसमें और उससे बने दही आदिमें मिलाये द्विदलको नहीं खाया जाता । यहाँ केवल कच्चे दूध और उससे बने दही आदिमें मिले द्विदलको त्याज्य कहा है अर्थात् पकाये दूध और उससे बने दही आदिमें मिले द्विदलको त्याज्य नहीं कहा । किन्तु पं. आशाधरजीसे पूर्वके किसी दिगम्बराचार्य प्रणीत शास्त्रमें द्विदलके सम्बन्धमें कोई कथन हमारे देखनेमें नहीं आया । हाँ, श्वेताम्बराचार्य हेमचन्द्रके योगशास्त्रमें यह कथन अवश्य है और सम्भवतः आशाधरजीने वहींसे इसे लिया है क्योंकि उनके सागारधर्मामृत-पर योगशास्त्रका भी प्रभाव है । अस्तु, इसी तरह प्रायः पुराना द्विदल भी नहीं खाना चाहिए । सोमदेव सूरिने भी पुराने द्विदलका ही त्याग कराया है । यहाँ प्रायः इसलिए कहा है कि चिरकाल होनेसे काले हो गये कुलथे आदिमें यदि सम्मूर्छन जन्तु दृष्टिगोचर न हों तो उसके खानेका निषेध नहीं है ऐसा पं. आशाधरजीने अपनी टीकामें लिखा है । वर्षाऋतुमें मूँग आदिके अन्दर अंकुर पैदा हो जाता है ऐसा आयुर्वेदमें प्रसिद्ध है । तथा सम्मूर्छन त्रस-जीवोंकी भी सम्भावना रहती है : अतः वर्षाऋतुमें द्विदलको बिना दले नहीं खाना चाहिए । तथा वर्षाऋतुमें पत्तेके शाकमें त्रस और स्थावर जीवोंका संसर्ग विशेष हो जाता है इसलिए उसे भी नहीं खाना चाहिए । हरे फलादिरूप शाकके खानेका निषेध नहीं है । किन्तु लाटी संहितामें तो सभी शाक पत्रोंको सदा न खानेका विधान किया है । लिखा है कि 'उनमें अवश्य ही सूक्ष्म त्रस जीव रहते हैं । जिनमें-से कुछ दृष्टिगोचर भी होते हैं । वे उस शाक-पत्रके आश्रयको कभी नहीं छोड़ते । इसलिए आत्महितैषी धर्मार्थी पुरुषको और सम्यग्दर्शनसे युक्त प्रथम प्रतिमाधारी श्रावकको पानसे लेकर सब पत्तेवाले शाक नहीं खाने चाहिए ॥१८॥

आगे कहते हैं कि इस व्रतके पालनसे क्रूर कर्मोंका भी त्याग हो जाता है—

विवेक पूर्वक भोगोपभोगको कम करनेसे जिसकी धनकी लालसा कम हो गयी है ऐसा कौन पुरुष धनके लिए कोतवाल आदिकी क्रूर आजीविका करेगा अर्थात् कोई नहीं करेगा ॥१९॥

---

१. 'आमगोरससंपृक्तं द्विदलं पुष्पितौदनम् । दध्यहर्द्वितयातीतं कुथितान्नं च वर्जयेत् ॥'—योगशास्त्र ३।७।

२. 'शाकपत्राणि सर्वाणि नादेयानि कदाचन । श्रावकैर्मांसदोषस्य वर्जनार्थं प्रयत्नतः ।
तत्रावश्यं त्रसाः सूक्ष्माः केचित्स्युर्दृष्टिगोचराः । न त्यजन्ति कदाचित्तं शाकपत्राश्रयं मनाक् ॥
तस्माद्धर्मार्थिना नूनमात्मनो हितमिच्छता । आताम्बूलं दलं त्याज्यं श्रावकैर्दर्शनान्वितैः ॥'
—लाटी सं. २।३५-३७ ।

कोट्टपालादि । आदिशब्देन गुप्तिपाल-वीतपाल-शौल्किकादि । क्रूरा:—प्राणिघातकर्कशा: । उक्तं च—

'भोगोपभोगमूला विरताविरतस्य नान्यतो हिंसा ।
अधिगम्य वस्तु तत्त्वं स्वशक्तिमपि तावपि त्याज्यौ ॥' [पुरुषार्थ. १६१] ॥१९॥

अथ भोगोपभोगपरिमाणव्रतातिचारपञ्चकं लक्षयति—

सचित्तं तेन संबद्धं संमिश्रं तेन भोजनम् ।
दुष्पक्वमभिषवं भुञ्जानोऽत्येति तद्व्रतम् ॥२०॥

सचित्तं चेतनावद्द्रव्यं हरितकायमपक्वकर्कट्यादि । त्रसबहुघातेत्यादिना निषिद्धेऽप्यत्र प्रवृत्तौ भङ्गसद्भावेऽप्यतिचाराभिधानं व्रतसापेक्षस्याप्रणिधानातिक्रमादिना प्रवृत्तौ द्रष्टव्यमिति प्रथमः । तेन संबद्धं—सचित्तेनोपश्लिष्टं सचेतनवृक्षादिसंबद्धं गोंदादिकं पक्वफलादिकं वा सचित्तान्तर्बीजं खर्जूराम्रादि च । तद्भक्षणं हि सचित्तभोजनवर्जकस्य प्रमादादिना सावद्याहारप्रवृत्तिरूपत्वादतिचारः । अथवा बीजं त्यक्ष्यामि तस्यैव सचेतनत्वात् कटाहं तु भक्षयिष्यामि तस्याचेतनत्वादिति बुद्ध्या पक्वं खर्जूरादिफलं मुखे प्रक्षिपतः सचित्तवर्जकस्य सचित्तप्रतिबद्धाहारोऽसौ द्वितीयः । संमिश्रं तेन सचित्तेन व्यतिकीर्णं विभक्तुमशक्यं सूक्ष्मजन्तुकमित्यर्थः । अथवा सचित्तशबलं तत्संमिश्रं यथा आर्द्रकदाडिमबीजचिर्भटादिमिश्रं पूरणादिकं तिलमिश्रं वा यवधानादिकम् । अयमपि पूर्ववदतीचारस्तृतीयः । दुष्पक्वं—सान्तस्तण्डुलभावेन अतिक्लेदनेन वा दुष्टं पक्वं मन्दपक्वं वा दुष्पक्वम् । तच्चार्धस्विन्नं—पृथुकतण्डुलयवगोधूमस्थूलमण्डकफलादिकमामदोषात्रहत्वेनैहिकप्रत्यवायकारणम् । उक्तं च—

विशेषार्थ—टीकामें 'आदि' शब्दसे गुप्तिपाल, वीतपाल और शौल्किकके कार्यका निषेध किया है। इनमें-से प्रारम्भके दो पद तो सुरक्षा सम्बन्धी प्रतीत होते हैं और अन्तिम कराधिकारीका पद है। इनमें कड़ाई करना पड़ता है। अमृतचन्द्रजीने भोगोपभोगको ही त्याज्य कहा है क्योंकि वही हिंसाका मूल है ॥१९॥

आगे भोगोपभोग व्रतके पाँच अतिचारोंको कहते हैं—

सचित्त भोजनको, सचित्तसे सम्बन्ध रखनेवाले भोजनको, सचित्तसे मिले हुए भोजनको, अधपके या अधिक पके भोजनको और गरिष्ट भोजनको करनेवाला श्रावक भोगोपभोग परिमाणव्रतमें अतिचार लगाता है ॥२०॥

विशेषार्थ—जिसमें चेतना हो ऐसी हरितकाय वनस्पतिको सचित्त कहते हैं। यद्यपि त्रसबहुघात इत्यादि कथनसे उसका निषेध हो जानेपर भी उसमें प्रवृत्ति होनेपर व्रतके भंगकी बात आती है। फिर भी व्रतकी अपेक्षा रखते हुए ध्यान न रहनेसे प्रवृत्ति होनेपर सचित्त भोजनको अतिचार कहा है। यह प्रथम अतिचार है। सचित्त वृक्ष आदिसे सम्बद्ध गोंद आदिको या पके फल आदिको या जिसके अन्दरके बीज सचित्त हैं ऐसे खजूर, आम आदिको सचित्तसम्बद्ध कहते हैं। सचित्त भोजनके त्यागीके द्वारा उनका भक्षण प्रमाद आदिवश ही होता है अतः सावद्य आहारमें प्रवृत्ति होनेसे उसे अतिचार कहा है। अथवा 'इसके बीज ही तो सचित्त हैं उन्हें छोड़ दूँगा। शेष भाग खाऊँगा वह तो अचित्त है' इस बुद्धिसे पके हुए खजूर आदिके फलको मुखमें रखनेवाले सचित्तत्यागीके सचित्तसम्बद्ध आहार नामका दूसरा अतिचार होता है। सचित्तसे मिले हुएको, जिसे अलग करना शक्य नहीं है अर्थात् जिसमें सूक्ष्म जन्तु हैं उसे सचित्त सम्मिश्र कहते हैं। जैसे अदरक, अनारके बीज और चिर्भटी आदिसे मिले हुए पूड़े या तिल मिले हुए यवधान। यह भी पूर्ववत् तीसरा अतिचार है। जिसके अन्दर चावलका कुछ कच्चा अंश रह गया हो या अत्यन्त पक

'न चातिमात्रमेवान्नं आमदोषाय केवलम् ।
द्विष्टं विष्टं भिदग्धामगुरुरूक्षहिमाशुचि ॥
विदाहि शष्कमत्यम्बुप्लुतं चान्नं न जीर्यते ।' [ ]

तथा यावतांशेन तत्सचेतनं तावता परलोकमप्युपहन्ति । पृथुकादेर्दुष्पक्वतया [1]संभवत्सचेतनामयत्वा-त्यदत्वेनाचेतनमिति भुञ्जानस्यातिचारश्चतुर्थः । अभिषवं सौवीरादिद्रवं वृष्यं वा । अयमप्यतिक्रमादिना-ऽतिचारः पञ्चमः । चारित्रसारे सचित्ताद्याहाराणां पुनरतिचारत्वोपपादनार्थमिदमुक्तम्—'एतेषामभ्यवहरणे सचित्तोपयोग इन्द्रियमदवृद्धिर्वातादिप्रकोपो वा स्यात् । तत्प्रतिकारविधाने पापलेपो भवति । अतियतयश्चैनं परिहरेयुरिति ।' अत्राह स्वामी—

'विषयविषतोऽनुपेक्षानुस्मृतिरतिलौल्यमतितृषानुभवौ ।
भोगोपभोगपरिमाव्यतिक्रमाः पञ्च कथ्यन्ते ॥' [र. श्रा. ९०]

गया हो उसे दुष्पक्व कहते हैं या जो दुष्ट रूपसे पका हो या कम पका हो उसे दुष्पक्व कहते हैं। अधपके चावल, जौ, गेहूँ, चिउड़ा आदि खानेसे पेटमें आँव हो जाती है अतः ऐसा भोजन इस लोक सम्बन्धी बाधाका कारण होता है। तथा जितने अंशमें वह सचेतन होता है उतने अंशमें परलोकका घात करता है। इस तरह दुष्पक्वका कुछ अंश सचेतन होनेसे कुछ अंश पक्व होनेसे वह चेतन भी होता है और अचेतन भी होता है उसका भक्षण चतुर्थ अतिचार है। जो पतले या गरिष्ट पदार्थ हैं उनका भक्षण अभिषव नामक पाँचवाँ अतिचार है। वैद्यक शास्त्रके अनुसार भी इस तरहका भोजन अजीर्ण और आमकारक होता है। चारित्रसारमें सचित्तादि आहारको अतिचार बतलानेमें यह युक्ति दी है कि इनके भक्षणमें सचित्तका उपयोग होता है, इन्द्रियोंके मदमें वृद्धि होती है। अथवा वात आदिका प्रकोप होता है और उनका इलाज करनेपर पाप लगता है। तथा मुनि भी सचित्त भोजन नहीं करते हैं। प्रायः सर्वत्र भोगोपभोग परिमाणव्रतके ये ही अतिचार कहे हैं। किन्तु स्वामी समन्तभद्र-के द्वारा कहे अतिचार बिलकुल भिन्न हैं जो इस प्रकार हैं—विषके समान विषयोंमें आदर होना। अर्थात् विषय भोगसे विषय भोग सम्बन्धी वेदनाका प्रतीकार हो जानेपर भी पुनः इच्छित नारीका आलिंगन आदि करते रहना प्रथम अतिचार है। विषय भोगसे वेदनाका प्रतिकार हो जानेपर भी बार-बार विषयोंके सौन्दर्यका उनकी सुखसाधनता आदिका चिन्तन करना। यह अतिआसक्तिका कारण होनेसे दूसरा अतिचार है। वेदनाका प्रतिकार हो जानेपर भी पुनः-पुनः उसको भोगनेकी आकांक्षा तीसरा अतिचार है। स्त्रीभोग आदिके प्राप्त होनेकी अतिलालसा यह चतुर्थ अतिचार है। जब नियत समयपर भोग-उपभोगका अनुभव करता है तब भी अत्यन्त आसक्तिसे करता है, वेदनाके प्रतिकारकी भावनासे नहीं करता। अतः यह पाँचवाँ अतिचार है। इनका नाम क्रमशः विषयविषसे अनुपेक्षा, अनु-स्मृति, अतिलौल्य, अतितृषा और अतिअनुभव है। ये अतिचार भी 'परेऽप्यूह्यास्तथात्ययाः' इस पूर्वकथनसे संगृहीत हो जाते हैं। सोमदेवाचार्यने भी पूर्ववत् ही अतिचार कहे हैं— जो भोजन कच्चा है या जल गया (दुष्पक्व) है, जिसका खाना निषिद्ध है, जो जन्तुओंसे सम्बद्ध है, मिश्र है और बिना देखा है ऐसे भोजनको खाना भोगोपभोग परिमाण व्रतकी

१. किंचित् सचेतनावयवत्वात्पक्वत्वाच्च चेतनाचेतनमिति....भ. कु. च. ।
२. —रत्न. श्रा० ९० श्लो. ।

विषयविषत:—विषयकल्पेषु विषयेष्वादरो विषयानुभवनात्तद्वेदनाप्रतीकारे जातेऽपि पुनरभीष्टाङ्गनासंभाषणालिङ्गनाद्यवर्जनरूपः प्रथमः। अनुस्मृतिस्तु तदनुभवात्तत्प्रतीकारे जातेऽपि पुनः पुनर्विषयाणां सौन्दर्यसुखसाधनत्वाद्यनुचिन्तनमत्यासक्तिहेतुत्वादतिचारः। अतिलौल्यमतिगृद्धिः तत्प्रतिकारे जातेऽपि पुनः पुनस्तदनुभवाकाङ्क्षेत्यर्थः। अतितृषा भाविनो भोगादेरतिगृद्धया प्राप्त्याकाङ्क्षा। अत्यनुभवो नियतकाले यदा भोगोपभोगावनुभवति तदा अत्यासक्त्या अनुभवति न पुनर्वेदनाप्रतिकारतयाऽतो अतिचार इति। एतेऽपि चात्र ग्रन्थे 'परेऽप्यूह्यास्तथात्यया' इति वचनात् संगृहीता एव। तद्वच्चेमेऽपि श्रीसोमदेवबुधाभिमताः—

'दुष्पक्वस्य निषिद्धस्य जन्तुसंबन्धमिश्रयोः।
अवीक्षितस्य च प्राशस्तत्संख्याक्षतिकारणम् ॥' [सो. उपा. ७६३]

अत्राह सिताम्बराचार्यः—भोगोपभोगसाधनं यद्द्रव्यं तदुपार्जनाय यत्कर्मव्यापारः तदपि भोगोपभोगशब्देनोच्यते कारणे कार्योपचारात्। ततः कोट्टपालादि खरकर्मापि त्याज्यम्। तत्र च खरकर्मत्यागलक्षणे भोगोपभोगव्रते अंगारजीविकादीन् पञ्चदशोऽतिचारांस्त्यजेदिति। तदचारु, लोके सावद्यकर्मणा परिगणनस्य कर्तुमशक्यत्वात्। अथोच्यते अतिमन्दमतिप्रतिपत्त्यर्थं तदुच्यते तर्हि तदप्यस्तु मन्दमतीन् प्रति पुनस्त्रसबहुघातविषयार्थत्यागोपदेशेनैव तत्परिहारस्य प्रदर्शितत्वादिति ॥२०॥

एतदेव श्लोकत्रयेण संगृह्णन्नाह—

व्रतयेत्खरकर्मात्र मलान् पञ्चदश त्यजेत्।
वृत्तिं वनाग्न्यनस्फोटभाटकैर्यन्त्रपीडनम् ॥२१॥
निर्लाञ्छनासतीपोषौ सरःशोषं दवप्रदाम्।
विषलाक्षादन्तकेशरसवाणिज्यमङ्गिरुक् ॥२२॥
इति केचिन्न तच्चारु लोके सावद्यकर्मणाम्।
अगण्यत्वात्प्रणेयं वा तदप्यतिजडान् प्रति ॥२३॥

क्षतिका कारण है। श्वेताम्बराचार्य हेमचन्द्रने कहा है—भोगोपभोगमें साधन जो द्रव्य है उसको कमानेके लिए जो काम रोजगार-धन्धा किया जाता है, कारणमें कार्यका उपचार करके उसे भी भोगोपभोग शब्दसे कहा जाता है। इसलिए भोगोपभोगपरिमाणव्रतीको कोतवालगिरी आदि क्रूरकर्म भी छोड़ना चाहिए। तथा उस खरकर्मत्याग भोगोपभोगव्रतमें पन्द्रह अतिचारोंको छोड़ना चाहिए। किन्तु उनका यह कथन ठीक नहीं है क्योंकि लोकमें सावद्य कार्योंकी गिनती करना शक्य नहीं है। यदि कहोगे अत्यन्त मन्दमतीको समझानेके लिए उनका कथन करते हैं तो उनके लिए वह रहे। परन्तु मन्द बुद्धियोंके लिए तो त्रसघात और बहुघात-विषयक पदार्थोंका त्याग बतलानेसे ही खरकर्मोंके त्यागको बतला दिया है ॥२०॥

आगे तीन श्लोकोंके द्वारा उन्हीं खरकर्मके अतिचारोंको कहते हैं—

भोगोपभोगपरिमाणव्रतीको खरकर्मका व्रत लेना चाहिए और उस खरकर्म व्रतके पन्द्रह अतिचारोंको छोड़ना चाहिए। वे इस प्रकार हैं—वनजीविका, अग्निजीविका, शकटजीविका, स्फोटजीविका, भाटकजीविका, यन्त्रपीडन, निर्लांछन कर्म, असतीपोष, सरःशोष, दवदान, विषव्यापार, लाक्षाव्यापार, दन्तव्यापार, केशव्यापार और रसव्यापार। ऐसा कोई श्वेताम्बराचार्य कहते हैं। किन्तु वह ठीक नहीं है, क्योंकि लोगोंमें प्रचलित पापकर्मोंको गिनाना अशक्य है। यदि उस खरकर्मव्रतका कथन ही करना हो तो अत्यन्त मन्द बुद्धिजनोंको समझानेके लिए ही करना चाहिए ॥२१-२३॥

खरकर्म—खरं कठोरं प्राणिबाधकं कर्म व्यापारम् । तथा त्यजेत् खरकर्मव्रते मलान् कर्मादानसंज्ञान् । तदुक्तम्—

'अमी भोजनतस्त्याज्याः कर्मतः खरकर्म तु ।
तस्मिन् पञ्चदशमलान् कर्मादानानि संत्यजेत् ॥' [योगशा. ३।९९]

वृत्तिं—जीविकाम् । अनः—शकटम् ॥२०॥ दवप्रदां—दवदानम् । अङ्गिरुक्—प्राणिबाधाकरम् । तदुक्तम्—

'अङ्गारवनशकट-भाटक-स्फोटजीविकाः ।
दन्तलाक्षारसकेशविषवाणिज्यकानि च ॥
यन्त्रपीडानिर्लाञ्छनमसतीपोषणं तथा ।
दवदानं सरःशोष इति पञ्चदश त्यजेत् ॥' [योगशा. ३।१००–१०१]

तत्राङ्गारजीविका षड्जीवनिकायविराधनाहेतुना अङ्गारकरणाद्यग्निकर्मणा जीवनम् । उक्तं च—

'अङ्गारभ्राष्ट्रकरणं कुम्भायःस्वर्णकारिता ।
ठठारत्वेष्टका-पाकाविति ह्यङ्गारजीविका ॥' [योगशा. ३।१०२]

तत्र वनजीविका च्छिन्नस्याच्छिन्नस्य वा वनस्पतिसमूहादेर्विक्रयेण, तथा गोधूमादिधान्यानां घरट्ट-शिलादिना पेषणेन दलनेन वा वर्तनम् । उक्तं च—

'छिन्नाछिन्नवनपत्रप्रसूनफलविक्रयः ।
कणानां दलनात्पेषाद्वृत्तिश्च वनजीविका ॥' [योगशा. ३।१०३]

शकटजीविका—शकटरथतच्चक्रादीनां स्वयं परेण वा निष्पादनेन वाहनेन विक्रयणेन वा वृत्तिर्बहु-भूतग्रामोपमर्दिका गवादीनां च बन्धादिहेतुः । उक्तं च—

'शकटानां तदङ्गानां घटनं खेटनं तथा ।
विक्रयश्चेति शकटजीविका परिकीर्तिता ॥' [योग. ३।१०४]

भाटकजीविका—शकटादिभारवाहनमूल्येन जीवनम् । उक्तं च—

'शकटोक्षलुलायोष्ट्रखराशतरवाजिनाम् ।
भारस्य वाहनाद्वृत्तिर्भवेद्भाटकजीविका ॥' [योग. ३।१०५]

स्फोटजीविका—ओड्डादिकर्मणा पृथिवीकायिकाद्युपमर्दनहेतुना जीवनम् । उक्तं च—

'सरःकूपादिखननशिलाकुट्टनकर्मभिः ।
पृथिव्यारम्भसंभूतैर्जीवनं स्फोटजीविका ॥' [योग. ३।१०६]

विशेषार्थ—क्रूर दयाविहीन कार्योंको खरकर्म कहते हैं। उनके पन्द्रह अतिचारोंका स्वरूप इस प्रकार है। १. वनजीविका—कटे या बिना कटे वृक्षादिके जंगलको बेचनेकी तथा गेहूँ, धान वगैरह चाकीसे पीसने-कूटने आदिके द्वारा आजीविका करना। २. अग्निजीविका—छह कायके जीवोंकी विराधनामें हेतु कोयला बनाकर बेचनेसे आजीविका करना। लोहकार, स्वर्णकार, ठठेरा, ईंट पकाना आदि इसीमें आता है। ३. शकटजीविका—गाड़ी, रथ और उनके पहिये आदि स्वयं या दूसरोंसे बनवाकर आजीविका करना, या गाड़ी जोतने-बेचनेसे आजीविका करना, ऐसी आजीविकासे बहुत-से जीवोंका घात होता है तथा बैल वगैरहको बाँधकर रखना होता है। ४. स्फोटजीविका—कुँआ, तालाब आदि खोदने, पृथ्वी जोतने, पत्थर तोड़ने आदिसे आजीविका करना। ५. भाटकजीविका—गाड़ी वगैरह भाड़ेपर चलाकर आजीविका करना। ६. यन्त्रपीड़न—तिलादि पेलनेका या तिलादि देकर तेल लेनेका

दन्तवाणिज्यं—हस्त्यादिदन्ताद्यवयवानां पुलिन्दादिषु द्रव्यदानेन तदुत्पत्तिस्थाने वाणिज्यार्थग्रहणम्। ते हि तथा ग्रहणे तत्प्रतिक्रयार्थं हस्त्यादिवधं कुर्वन्ति। अनाकारे तु दन्तादिक्रयविक्रये न दोषः। उक्तं च—

'दन्तकेशनखास्थित्वग्रोम्णो ग्रहणमाकरे।
त्रसाङ्गस्य वाणिज्यार्थं दन्तवाणिज्यमुच्यते ॥' [योग. ३।१०७]

लाक्षावाणिज्यं—लाक्षादिविक्रयणम्। लाक्षायाः सूक्ष्मत्रसजन्तु-संघातानन्तकायिक-प्रवाल-जालोपमर्दाविनाभाविना स्वयोनिवृक्षादुद्धरणेन टंकणमन:शिलासकूटमालिप्रभृतीनां बाह्यजीवघातहेतुत्वेन गुगुलिकायाः जन्तुघाताविनाभावित्वेन धातकीपुष्पत्वचयस्य च मद्यहेतुत्वेन तद्विक्रयस्य पापास्रवहेतुत्वात्।

उक्तं च—

'लाक्षा-मनःशिला-नीली-धातकीटंकणादिनः।
विक्रयः पापसदनं लाक्षावाणिज्यमुच्यते ॥' [योग. ३।१०८]

रसवाणिज्यं—नवनीतादिविक्रयः। नवनीते हि जन्तुसंमूर्छनं मधुवसामद्यादौ जन्तुघातोद्भवत्वं मद्ये मदजनकत्वं तद्गतक्रिमिविघातश्चेति तद्विक्रयस्य दुष्टत्वम्। केशवाणिज्यं द्विपदादिविक्रयः। तत्र च दोषास्तेषां पारवश्यवधबन्धादयः क्षुत्पिपासापीडा चेति।

उक्तं च—

'नवनीतवसाक्षौद्रमद्य प्रभृतिविक्रयः।
द्विपाच्चतुष्पाद्विक्रयो वाणिज्यं रसकेशयोः ॥' [योग. ३।१०९]

विषवाणिज्यं जीवघ्नवस्तुविक्रयः। उक्तं च—

'विषास्त्रहलयन्त्रायोहरितालादिवस्तुनः।
विक्रयो जीवितघ्नस्य विषवाणिज्यमुच्यते ॥' [योगशा. ३।११०]

यन्त्रपीडाकर्म—तिलयन्त्रादिपीलनम्। तिलादिकं च दत्वा तैलादिप्रतिग्रहणम्। तत्कर्मणश्च पीलनाय तिलादिक्षोदात्तद्गतत्रसघाताद्दुष्टत्वम्। यल्लौकिका अप्याहुः—

'दशसूनासमं चक्रं दशचक्रसमो ध्वजः।
दशध्वजसमा वेश्या दशवेश्यासमो नृपः ॥' [ ] इति।

उक्तं च—

तिलेक्षुसर्षपैरण्डजलयन्त्रादिपीडनम्।
दलतैलस्य च कृति यन्त्रपीडा प्रकीर्तिता ॥' [योग. ३।१११]

व्यापार करना। इस काममें तिल आदिमें रहनेवाले त्रसजीवोंका घात होता है। ७. निर्लांछन कर्म—बैल आदिकी नाक बींधनेसे आजीविका करना। ८. असतीपोष—प्राणिघातक कुत्ता, बिल्ली आदिका पालना तथा आजीविकाके लिये दास-दासियोंका पालना। ९. सरःशोष—धान बोनेके लिए जलाशयोंसे नाली द्वारा पानी निकालना। इससे जलमें रहनेवाले त्रसोंका तथा उस जलाशयके जलपर पलनेवाले छह कायके जीवोंका घात होनेसे दोष है। १०. दवदान—तृण आदिको जलानेके लिए आग देना। उसके दो भेद हैं—एक व्यसनसे, जैसे भील लोग यों ही अग्नि लगा देते हैं। दूसरा पुण्यबुद्धिसे, जैसे मेरे मरनेपर मेरे कल्याणके लिए इतने दीपोत्सव करना। अथवा घासको जला देनेसे नये तृणांकुर पैदा होंगे। उन्हें गायें चरेंगी। या खेतमें अधिक धान पैदा करनेके लिए अग्नि जलाना दवदान है। इसमें करोड़ों जीवोंका वध होता है। ११. विषवाणिज्य—जीवघातक वस्तुओंका व्यापार करना। १२. लाक्षावाणिज्य—लाखका व्यापार करना। जब लाखके वृक्षोंसे लाख

निर्लाञ्छनकर्म—वृषभादेर्नासावेधादिना जीविका। उक्तं च—

'नासावेधोऽङ्कनं मुष्कछेदनं पृष्ठगालनम्।
कर्णकम्बलविच्छेदो निर्लाञ्छनमुदीरितम् ॥' [योग. ३।११२]

मुष्कछेदनं गवाश्वादीनां वर्धितकीकरणम्। पृष्ठगालनं करभाणामेव। निर्लाञ्छनं नितरां लाञ्छनं—अंगावयवछेदः। असतीपोषणं प्राणिघ्नप्राणिपोषो भाटिग्रहणार्थं दासीपोषश्च। उक्तं च—

'सारिकाशुकमार्जारश्वकुक्कुटकलापिनाम्।
पोषो दास्याश्च वित्तार्थमसतीपोषणं विदुः ॥' [योग. ३।११३]

दवदानं दवाग्नेस्तृणादिदहनार्थं वितरणम्। तच्च फलनिरपेक्षतात्पर्याद् वनेचरैर्वह्निज्वालनं व्यसनजमुच्यते। पुण्यबुद्धिजं तु यथा मदीये मरणकाले इयन्तो मम श्रेयोऽर्थं धर्मदीपोत्सवाः करणीया इति पुण्यबुद्धया क्रियमाणम्। तृणदाहे सति नवतृणाङ्कुरोद्भवाद् गावश्चरन्तीति वा। क्षेत्रे वा सस्यसम्पत्तिवृद्धयेऽग्निज्वालनम्। अत्र जीवकोटीनां वधो व्यक्त एव। सरःशोषो धान्यवपनाद्यर्थं जलाशयेभ्यो जलस्य सारण्याऽऽकर्षणम्। तत्र च जलस्य तद्गतानां त्रसानां तत्प्लावितानां च षण्णां जीवनिकायानां घात इति दूष्यत्वम्। उक्तं च—

'व्यसनात्पुण्यबुद्धया वा दवदानं भवेद्द्विधा।
सरः शोषः परः सिन्धुह्रदादेरम्बुसंप्लवः ॥' [योगशा. ३।११४]

ननु चाङ्गारकर्मादयः कथं खरकर्मव्रतेऽतिचाराः खरकर्मरूपा एव ह्येते। सत्यं, किन्त्वनाभोगादिना क्रियमाणा अतिचारा उपेत्य क्रियमाणास्तु भङ्गा एवेत्यस्ति विशेषः। केचित्—सितपटाः प्राहुः। अतिजडान् प्रति। जडान् प्रति पुनः 'पल' इत्यादिप्रबन्धेन प्राक् प्रणीतमेव ॥२३॥

अथ शिक्षा व्रतविधानार्थमाह—

निकाली जाती है तो सूक्ष्म त्रस जन्तुओंके घातके साथ अनन्तकाय पत्तोंके समूहका नाश अवश्य होता है, उसके बिना लाख प्राप्त नहीं हो सकती। यहाँ लाखसे अन्य भी सावद्य वस्तुएँ ली गयी हैं जैसे मनसिल, टंकण—एक विशेष प्रकारका खार। ये बाह्य जीवोंके घातक हैं। इसी तरह धतूरा और उसकी छाल मदकारक है अतः इनका व्यापार पापका घर है। १३. दन्तवाणिज्य—जहाँ हाथी आदि पैदा होते हैं वहाँके भीलोंको द्रव्य देकर हाथीके दाँत खरीदना। इसमें दोष यह है कि भील धनके लोभमें हाथीको मार डालते हैं। वैसे दन्त आदिके व्यापारमें कोई दोष नहीं कहा है। यहाँ हाथीके दाँतसे अन्य त्रसजीवोंके अवयव भी गृहीत होते हैं। जैसे चमरी गायके बाल, उल्लू आदिके नख, शंख आदि हड्डियाँ, हिरणोंकी खाल, हंसोंके रोम इन सबका व्यापार नहीं करना चाहिए। १४. केशवाणिज्य—मनुष्य, गाय, बैल, घोड़े आदिका व्यापार करना केशवाणिज्य है। इसमें दोष यह है कि उन्हें पराधीन रखकर उनका बन्धन आदि किया जाता है, भूख-प्यासकी पीड़ा दी जाती है। १५. रसवाणिज्य—नवनीत, चर्बी, मधु, मदिरा आदिका व्यापार करना। मक्खनमें सम्मूर्छन जन्तु होते हैं। मधु, चर्बी, मदिरा आदि जीवोंके घातसे पैदा होते हैं। मद्य पानसे नशा तो होता ही है उसमें रहनेवाले कृमियोंका भी घात होता है इसलिए उनका व्यापार सदोष होनेसे बुरा है। ये सब व्यापार श्रावकको नहीं करने चाहिए ॥२१-२३॥

इस प्रकार गुणव्रतोंका प्रकरण समाप्त होता है।

अब शिक्षाव्रतोंका कथन करते हैं—

शिक्षाव्रतानि देशावकाशिकादीनि संश्रयेत् ।
श्रुतिचक्षुस्तानि शिक्षाप्रधानानि व्रतानि हि ॥२४॥

१ देशावकाशिकादीनि । आदिशब्देन सामायिक-प्रोषधोपवासातिथिसंविभागा गृह्यन्ते । यत्स्वामी—

'देशावकाशिकं वा सामयिकं प्रोषधोपवासो वा ।
वैयावृत्यं शिक्षाव्रतानि चत्वारि शिष्टानि ॥' [र. श्रा. ९१] ॥२४॥

श्रुतज्ञानरूपी नेत्रवाले श्रावकको देशावकाशिक आदि शिक्षाव्रतोंको धारण करना चाहिए; क्योंकि ये व्रत शिक्षा प्रधान होते हैं ॥२४॥

विशेषार्थ—शिक्षाव्रत चार हैं—देशावकाशिक, सामायिक, प्रोषधोपवास और अतिथिसंविभाग। यह हम पहले लिख आये हैं कि यद्यपि सभी आचार्योंने गुणव्रत तीन और शिक्षाव्रत चार कहे हैं। किन्तु गुणव्रत और शिक्षाव्रतके नामोंमें अन्तर है। इन दोनों व्रतोंको शीलव्रत कहते हैं और शीलव्रतके सात नामोंमें कोई अन्तर नहीं है। पूज्यपाद स्वामीने शीलको व्रतकी रक्षाके लिए बतलाया है। भगवती आराधनामें भी कहा है कि जैसे धान्यकी रक्षाके लिए बाड़ होती है वैसे ही व्रतकी रक्षाके लिए शील है। अमृतचन्द्रजीने भी यही कहा है कि जैसे चारदीवारी नगरकी रक्षा करती है वैसे ही शील व्रतोंकी रक्षा करते हैं। अतः सातों शील अणुव्रतोंके रक्षक हैं इसमें कोई मतभेद नहीं है। किन्तु जब सात शीलोंको गुणव्रत और शिक्षाव्रतमें विभाजित करते हैं तो मतभेद स्पष्ट हो जाता है। गुणव्रत क्यों कहते हैं इसको तो रत्नकरण्डमें स्पष्ट कर दिया है कि गुणोंको बढ़ानेके कारण गुणव्रत कहते हैं। किन्तु शिक्षाव्रत क्यों कहते हैं यह पं. आशाधरजीसे पहले किसी ग्रन्थमें देखनेमें नहीं आया। आशाधरजी भी केवल इतना कहते हैं कि शिक्षा प्रधान होनेसे इन्हें शिक्षाव्रत कहते हैं। किन्तु इनसे किस तरहकी शिक्षा मिलती है यह स्पष्ट नहीं करते। और आशाधरजीने भी जो गुणव्रत और शिक्षाव्रतकी व्युत्पत्ति की है उसका आधार भी श्वेताम्बराचार्यका योगशास्त्र प्रतीत होता है। श्वेताम्बर साहित्यमें यही कथन पाया जाता है। गुणव्रत और शिक्षाव्रतमें अन्तर बतलाते हुए कहा है कि सामायिक, देशावकाशिक, प्रोषधोपवास और अतिथिसंविभाग, ये चारों स्वल्पकालिक होते हैं। सामायिक, देशावकाशिक तो प्रतिदिन किये जाते हैं और प्रोषधोपवास तथा अतिथिसंविभाग प्रतिनियत दिन ही किये जाते हैं प्रतिदिन नहीं किये जाते। अतः गुणव्रतोंसे इनका भेद है। गुणव्रत तो प्रायः जीवनपर्यन्त होते हैं। स्थिति यह है कि दिग्व्रत और अनर्थदण्डव्रतको सबने गुणव्रत माना है। तथा सामायिक प्रोषधोपवास और अतिथिसंविभागको एक वसुनन्दिके सिवाय सबने शिक्षाव्रत माना है। कुन्दकुन्द और उनका अनुसरण करनेवाले देशव्रत नहीं मानते वे सल्लेखनाको शिक्षाव्रतोंमें लेते हैं इस तरह जो देशव्रत मानते हैं उन सबमें केवल देशव्रत और भोगोपभोगपरिमाणव्रतको लेकर मतभेद है। एक पक्ष देशव्रतको शिक्षाव्रत और भोगोपभोगपरिमाणको गुणव्रत मानता है। दूसरा पक्ष भोगोपभोगपरिमाणको गुणव्रत और देशव्रतको शिक्षाव्रत

---

१. 'व्रतपरिरक्षणार्थं शीलम् ।'—सर्वार्थ. सि. ७।२४ ।

२. 'तिस्सेव रक्खणट्ठं सीलाणि वदीव सस्सस्स ।'—भ. आ. ७८८ गा. ।

३. 'परिधय इव नगराणि व्रतानि किल पालयन्ति शीलानि ।'—पुरुषार्थ. १३६ श्लो. ।

४. देखो, अभिधानराजेन्द्रमें 'सिक्खावय' शब्द ।

अथ देशावकाशिकं निरुक्त्या लक्षयति—

दिग्व्रतपरिमितदेशविभागेऽवस्थानमस्ति मितसमयम् ।
यत्र निराहुर्देशावकाशिकं तद्व्रतं तज्ज्ञाः ॥२५॥

देशावकाशिकं—देशे दिग्व्रतगृहीतपरिमाणस्य क्षेत्रस्य विभागेऽवकाशो अवस्थानं देशावकाशः । 'सोऽस्मिन्नस्तीति' अतोऽनेकस्वरादिनिकः । उक्तं च —

'दिग्व्रते परिमाणं यत्तस्य संक्षेपणं पुनः ।
दिने रात्रौ च देशावकाशिकव्रतमुच्यते ॥' [योग. ३।८४]

अपि च—

'देशावकाशिकं स्यात्कालपरिच्छेदनेन देशस्य ।
प्रत्यहमणुव्रतानां प्रतिसंहारो विशालस्य ॥' [र. श्रा. ९२] ॥२५॥

अथ देशावकाशव्रतयुक्तं कथयति—

स्थास्यामीदमिदं यावदियत्कालमिहास्पदे ।
इति संकल्प्य सन्तुष्टस्तिष्ठन् देशावकाशिकी ॥२६॥

इदमिदं यावत्—गृहगिरिग्रामादिद्रव्यमवधिं कृत्वा । उक्तं च —

'गृहहारिग्रामाणां क्षेत्रनदीदावयोजनानां च ।
देशावकाशिकस्य स्मरन्ति सीम्नां तपोवृद्धाः ॥
संवत्सरमृतुरयनं मासचतुर्मासपक्षमृक्षं च ।
देशावकाशिकस्य प्राहुः कालावधिं प्राज्ञाः ॥' [रत्न. श्रा. ९३-९४]

मानता है। इनमें-से देशव्रत कुछ समयके लिए ही होता है किन्तु भोगोपभोगपरिमाण जीवन-पर्यन्तके लिए भी होता है ॥२४॥

आगे देशावकाशिकका निरुक्तिपूर्वक लक्षण कहते हैं—

जिस व्रतमें दिग्व्रतमें परिमाण किये गये क्षेत्रके किसी भागमें परिमितकाल तक श्रावकका ठहरना होता है, उस व्रतको उस व्रतकी निरुक्तिके ज्ञाता आचार्य देशावकाशिक व्रत कहते हैं ॥२५॥

विशेषार्थ—देश अर्थात् दिग्व्रतमें परिमाण किये गये क्षेत्रके हिस्सेमें अवकाश अर्थात् ठहरना जिसमें हो वह व्रत देशावकाशिक है यह देशावकाशिकका निरुक्तिपूर्वक लक्षण है ॥२५॥

आगे देशावकाशिक व्रतको पालनेवालेका लक्षण कहते हैं—

'मैं इस स्थानपर अमुक घर, पर्वत या गाँव आदिकी मर्यादा करके इतने काल तक ठहरूँगा' ऐसा संकल्प करके मर्यादाके बाहरकी तृष्णाको रोककर सन्तोषपूर्वक ठहरनेवाला श्रावक देशावकाशिक व्रतका धारी होता है ॥२६॥

विशेषार्थ—कालका परिमाण करके नियत देशमें सन्तोषपूर्वक रहनेवाला श्रावक देशावकाशिकी कहा जाता है। रत्नकरण्ड श्रावकाचारमें कहा है—दिग्व्रतमें निश्चित किये गये विशाल देशका कालका परिमाण करके प्रतिदिन अणुव्रतोंको लेकर सीमित करना देशावकाशिक व्रत है। गृहोंसे शोभित ग्राम, क्षेत्र, नदी, जंगल या योजनोंका प्रमाण ये देशावकाशिककी सीमा होती है। वर्ष, ऋतु, अयन, मास, चतुर्मास, पक्ष और नक्षत्र ये देशावकाशिकके कालकी मर्यादा होती है। मर्यादाओंके बाहर स्थूल और सूक्ष्म पाँचों पापोंका त्याग हो

सन्तुष्टः—सीमभ्यो बहिर्निगृहीततृष्णः। दिग्व्रतवदस्यापि नियमितदेशाद् बहिर्लोभनिग्रहेण हिंसादीनां च सर्वशो निवर्तनेनात्र फलवत्त्वादमुत्राज्ञैश्वर्यसंपादकत्वाच्च सुतरां करणीयत्वम्। तदुक्तम्—

'दिक्षु सर्वास्वधश्चोर्ध्वं देशेषु निखिलेषु च।
एतस्यां दिशि देशेऽस्मिन्नियंतैव गतिर्मम ॥
दिग्देशे नियमादेवं ततो बाह्येषु वस्तुषु ।
हिंसा-लोभोपभोगादिनिवृत्तेश्चित्तयन्त्रणा ॥
रक्षन्निमं प्रयत्नेन गुणव्रतयमं गृही।
आज्ञैश्वर्यं लभत्येष यत्र यत्रोपजायते ॥' [सो. उपा. ४४१-४५१]

शिक्षाव्रतत्वञ्चास्य शिक्षाप्रधानत्वात्परिमितकालभावित्वाच्चोच्यते। न खल्वेतत् दिग्व्रतवद्यावज्जीविकमपीष्यते। यत्तु तत्त्वार्थादौ गुणव्रतत्वमस्य श्रूयते तद्दिग्व्रतसंक्षेपणलक्षणत्वमात्रस्यैव विवक्षितत्वाल्लक्ष्यत। तदुक्तम्—

'तत्रापि च परिमाणं ग्रामाणां भवनपाटकादीनाम्।
प्रविधाय नियतकालं करणीयं विरमणं देशात् ॥' [पुरुषार्थ. १३९]

दिग्व्रतसंक्षेपकरणं चाणुव्रतादिसंक्षेपकरणस्याप्युपलक्षणं द्रष्टव्यम्। एषामपि संक्षेपस्यावश्यकर्तव्यत्वात्। प्रतिव्रतं च संक्षेपकरणस्य भिन्नव्रतत्वे 'गुणाः स्युर्द्वादशेति संख्याविरोधः स्यात्। 'तिष्ठन्' 'लक्षणहेत्वोः क्रियायाः' इति शतृच्। कालपरिच्छित्या—नियतदेशे संतुष्टतयाऽवस्थानेन देशावकाशिकव्रतित्वपरिणामस्य लक्ष्यमाणत्वात्। देशावकाशिको भवतीत्यध्याहारः ॥२६॥

जानेसे देशावकाशिकके द्वारा महाव्रतोंकी सिद्धि होती है। टीकामें पं. आशाधरजीने लिखा है—इस व्रतको शिक्षाप्रधान होनेसे तथा परिमित कालके लिए होनेसे शिक्षाव्रत कहते हैं। यह व्रत दिग्व्रतकी तरह जीवनपर्यन्तके भी लिए नहीं होता है। तत्त्वार्थ सूत्र आदिमें जो इसे गुणव्रत कहा गया है वह दिग्व्रतको संक्षिप्त करनेवाला होने मात्रकी विवक्षाको लेकर कहा है। अमृतचन्द्रजीने कहा है—'दिग्व्रतमें भी ग्राम, भवन, मुहाल आदिका कुछ समयके लिए परिमाण करना देशविरतिव्रत है वह करना चाहिए। दिग्व्रतको संक्षिप्त करना अन्य गुणव्रतोंके भी संक्षेप करनेका उपलक्षण होना चाहिए। क्योंकि जैसे दिग्व्रतको परिमित करके देशव्रत बना इसी तरह अन्य गुणोंको भी परिमित करना आवश्यक है। और इसी तरह प्रत्येक व्रतके संक्षेपको भिन्न व्रत मानने से बारह व्रतोंकी संख्याका विरोध होता है।' श्वेताम्बराचार्य हेमचन्द्रने भी अपने योगशास्त्र (३।८४) की टीकामें बिलकुल यही बात कही है। असलमें तो दिग्व्रतसे लेकर प्रोषधोपवासपर्यन्त जितने भी व्रत है वे सब अणुव्रतोंके क्षेत्रको सीमित करके उन्हें महाव्रतका रूप देनेके लिए ही हैं। दिग्व्रतके द्वारा जीवन-भरके लिए क्षेत्रको सीमित करके मर्यादाके बाहर जैसे अणुव्रत महाव्रतकी संज्ञाको प्राप्त होते हैं उसी तरह कुछ समयके लिए दिग्व्रतकी सीमाको मर्यादित करके देशव्रतके द्वारा भी वही किया जाता है। सीमित मर्यादामें भी अनर्थदण्डका—बिना प्रयोजन हिंसादान आदिका निरोध करके अणुव्रतोंको ही पुष्ट किया जाता है। पाँच ही अणुव्रत हैं और पाँच ही अनर्थदण्ड हैं। एक-एकके त्यागके साथ एक-एककी संगति बैठायी जा सकती है। सामायिकमें भी अमुक समय तक पाँचों पापोंका सर्वथा त्याग रहता है। प्रोषधोपवासमें समयकी मर्यादा बढ़ जाती है। इस तरह ये सब व्रत अणुव्रतको संकुचित करके उसे महाव्रतका रूप देते हैं। अन्तके शिक्षा

१. धः प्रोर्ध्व—। २. न्नियत्येवं—सो. उपा.। ३. न्निदं—। ४. तमयं—सो. उपा.।

अथ देशावकाशिकव्रतातिचारपरिहारार्थमाह—

पुद्गलक्षेपणं शब्दश्रावणं स्वाङ्गदर्शनम् ।
प्रेषं सीमबहिर्देशे ततश्चानयनं त्यजेत् ॥२७॥

पुद्गलक्षेपणं—परिगृहीतदेशाद्बहिः स्वयमगमनात् कार्यार्थितया व्यापारकराणां चोदनाय लोष्ठादिप्रेरणम् । शब्दश्रावणं—शब्दस्याभ्युत्काशिकादेः श्रावणमाह्वनीयाना श्रोत्रेऽनुपातनम् शब्दानुपातनं नामातिचारमित्यर्थः ॥२॥ स्वाङ्गदर्शनं—शब्दोच्चारणं विना आह्वानीयानां दृष्टौ स्वरूपस्यानुपातनं रूपानुपाताख्यमतिचारम् । एतत्त्रयं मायावितयाऽतिचारत्वं याति ॥३॥ प्रेषं—मर्यादीकृतदेशे स्थित्वा ततो बहिः प्रेष्यं प्रत्येवं कुर्विति व्यापारणम् । देशावकाशिकव्रतं हि मा भूद्गमनागमनादिव्यापारजनितः प्राण्युपमर्द इत्यभिप्रायेण गृह्यते । स तु स्वयं कृतोऽन्येन कारित इति न कश्चित्फलविशेषः । प्रत्युत स्वयं गमने ईर्यापथविशुद्धेर्गुणः । परस्य पुनरनिपुणत्वादीर्यासमित्यभावे दोष इति प्रेष्यप्रयोगं नाम चतुर्थमतिचारं त्यजेदिति सर्वत्र योज्यम् ॥४॥ ततश्चानयनं—सीमबहिर्देशादिष्टवस्तुनः प्रेष्येण विवक्षितक्षेत्रे प्रापणम् । चशब्देन सीमबहिर्देशस्थितं प्रेष्यं प्रतीदं कुर्वित्याज्ञापनं वा । एतौ चाव्युत्पन्नबुद्धितया सहसाकारादिना वातिचारौ स्तः । सर्वत्र च 'सापेक्षस्य व्रते हि स्यादतिचारोंशभञ्जनमित्युपजीव्यम् ॥२७॥

व्रतोंसे यदि शिक्षा मिलती है तो मुनिपद धारणकी शिक्षा मिलती है। सामायिकसे ध्यान करनेकी, प्रोपधोपवाससे उपवास करनेकी और भोगोपभोग परिमाणसे अल्प भोगोपभोगकी तथा अन्तके अतिथिसंविभाग व्रतसे आहार ग्रहण करनेकी शिक्षा मिलती है। सोमदेवजीने इसका स्वरूप बतलाते हुए कहा है—'इस प्रकार दिशाओंका और देशका नियम करनेसे बाहरकी वस्तुओंमें लोभ, उपभोग, हिंसा आदिके भाव नहीं होते और उनके न होनेसे चित्त संयत रहता है। जो गृहस्थ इन गुण व्रतोंका पालन प्रयत्नपूर्वक करता है वह जहाँ-जहाँ जन्म लेता है वहीं उसे आज्ञा ऐश्वर्य आदि मिलते हैं' ॥२६॥

देशावकाशिक व्रतके अतिचारोंको त्यागनेकी प्रेरणा करते हैं—

देशावकाशिक व्रतकी निर्मलताको चाहनेवाला श्रावक मर्यादा किये हुए प्रदेशसे बाहर पत्थर आदि फेंकनेको, शब्दके सुनानेको, अपना शरीर दिखानेको, किसी मनुष्यके भेजनेको और मर्यादाके बाहरसे किसीको बुलानेको छोड़े ॥२७॥

विशेषार्थ—मर्यादा किये हुए देशसे बाहर स्वयं न जा सकनेसे कार्यके प्रयोजनवश काम करनेवाले मनुष्योंको कार्यके लिए सावधान करनेके अभिप्रायसे पत्थर आदि फेंकना प्रथम अतिचार है। मर्यादाके बाहरसे जिन्हें बुलाना है, खाँसने आदिके द्वारा उनके कानोंमें शब्द पहुँचाना दूसरा अतिचार है। शब्दका उच्चारण किये बिना जिनको बुलाना है उनकी दृष्टिमें अपनी सूरत आदि ला देना तीसरा अतिचार है। ये तीनों मायाचीपनेके कारण अतिचार हैं। स्वयं मर्यादा किये हुए क्षेत्रमें रहकर उससे बाहर किसीको 'तुम यह करो' ऐसा कहकर भेजना चतुर्थ अतिचार है। देशावकाशिक व्रत इस अभिप्रायसे लिया जाता है कि जाने-आने आदि व्यापारसे प्राणियोंका घात न हो। वह चाहे स्वयं करे या दूसरेसे करावे उसमें कोई अन्तर नहीं पड़ता। बल्कि स्वयं जानेमें तो ईर्यापथ शुद्धि सम्भव है। दूसरा तो यह जानता ही नहीं इसलिए ईर्या समितिके अभावमें दोष ही लगता है अतः प्रेष्य प्रयोग नामक चतुर्थ अतिचारको छोड़ना चाहिए। यह कथन सर्वत्र लगा लेना चाहिए। मर्यादाके बाहरसे किसीको भेजकर इष्ट वस्तुको विवक्षित क्षेत्रमें पहुँचाना पाँचवाँ अतिचार है। 'च' शब्दसे सीमाके बाहर स्थित आदमीको 'ऐसा करो' यह आज्ञा देना भी अतिचार

अथानिरूपितस्वरूपस्यानुष्ठानं न स्यादिति सामायिकस्वरूपं निरूपयन्नाह—

एकान्ते केशबन्धादिमोक्षं यावन्मुनेरिव ।
स्वं ध्यातुः सर्वहिंसादित्यागः सामायिकव्रतम् ॥२८॥

एकान्ते—विविक्तस्थाने । उक्तं च—

'एकान्ते सामयिकं निर्व्याक्षेपे वनेषु वास्तुषु च ।
चैत्यालयेषु वापि परिचेतव्यं प्रसन्नधिया ॥' [रत्न. श्रा. ९९]

केशबन्धआदिर्येषां मुष्टिबन्धवस्त्रग्रन्थ्यादीनां गृहीतनियमकालावच्छेदहेतूनां तन्मोचनं यावत् । सामायिकं हि चिकीर्षुर्यावदयं केशबन्धो वस्त्रग्रन्थ्यादिर्वा मया न मुच्यते तावत्साम्यान्न चलिष्यामीति प्रतिज्ञां करोति । उक्तं च—

'मूर्धरुहमुष्टिवासो बन्धं पर्यङ्कबन्धनं चापि ।
स्थानमुपवेशनं वा समयं जानन्ति सर्वज्ञाः ॥' [रत्न. श्रा. ९८]

मुनेरिव—सर्वारम्भपरिग्रहाग्रहरहितत्वार्थतिना तुल्यस्य श्रावकस्य । उक्तं च—

'सामयिके सारम्भाः परिग्रहा नैव सन्ति सर्वेऽपि ।
चेलोपसृष्टमुनिरिव गृही तदा याति यतिभावम् ॥' [र. श्रा. १०२]

स्वं ध्यातुः—आत्मानं साधुत्वेन ताच्छील्येन वा ध्यायतः, अन्तर्मुहूर्तमाधर्मध्याननिष्ठस्येत्यर्थः । सर्वहिंसादित्यागः—सर्वत्र सर्वेषां च हिंसादीना प्रमत्तयोगभाविनां प्राणव्यपरोपणादि-पञ्चपापाना त्याग. परिहारः सर्वत्रेति व्याख्यानाद्देशावकाशिकादस्य भेदः सूच्यते । उक्तं च—

'आसमयमुक्तिमुक्तं पञ्चाघानामशेषभावेन ।
सर्वत्र च सामयिकाः सामयिकं नाम शंसन्ति ॥' [र. श्रा. ९७]

है । अन्तके दोनों अतिचार अज्ञानसे या उतावलेपनसे होते हैं । सब जगह यह लक्षण लगा लेना चाहिए कि व्रतकी अपेक्षा रखते हुए एक अंशके भंगको अतिचार कहते हैं ॥२७॥

अब सामायिक शिक्षाव्रतका स्वरूप कहते हैं—

केशबन्ध आदिके छोड़ने पर्यन्त एकान्त स्थानमें मुनिके समान अपनी आत्माका ध्यान करनेवाले शिक्षा व्रती श्रावकका जो सर्वत्र समस्त हिंसा आदि पाँचों पापोंका त्याग है उसे सामायिक व्रत कहते है ॥२८॥

विशेषार्थ—सामायिक शब्द सम और आय शब्दोंके मेलसे बना है । 'सम' अर्थात् राग-द्वेषसे विमुक्त होकर जो 'आय' अर्थात् ज्ञानादिका लाभ होता है जो कि प्रशम सुख रूप है उसे समाय कहते हैं । समाय ही सामाय है । सामाय जिसका प्रयोजन है वह सामायिक है । अर्थात् राग-द्वेषके कारण उपस्थित होनेपर या जो पदार्थ राग-द्वेषके कारण हैं उनमें मध्यस्थता रखना, राग-द्वेष नहीं करना सामायिक है । अथवा जिन भगवान्‌की सेवाके उपदेशको समय कहते हैं । उसमें नियुक्त कर्मको सामायिक कहते हैं । इस तरह व्यवहारसे जिन भगवान्‌का अभिषेक, पूजा, स्तुति, जप आदि सामायिक है और निश्चयसे अपनी आत्माका ध्यान ही सामायिक है । इस प्रकार सामायिकरूप व्रतको सामायिक व्रत कहते हैं । यह सामायिक एकान्त स्थानमें की जाती है । इसका करनेवाला उस समय समस्त आरम्भ और परिग्रहके आग्रहसे रहित होता है इसलिए उसे मुनिके समान कहा है । मुनि जीवन-पर्यन्तके लिए समस्त हिंसा आदि पाँच पापोंका त्याग करता है । किन्तु सामायिक व्रती जितने समय तक आत्मध्यानमें लीन होता है उतने समय तक सर्वत्र पाँचों पापोंका त्याग

समस्तरागद्वेषविमुक्तस्य सता अयो ज्ञानादीनां लाभः प्रशमसुखरूपः समायः। समाय एव समायः प्रयोजनमस्येति वा सामायिकं रागद्वेषहेतुषु मध्यस्थतेत्यर्थः। उक्तं च—

'त्यक्तार्तरौद्रध्यानस्य त्यक्तसावद्यकर्मणः।
मुहूर्तं समता या तां विदुः सामायिकं व्रतम् ॥' [योगशा. ३।८२]

अथवा समय आप्तसेवोपदेशस्तत्र नियुक्तं कर्म सामयिकम्। व्यवहारेण जिनस्नपनार्चास्तुतिजपाः, निश्चयेन च स्वात्मध्यानमेव। तदुक्तम्।

'आप्तसेवोपदेशः स्यात्समयः समयार्थिनाम्।
नियुक्तं तत्र यत्कर्म तत्सामायिकमूचिरे ॥' [सो. उपा. ४६०]

तथा—

'होऊण सुई चेइवगिहम्मि सगिहेव चेइयाहिमुहो।
अण्णत्थ सुण्णपएसे पुव्वमुहो उत्तरमुहो वा ॥
जिणवयण-धम्म-चेदिय-परमेट्ठिजिणालयाण णिच्चं पि।
जं वंदणं तिकालं कीरई सामाइयं तं खु ॥
काउस्सग्गम्मि ठिदो लाहालाहं च सत्तुमित्तं च।
संजोगविप्पओगं तण-कंचण-चंदणं वासिं ॥

करता है। देशावकाशिक व्रती तो की हुई मर्यादासे बाहरके क्षेत्रमें ही पाँचों पापोंका त्याग करता है किन्तु सामायिक व्रती सर्वत्र पाँचों पापोंका त्याग करता है यह इन दोनों व्रतोंमें अन्तर है। जो सामायिक करना चाहता है वह सामायिकसे पहले यह नियम करता है कि जबतक मेरे बँधे केश न खुलें या वस्त्रकी गाँठ मैं न खोलूँ या बँधी मुट्ठी न खोलूँ तबतक मैं साम्यभावसे विचलित नहीं हूँगा अर्थात् उतने समय तक मैं सामायिक करूँगा। आचार्य समन्तभद्र स्वामीने केशोंका बन्ध, मुट्ठीका बन्ध, वस्त्रका बन्ध, पालथी बन्ध, स्थान और बैठनेको समय कहा है। अर्थात् सामायिकमें ये सब आवश्यक होते हैं। उन्होंने चित्तको चंचल करनेवाले कारणोंसे रहित एकान्त स्थान, जैसे वन, मकान या चैत्यालयमें प्रसन्न मनसे सामायिक करनेका निर्देश किया है। तथा उपवास और एकाशनमें भी सामायिक करनेका विधान किया। वैसे तो नियमित रूपसे प्रतिदिन आलस्य छोड़कर सामायिक करना ही चाहिए क्योंकि वह पाँचों अणुव्रतोंकी पूर्तिमें कारण है। यह भी कहा है कि सामायिकके कालमें न कोई आरम्भ होता है और न पहने हुए वस्त्रके सिवाय कोई परिग्रह होती है। इसलिए उस समय गृहस्थ उस मुनिके तुल्य होता है जिसपर किसीने वस्त्र लपेट दिया हो। आचार्य अमृतचन्द्रने भी राग-द्वेषको त्यागकर समस्त द्रव्योंमें साम्यभाव धारण करके बार-बार सामायिक करनेका विधान किया है क्योंकि सामायिक तत्त्वकी उपलब्धिका मूल है। अर्थात् आत्मतत्त्वकी उपलब्धिका मूल कारण सामायिक है। रातके अन्तमें अर्थात् प्रातः और दिनके अन्तमें अर्थात् सन्ध्याको तो सामायिक अवश्य करना चाहिए। अन्य समयमें भी करनेसे कोई हानि नहीं है, बल्कि लाभ ही है। यह भी कहा है कि यद्यपि सामायिक करनेवाले गृहस्थके चारित्रमोहका उदय होता है फिर भी उस समयमें समस्त सावद्य योगका त्याग होनेसे महाव्रत

१. 'रागद्वेषत्यागान्निखिलद्रव्येषु साम्यमवलम्ब्य।
तत्त्वोपलब्धिमूलं बहुशः सामायिकं कार्यम् ॥—पुरुषार्थ. १४८ श्लो.।

जो पस्सदि समभावं मणम्मि सरिदूण पंचणमकारं ।
वर अट्ठपाडिहेरेहिं संजुत्तजिणसरूवं वा ॥
सिद्धसरूवं झायदि अहवा झाणुत्तमं ससंवेयं ।
खणमेक्कमविचलग्गो उत्तम सामाइयं तस्स ॥' [वसु. श्रा. २७४-२७८] ॥२८॥

अथ सामायिकभावनासमयं नियमयन्नाह—

परं तदेव मुक्त्यङ्गमिति नित्यमतन्द्रितः ।
नक्तं दिनान्तेऽवश्यं तद्भावयेच्छक्तितोऽन्यदा ॥२९॥

अवश्यं—नियमेन । नास्ति वा वश्यं व्याध्यादि पारतंत्र्यं यत्र भावनाकर्मणि । अन्यदा—मध्याह्नादिकाले । उक्तं च—

'रजनीदिनयोरन्ते तदवश्यं भावनीयमविचलितम् ।
इतरत्र पुनः समये न कृतं दोषाय तद्गुणाय कृतम् ॥' [पुरुषा. १४९]

अपि च—

'सामयिकं प्रतिदिवसं यथावदप्यनलसेन चेतव्यम् ।
व्रतपञ्चक-परिपूरणकारणमवधानयुक्तेन ॥' [र. श्रा. १०१] ॥२९॥

होता है। इस तरह इन सब आचार्योंने आत्मध्यानको ही सामायिक कहा है। किन्तु सोमदेव सूरिने आप्तसेवाके उपदेशको समय और उसमें किये जानेवाले कार्यको सामायिक कहा है। उसे आशाधरजीने व्यवहार सामायिक कहा है। उपासकाध्ययनमें सामायिक व्रतके अन्तर्गत पूजाविधानका विस्तारसे वर्णन है। इससे पहले इतना स्पष्ट और विस्तृत वर्णन पूजाविधिके बारेमें नहीं मिलता। आचार्य वसुनन्दीने भी दोनों प्रकारोंको सामायिक कहा है। उन्होंने लिखा है—'शुद्ध होकर चैत्यालयमें अथवा अपने घरमें ही प्रतिमाके सम्मुख होकर अथवा अन्य पवित्र स्थानमें पूर्वमुख या उत्तर मुख होकर जिनवाणी, जिनधर्म, जिनबिम्ब, पंचपरमेष्ठी, और जिनालयोंकी जो नित्य त्रिकाल वन्दना की जाती है वह सामायिक है। जो श्रावक कायोत्सर्गमें स्थित होकर लाभ-अलाभको, शत्रु-मित्रको, संयोग-वियोगको, तृण-कांचनको, चन्दन और कुठारको समभावसे देखता है तथा मनमें पंच नमस्कार मन्त्रको धारण करके उत्तम अष्ट प्रातिहार्योंसे युक्त अर्हन्त जिनके स्वरूप और सिद्ध भगवान्के स्वरूपको ध्याता है, अथवा संवेगसहित निश्चल अंग होकर एक क्षण भी उत्तम ध्यान करता है उसके उत्तम सामायिक होती है।' श्वेताम्बराचार्य हेमचन्द्रने सावद्य कार्यों तथा आर्त और रौद्रध्यानको छोड़कर एक मुहूर्त तक समताभावको सामायिक कहा है ॥२८॥

आगे सामायिककी भावनाका समय बतलाते हैं—

सामायिक ही मोक्षका उत्कृष्ट साधन है इसलिए आलस्य त्यागकर नित्य रात्रि और दिनके अन्तमें अवश्य सामायिकका अभ्यास करना चाहिए। तथा अपनी शक्तिके अनुसार मध्याह्न आदि अन्य कालमें भी अभ्यास करे ॥२९॥

विशेषार्थ—परम प्रकर्षको प्राप्त चारित्र ही मोक्षका साक्षात् कारण होता है। सामायिक उसीका अंश है। सामायिकमें आत्मध्यानका अभ्यास किया जाता है यह अभ्यास ही स्थिर होते-होते शुक्लध्यानका रूप लेता है और अन्तिम शुक्लध्यानसे मोक्षकी प्राप्ति होती है। इसलिए श्रावकको प्रातः और सायं दो बार सामायिक अवश्य करना चाहिए। यदि शक्ति हो तो मध्याह्नमें या अन्य समय भी कर सकते हैं। नियमित समयसे अन्य समयमें भी

अथ सामायिकस्थेन परीषहोपसर्गोपनिपाते सति तज्जयार्थं किं ध्यातव्यमित्याह—

मोक्ष आत्मा सुखं नित्यः शुभः शरणमन्यथा।
भवोऽस्मिन्वसतो मेऽन्यत्किं स्यादित्यापदि स्मरेत् ॥३०॥

आत्मा मोक्षः अनन्तज्ञानादिरूपत्वात्। सुखं अनाकुलचिद्रूपत्वात्। नित्यः अनन्तकालभाविप्रध्वंसाभावरूपत्वात्। शुभः शुभकारणप्रभवत्वात् शुभकार्यत्वाच्च। शरणं समस्तविपदगम्यतया अपायपरिरक्षणोपायत्वात्। भवः स्वोपात्तकर्मोदयवशाच्चतुर्गतिपर्यटनम्। अन्यत्—सुखशुभादिः स्यात् अभूदस्ति भविष्यति च, किन्त्वापद एव स्युः। तदुक्तम्—

'विपद्भवपदावर्ते पदिके वातिबाह्यते।
यावत्तावद्भवन्त्यन्याः प्रचुरा विपदः पराः॥' [ ]

आपदि, एतेन प्रतिपन्नसामायिकेन परीषहोपसर्गाः सोढव्या इत्याक्षिप्यते। उक्तं च—

'शीतोष्णदंशमशकपरीषहमुपसर्गमपि च मौनधराः।
सामयिकं प्रतिपन्ना अधिकुर्वीरन्नचलयोगाः॥'

अपि च—

'अशरणमशुभमनित्यं दुःखमनात्मनामवसामि भवम्।
मोक्षस्तद्विपरीतात्मेति ध्यायन्तु सामयिके॥' [र. श्रा. १०३-१०४] ॥३०॥

करनेसे कोई दोष नहीं है बल्कि गुण ही है। आचार्य अमृतचन्द्रने दिन और रात्रिके अन्तमें तथा समन्तभद्राचार्यने प्रतिदिन सामायिक करनेपर जोर दिया है ॥२९॥

सामायिक करते समय यदि परीषह और उपसर्ग आ जाये तो उन्हें जीतनेके लिए क्या ध्यान करना चाहिए, यह बताते हैं—

मोक्ष आत्मरूप है, सुखरूप है, नित्य है, शुभ है, शरण है, और संसार इससे विपरीत है। इस संसारमें निवास करते हुए मेरेको अन्य क्या होगा, इस प्रकार परीषह और उपसर्गके समय विचार करे ॥३०॥

विशेषार्थ—परीषह और उपसर्ग आनेपर सामायिक करनेवालेको संसार और मोक्षके स्वरूपका चिन्तन करना चाहिए कि मोक्ष अनन्तज्ञानादि रूप होनेसे आत्मरूप है अर्थात् जो आत्मका स्वरूप है वही मोक्षका स्वरूप है क्योंकि शुद्ध आत्मस्वरूपकी प्राप्तिका नाम मोक्ष है। तथा मोक्ष आकुलता रहित चित्स्वरूप होनेसे सुखरूप है। तथा संसारदशाका प्रध्वंसाभावरूप होनेसे मोक्ष अनन्तकाल रहनेवाला है। मोक्ष होनेसे पुनः संसार दशा नहीं होती। तथा मोक्ष शुभकारण सम्यग्दर्शनादिसे उत्पन्न होता है और शुभकार्यरूप है अतः शुभ है। तथा मोक्ष समस्त विपत्तियोंसे दूर है और समस्त अनिष्टोंसे रक्षा करनेका उपाय है अर्थात् मोक्ष प्राप्त होनेपर किसी भी प्रकारका अनिष्ट सम्भव नहीं है अतः शरण है। किन्तु संसार मोक्षसे बिलकुल विपरीत है क्योंकि आत्माके द्वारा गृहीत कर्मोंके उदयके वशसे चार गतियोंमें भ्रमणका नाम संसार है अतः संसार न तो आत्मरूप है, न सुखरूप है, किन्तु दुःखरूप है और सदा परिवर्तनशील होनेसे अनित्य है और इसीलिए अशरण है। अतः संसारमें रहते हुए तो उपसर्ग और परीषह ही सम्भव है। ऐसा विचार करनेसे विपत्तिके समय मन सहिष्णु बन जाता है इससे यह बतलाया है कि सामायिक करनेवालेको परीषह, उपसर्ग आदि सहन करने चाहिए। आचार्य समन्तभद्रने भी कहा है कि सामायिक करनेवाले मौनपूर्वक शीत, उष्ण तथा डांस-मच्छरोंकी परीषह और उपसर्गको तिरस्कृत कर देते हैं। पं. आशाधरजीने तो

अथ सामायिकसिद्धयर्थं किं कुर्यादित्याह—

स्नपनार्चास्तुतिजपान् साम्यार्थं प्रतिमार्पिते ।
युञ्ज्याद्यथाम्नायमाद्यादृते संकल्पितेऽर्हति ॥३१॥

स्नपनं 'आश्रुत्य' इत्यादौ व्याख्यास्यते । अर्चास्तुतिजपाः प्राग्व्याख्याताः । यथाम्नायं—उपासकाध्ययनानतिक्रमेण । आद्यादृते स्नपनादिना । संकल्पिते—निराकारस्थापनार्पिते । एतेन कृतप्रतिमापरिग्रहाः संकल्पिताप्तपूजापरिग्रहाश्चेति द्वये देवसेवाधिकृता इति सूच्यते ॥३१॥

अथ सामायिकस्य सुदुष्करत्वशङ्कामपनुदति—

सामायिकं सुदुःसाधमप्यभ्यासेन साध्यते ।
निम्नीकरोति वार्बिन्दुः किं नाश्मानं मुहुः पतन् ॥३२॥

सामायिकमें परीषह और उपसर्गके समय ही संसार और मोक्षका स्वरूप चिन्तन करना लिखा है। किन्तु समन्तभद्र स्वामीने तो सामायिक मात्रमें उसका चिन्तन करनेके लिए लिखा है ॥३०॥

सामायिककी सिद्धिके लिए अन्य समयमें श्रावकको क्या-क्या करना चाहिए, यह बतलाते हैं—

मुमुक्षु प्रतिमामें अर्पित अर्थात् साकार स्थापनामें स्थापित भगवान् अर्हन्तदेवमें निश्चय सामायिककी सिद्धिके लिए उपासकाध्ययन आदि आगमके अनुसार अभिषेक, पूजा, स्तुति और जप करे। और संकल्पित अर्थात् निराकार स्थापनामें स्थापित अर्हन्तदेवमें अभिषेकके सिवाय शेष पूजा, स्तुति और जप करे ॥३१॥

विशेषार्थ—निश्चय सामायिककी सिद्धिके लिए यह व्यवहार सामायिक करनेका उपदेश है। व्यवहार सामायिक है अर्हन्तदेवका अभिषेक, पूजा, स्तुति और जप। जिनपूजाके दो प्रकार हैं—एक तदाकार जिनबिम्बमें जिन भगवान्की स्थापना करके पूजन करना और दूसरा है पुष्प आदिमें जिन भगवान्की स्थापना करना। पं. आशाधरजीने सोमदेवके उपासकाध्ययनके[1] अनुसार पूजाविधि लिखी है। ये दोनों प्रकार भी उसीमें बतलाये गये हैं। जो प्रतिमाके बिना पूजन करते हैं उन्हें अर्हन्त सिद्धको मध्यमें, आचार्यको दक्षिणमें, उपाध्यायको पश्चिममें, साधुको उत्तरमें और पूर्वमें सम्यग्दर्शन, सम्यग्ज्ञान, सम्यक्चारित्रको भोजपत्रपर, लकड़ीके पटियेपर, वस्त्रपर, शिलातलपर, रेतनिर्मित भूमिपर, पृथ्वीपर, आकाशमें और हृदयमें स्थापित करके अष्टद्रव्यसे पूजन करना चाहिए। पूजनके बाद क्रमसे सम्यग्दर्शन भक्ति, सम्यग्ज्ञान भक्ति, सम्यक्चारित्र भक्ति, अर्हन्त भक्ति, सिद्धभक्ति, चैत्य भक्ति, पंचगुरु भक्ति, शान्ति भक्ति और आचार्यभक्ति करना चाहिए। जो प्रतिमामें स्थापना करके पूजन करते हैं, उनके लिए अभिषेक, पूजन, स्तवन, जप, ध्यान और श्रुत देवताका आराधन ये छह विधियाँ बतलायी हैं। इनका वर्णन उपासकाध्ययनके अनुसार आगे कहेंगे ॥३१॥

अब 'सामायिक बहुत कठिन है' इस शंकाका निवारण करते हैं—

यद्यपि सामायिक बहुत कठिनतासे सिद्ध होनेवाली है फिर भी अभ्यासके द्वारा साधी जाती है। क्या बारम्बार गिरनेवाली जलकी बूँद पत्थरको गड्ढेवाला नहीं कर देती

---

१. सो. उपा. में पृ. २१३ से पूजाविधिका वर्णन है।

स्पष्टम् । बाह्या अप्याहुः—'अभ्यासो हि कर्मणां कौशलमावहति । नहि सकृन्निपातमात्रेणोदबिन्दुरपि ग्राण्णि निम्नतामादधाति ॥३२॥

अथ तदतिचारपरिहारार्थमाह— [1]

पंचात्रापि मलानुज्झेदनुपस्थापनं स्मृतेः ।
कायवाङ्मनसां दुष्प्रणिधानान्यनादरम् ॥३३॥

अनुपस्थापनं स्मृतेः—सामायिकेऽनैकाग्र्यमित्यर्थः । अथवा सामायिकं मया कर्तव्यं न कर्तव्यमिति वा, सामायिकं मया कृतं न कृतमिति वेति प्रबलप्रमादादस्मरणमतिचारः स्मृतिमूलत्वान्मोक्षमार्गानुष्ठानस्य । कायेत्यादि । दुष्प्रणिधानं सावद्ये प्रवर्तनम् । तच्च हस्तपादादीनामनिभृतत्वावस्थापनं कायदुष्प्रणिधानम् । वर्णसंस्काराभावोऽर्थानवगमश्चापलं च वाग्दुष्प्रणिधानम् । क्रोध-लोभ-द्रोहाभिमानेर्ष्यादयः कार्यव्यासङ्ग-संभ्रमश्च मनोदुष्प्रणिधानम् । एते त्रयोऽतिचाराः । मनोदुष्प्रणिधानस्य स्मृत्यनुपस्थापनस्य चायं भेदः—क्रोधाद्यावेशात्सामयिके मनसश्चिरमवस्थापनं प्रथमम्, चिन्तायाः परिस्पन्दनादैकाग्र्येणानवस्थापनमन्यत् । अनादरमनुत्साहं प्रतिनियतवेलायां सामायिकस्याकरणं यथाकथंचिद्वा करणं करणानन्तरमेव भोजनादिव्यासङ्गं च । न चात्राविधिकृताद्वरमकृतमित्यसूयावचनं प्रमाणीकृत्य भङ्गसंभावनया सामायिकस्याप्रतिपत्तिः कर्तव्या ।

है। अर्थात् जैसे पत्थरपर जलकी बूँद निरन्तर टपकती रहे तो पत्थरमें गढ़ा पड़ जाता है वैसे ही अभ्याससे अत्यन्त कठिन भी सामायिक सरल हो जाती है ॥३२॥

सामायिकके अतिचारोंके त्यागका उपदेश देते हैं—

सामायिक व्रतका फल चाहनेवालेको अन्य व्रतोंकी तरह सामायिक व्रतमें भी स्मृतिको स्थिर न रखना, मन-वचन-कायका दुष्प्रणिधान और अनादर ये पाँच अतिचारोंको छोड़ना चाहिए ॥३३॥

विशेषार्थ—सामायिक व्रतके पाँच अतिचार हैं—स्मृतिका अनुपस्थापन, कायदुष्प्रणिधान, वचनदुष्प्रणिधान, मनदुष्प्रणिधान और अनादर। इनका स्पष्टीकरण इस प्रकार है—सामायिकमें एकाग्रताका न होना, अथवा, सामायिक मुझे करना चाहिए या नहीं करना चाहिए, या मैंने सामायिक की या नहीं की, इस प्रकार प्रबल प्रमादके कारण स्मरण न रहना प्रथम अतिचार है, क्योंकि मोक्षमार्गके अनुष्ठानका मूल स्मरण है। सावद्य कार्योंमें प्रवृत्तिको दुष्प्रणिधान कहते हैं। हाथ-पैर आदिको निश्चल न रखना कायदुष्प्रणिधान है। सामायिकमें पाठ या मन्त्रका ऐसा उच्चारण करना कि कुछ भी अर्थबोध न हो सके या वचनमें चपलता होना वचनदुष्प्रणिधान है। सामायिक करते समय क्रोध, लोभ, द्रोह, अभिमान और ईर्ष्या आदिका होना तथा कार्योंमें आसक्ति होनेसे मनका चंचल होना मनदुष्प्रणिधान है। मनदुष्प्रणिधान और स्मृतिअनुपस्थापनमें यह अन्तर है कि क्रोध आदिके आवेशसे सामायिकमें मनका चिरकाल तक स्थिर न रहना मनदुष्प्रणिधान है और चिन्ताकी चंचलतासे एकाग्ररूपसे न रहना स्मृति अनुपस्थापन है। अनुत्साहको अनादर कहते हैं। नियत समय पर सामायिक न करना या जिस किसी तरह करना और करनेके बाद ही तुरन्त खाने-पीने आदिमें लग जाना अनादर है। ये सब जानकर यदि कोई 'बिना विधिके सामायिक करनेसे तो न करना अच्छा है' ऐसे वचनको प्रमाण मानकर अतिचार लगनेकी सम्भावनासे सामायिक करनेमें उत्साहित न हो तो यह उचित नहीं है। प्रारम्भमें तो मुनियोंके भी एक देश विराधना होना सम्भव है किन्तु इतने मात्रसे सामायिक व्रत भंग नहीं होता। 'मैं मनसे

---

१. 'योगदुष्प्रणिधानानादरस्मृत्यनुपस्थानानि ।'—त. सू. ७।३३।

यतीनामप्यारम्भे अभावितपूर्वत्वादेकदेशविराधनस्य संभवात् । न चैतावता तस्य भङ्गो, मनसा सावद्यं न करोमीत्यादिप्रत्याख्यानेऽन्यतरभङ्गेऽपि शेषसद्भावान्न सामायिकस्यात्यन्ताभाव इत्यमीषामतिचारतैव । सुभावितसामायिकस्तु यदा श्रावको भविष्यति तदा तृतीयपदमेवाभ्युपगमिष्यतीति युक्तो व्रतिकस्यातिचार-परिहाराय यत्नः ॥३३॥

अथ प्रोषधव्रतं लक्षयति—

> स प्रोषधोपवासो यच्चतुष्पर्व्यां यथागमम् ।
> साम्यसंस्कारदार्ढ्याय चतुर्भुक्त्युज्झनं सदा ॥३४॥

प्रोषधोपवासः—प्रोषधे पर्वे उपवासश्चतुर्विधाहारपरिहारः । चतुष्पर्व्यां—चतुर्णां पर्वणां समाहारश्चतुष्पर्वी । पर्वी (-र्व) शब्दोऽकारान्तोऽप्यस्ति । तद्यथा—'अपर्वे मुण्डितं शिरः' इति । तस्यां मासे द्वयोरष्टम्योर्द्वयोश्च चतुर्दश्योरित्यर्थः । उक्तं च—

> 'पर्वाणि प्रोषधान्याहुर्मासे चत्वारि तानि च ।
> पूजाक्रियाव्रताधिक्याद्धर्मकर्माऽत्र बृंहयेत् ॥' [सो. उपा. ४५०]

साम्येति । तदुक्तम् —

> 'सामायिकसंस्कारं प्रतिदिनमारोपितं स्थिरीकर्तुम् ।
> पक्षार्धयोर्द्वयोरपि कर्तव्योऽवश्यमुपवासः ॥' [पुरुषार्थ. १५१]

पापकार्य नहीं करूँगा' इत्यादि प्रत्याख्यानोंमें किसी एकका भंग होनेपर भी शेष प्रत्याख्यान रहनेसे सामायिकका अत्यन्ताभाव नहीं होता। अतः ये पाँचों अतिचार ही हैं। जब श्रावक निरतिचार सामायिक करने लगेगा तब तो वह तीसरी प्रतिमा ही स्वीकार कर लेगा। अतः व्रत प्रतिमाधारीके लिए अतिचारोंको दूर करनेका प्रयत्न करना उचित है ॥३३॥

अब प्रोषधोपवास व्रतका लक्षण कहते हैं—

जो सामायिकके संस्कारको दृढ़ करनेके लिए चारों पर्वोंमें आगमके अनुसार सदा चारों प्रकारके आहारका तथा चार भोजनोंका त्याग करता है, वह प्रोषधोपवास है ॥३४॥

विशेषार्थ—प्रोषध अर्थात् पर्वमें उपवास करनेको प्रोषधोपवास कहते हैं। पूज्यपाद स्वामीके अनुसार प्रोषध शब्द पर्वका पर्यायवाची है अर्थात् प्रोषध और पर्व शब्दका अर्थ एक ही है। किन्तु आचार्य समन्तभद्रके अनुसार एक बार भोजन करनेको प्रोषध कहते हैं। और अशन, स्वाद्य, खाद्य और लेह्यके भेदसे चारों प्रकारके आहारका त्याग करना उपवास है। जो उपवास करके आरम्भ किया जाता है वह प्रोषधोपवास है। आशय यह है कि यह उपवास पर्वके दिन किया जाता है। अष्टमी और चतुर्दशीको पर्व कहते हैं। एक मासमें चार पर्व होते हैं। प्रोषधोपवास करनेवाला उपवाससे पहले दिन अर्थात् सप्तमी और त्रयोदशीको एक बार भोजन करता है। फिर अष्टमी और चतुर्दशीको उपवास करके नौमी और अमावस्या या पूर्णिमाके दिन भी एक बार भोजन करता है। उसीको प्रोषधोपवास कहते हैं। यदि उपवाससे पहले दिन और उपवाससे अगले दिन दोनों बार भोजन किया जाये और पर्वके दिन उपवास किया जाये तो उसे प्रोषधोपवास नहीं कहते, मात्र उपवास

---

१. प्रोषधशब्दः पर्वपर्यायवाची......प्रोषधे उपवासः प्रोषधोपवासः ॥ सर्वा. सि. ७।२१ ।

२. श्वेताम्बराचार्य हेमचन्द्रने अष्टमी, चतुर्दशी, पूर्णिमा और अमावस्याको चतुष्पर्वी कहा है, यथा—'चतुष्पर्वी अष्टमी-चतुर्दशी-पूर्णिमा-अमावस्यालक्षणा ।'—योग शा. ३।८५ ।

चतुर्भुक्त्युज्झनं—चतसृणां भुक्तीनां भोज्यानामशनादिद्रव्याणां भुक्तिक्रियाणां च त्यागः। एका हि भुक्तिक्रिया धारणकदिने, द्वे उपवासदिने, चतुर्थी च पारणकदिने प्रत्याख्यायते। एतेनेदमपि स्वाम्युक्तं तल्लक्षण-माक्षिपति—

'चतुराहारविसर्जनमुपवासः प्रोषधः सकृद्भुक्तिः।
स प्रोषधोपवासो यदुपोष्यारम्भमाचरति ॥' [र. श्रा. १०९]

अत्र आरम्भमिति पारणकदिने सकृद्भुक्तिरित्यर्थः ॥३४॥

एवमुत्तमं प्रोषधविधानमुक्त्वा मध्यमं जघन्यं च तदुपदेष्टुमाह—

उपवासाक्षमैः कार्योऽनुपवासस्तदक्षमैः।
आचाम्लनिर्विकृत्यादि शक्त्या हि श्रेयसे तपः ॥३५॥

कहते हैं। अतः आचार्य समन्तभद्रकी व्युत्पत्ति ही अधिक संगत प्रतीत होती है। पं. आशाधरजीने अपनी टीकामें चतुर्मुक्तिके दो अर्थ किये हैं—चार प्रकारकी मुक्ति और चार मुक्तिक्रिया। अर्थात् चारों प्रकारके भोज्य पदार्थोंका त्याग तथा चार बार भोजन करनेका त्याग प्रोषधोपवास है। अर्थात् उपवासके पहले दिन और दूसरे दिन एक-एक बार और उपवासके दिन दोनों बार इस तरह चार बारका भोजन जिस उपवासमें छोड़ा जाता है वह प्रोषधोपवास है। किन्तु केवल चारों प्रकारके आहारका त्याग या चार बार भोजनका त्याग तो एक तरहसे द्रव्य उपवास है, भाव उपवास या निश्चय उपवास नहीं है। जिसमें पाँचों इन्द्रियाँ अपने-अपने शब्द आदि विषयोंको ग्रहण करनेमें उदासीन रहती हैं उसे उपवास कहते हैं। पूज्यपाद स्वामीने 'उपवास' शब्दकी यही निरुक्ति की है और उसका अर्थ चारों प्रकारके आहारका त्याग किया है। आहारका त्याग इन्द्रियोंको शिथिल करनेके लिए ही किया जाता है। इसीसे पूज्यपाद स्वामीने लिखा है कि अपने शरीरके संस्कारके कारण स्नान, गन्ध, माला, आभरण आदिसे रहित तथा आरम्भरहित श्रावक किसी अच्छे स्थानमें जैसे साधुओंके निवासमें या चैत्यालयमें या अपने प्रोषधोपवास गृहमें धर्मकथाके चिन्तनमें मन लगाकर उपवास करे। आचार्य समन्तभद्रने भी उपवासमें पाँचों पाप, अलंकार, आरम्भ, गन्ध, पुष्प, स्नान और अंजनका त्याग कहा है। तथा दोनों कानोंसे बड़ी तृष्णाके साथ धर्मामृतका स्वयं श्रवण करने तथा दूसरोंके सुनाने और ज्ञान-ध्यानमें तत्पर रहनेको कहा है। पूज्यपाद स्वामीके ही अनुसार आचार्य अमितगतिने तथा चारित्रसारमें भी उपवासकी निरुक्ति की है ॥३४॥

इस प्रकार उत्तम प्रोषधका कथन करके अब मध्यम और जघन्य प्रोषधको बताते हैं—

जो उपवास करनेमें असमर्थ हैं उन्हें अनुपवास करना चाहिए। और जो अनुपवास भी करनेमें असमर्थ हैं उन्हें आचाम्ल तथा निर्विकृति आदि आहार करना चाहिए, क्योंकि शक्तिके अनुसार किया गया तप कल्याणके लिए होता है ॥३५॥

---

१. 'शब्दादिग्रहणं प्रति निवृत्तौत्सुक्यानि पञ्चापि इन्द्रियाण्युपेत्य तस्मिन्वसन्तीत्युपवासः।'
—सर्वा. सि. ७।२१।

२. रत्न. श्रा. १०७-१०८ श्लो.।

३. 'उपेत्याक्षाणि सर्वाणि निवृत्तानि स्वकार्यतः।
वसन्ति यत्र स प्राज्ञैरुपवासोऽभिधीयते ॥'—अमि. श्रा. १२।११९।
चारित्रसारमें भी इसी श्लोकको उद्धृत किया है।

अनुपवासः सजलोपवासः। आचाम्लं—असंस्कृतसौवीरमिश्रौदनभोजनम्। निर्विकृति—विक्रियेते जिह्वामनसि अनयेति। विकृतिः गोरसेक्षुरसफलरसधान्यरसभेदाच्चतुर्धा। तत्र गोरसः क्षीरघृतादिः। इक्षुरसः खण्डगुडादिः। फलरसो द्राक्षाम्रादिनिष्यन्दो। धान्यरसः तैलमण्डादिः। अथवा यद्येन सह भुज्यमानं स्वदते तत्तत्र विकृतिरित्युच्यते। विकृतेर्निष्क्रान्तं भोजनं निर्विकृतिः। आदिशब्देन एकस्थानैकभक्तरसत्यागादिः। उक्तं च—

'जह उक्कस्सं तह मज्झिमं पि पोसहविहाणमुद्दिट्ठं।
णवरि विसेसो सलिलं छंडित्ता वज्जए सेसं॥
मुणिदूण गुरुगकज्जं सावज्जविवज्जियं णिरारंभं।
जदि कुणदि तं पि कुज्जा सेसं पुव्वं व णायव्वं॥
आयंविलणिव्वियिदियएयट्ठाणं च एयभत्तं वा।
जं कीरदि तण्णेयं जहण्णयं पोसहविहाणं॥' [वसु. श्रा. २९०-२९२] ॥३५॥

विशेषार्थ—प्रोषधोपवासके ये उत्कृष्ट, मध्यम और जघन्य भेद उत्तरकालीन श्रावकाचारोंमें ही मिलते हैं। अमितगति और वसुनन्दीने अपने श्रावकाचारोंमें इन तीन भेदोंका कथन किया है। तदनुसार ही आशाधरजीने कहा है। आचार्य अमितगतिने तो चार भुक्तियोंके त्यागको उत्कृष्ट, तीन भुक्तियोंके त्यागको मध्यम और दो भुक्तियोंके त्यागको अधम कहा है। अर्थात् उत्कृष्ट प्रोषध तो वही है जिसे ऊपर कहा है और मध्यम प्रोषध वह है जिसे आशाधरजी अनुपवास कहते हैं। उत्कृष्ट प्रोषधसे इसमें इतना ही अन्तर है कि उपवासके दिन केवल जल ग्रहण किया जाता है। शेष चारों प्रकारके आहारका त्याग रहता है। और अधम उपवास वह कहा जाता है जिसमें उपवाससे पहले दिन और दूसरे दिन दोनों बार भोजन ग्रहण किया जाता है किन्तु उपवासके दिन कुछ भी ग्रहण नहीं किया जाता। वसुनन्दीके अनुसार भी उत्कृष्ट और मध्यम प्रोषध तो उक्त प्रकार ही हैं। किन्तु उपवासके दिन आचाम्ल, निर्विकृति, एकस्थान और एकभक्त करनेको जघन्य प्रोषध कहा है। आशाधरजीने भी जघन्य प्रोषधका स्वरूप वसुनन्दीके अनुसार ही कहा है। इमलीके रसके साथ भातके भोजनको आचाम्ल कहते हैं। जिससे जिह्वा और मन विकारयुक्त हों ऐसे भोजनको विकृति कहते हैं। गोरस, इक्षुरस, फलरस और धान्यरसके भेदसे विकृतिके चार भेद हैं। दूध, घी आदिको गोरस कहते हैं। खाँड, गुड़ आदिको इक्षुरस कहते हैं। दाख, आम आदिके रसको फलरस कहते हैं। तेल, माँड़ आदिको धान्य रस कहते हैं। अथवा जिसके साथ खानेसे स्वादिष्ट लगे वह विकृति है। विकारसे रहित भोजनको निर्विकृति कहते हैं। आदि शब्दसे एकस्थान, एकभक्त, रसत्याग आदिका ग्रहण होता है। एकस्थानका अर्थ दिगम्बर साहित्यमें देखनेमें नहीं आया। श्वेताम्बर साहित्यके अनुसार इस प्रकार है—जिस आसनसे भोजनको बैठे उससे दाहिने हाथ और मुँहके सिवाय किसी भी अंगको चलायमान न करे। यहाँ तक कि किसी अंगमें खुजलाहट होनेपर भी दूसरे हाथको उसे

---

१. 'वर्तमानो मतस्त्रेधा स वर्यो मध्यमोऽधमः। कर्तव्यः कर्मनाशाय निजशक्त्यनिगूहकैः॥
चतुर्णां तत्र भुक्तीनां त्यागे वर्यश्चतुर्विधः। उपवासः सपानीयस्त्रिविधो मध्यमो मतः॥
भुक्तिद्वयपरित्यागे त्रिविधो गदितोऽधमः। उपवासस्त्रिधाऽप्येषः शक्तित्रितयसूचकः'॥
—अमि. श्रा. १२।१२२-१२४।

अथ यथागममित्यस्यार्थं चतुःश्लोक्या व्याचष्टे—

पर्वपूर्वदिनस्यार्धे भुक्त्वाऽतिथ्याशितोत्तरम् ।
लात्वोपवासं यतिवद्विविक्तवसतिं श्रितः ॥३६॥
धर्मध्यानपरो नीत्वा दिनं कृत्वाऽऽपराह्णिकम् ।
नयेत्त्रियामां स्वाध्यायरतः प्रासुकसंस्तरे ॥३७॥

पर्वपूर्वदिनस्य—सप्तम्यास्त्रयोदश्याश्च अर्धे प्रहरद्वये वा किंचित् न्यूनेऽधिकेऽपि वा। समेऽप्यसमे चांशेऽर्धशब्दस्य रूढत्वात्। अतिथ्याशितोत्तरं—अतिथेराशिताद्भोजनविधापनादनन्तरमतिथिं भोजयित्वेत्यर्थः। यतिवत्—यतिना तुल्यं, यथा यतिर्भोजनानन्तरमेवोपवासं गृह्णाति विधिवत्सूरेश्च समीपं गत्वा पुनरुच्चारयति सावद्यव्यापारं शरीरसंस्कारमब्रह्म च सदा त्यजत्येवं प्रोषधे श्रावकोऽपि प्रवर्ततामित्यर्थः। उक्तं च—

'पञ्चानां पापानामलंक्रियारम्भगन्धपुष्पाणाम् ।
स्नानाञ्जननस्यानामुपवासे परिहृतिं कुर्यात् ॥' [र. श्रा. १०७] ॥३६॥

धर्मध्यानपरः। ध्यानोपरमे स्वाध्यायादिरपि कार्यं इति परशब्देन प्रधानार्थेन सूच्यते। यदाह—

'धर्मामृतं सतृष्णः श्रवणाभ्यां पिबतु पाययेद्वान्यान् ।
ज्ञानध्यानपरो वा भवतूपवसन्नतन्द्रालुः ॥' [र. श्रा. १०८]

आपराह्णिकं—सान्ध्यं क्रियाकल्पम्। एतेन निद्रालस्ये त्यजेदिति लक्षयति ॥३७॥

ततः प्राभातिकं कुर्यात्तद्वद्यामान् दशोत्तरान् ।
नीत्वातिथिं भोजयित्वा भुञ्जीतालौल्यतः सकृत् ॥३८॥

तद्वत्—पूर्वोक्तषट्प्रहरवत्। अलौल्यतः—भोजने आसक्तिमकृत्वेत्यर्थः ॥३८॥

खुजानेके लिए नहीं उठाना चाहिए। और एकभक्त तो प्रसिद्ध है एक बार भोजन करना किन्तु वह भोजन एक ही स्थानपर करना चाहिए, बीचमें उठना नहीं चाहिए ॥३५॥

आगे चार श्लोकोंके द्वारा प्रोषधोपवासकी विधि आगमानुसार बताते हैं—

पर्वसे पूर्व दिन अर्थात् सप्तमी और त्रयोदशीके आधे भागमें अर्थात् कुछ कम या कुछ अधिक दो पहर दिन होनेपर अतिथियोंको भोजन करानेके पश्चात् स्वयं भोजन करके मुनिकी तरह उपवासकी प्रतिज्ञा लेकर प्रासुक अथवा एकान्त स्थानमें रहे। और धर्मध्यानमें तत्पर रहते हुए दिन बितावे। तथा सन्ध्याकालीन क्रियाकर्म करके रात्रिको प्रासुक भूमिमें प्रासुक तृणोंसे तैयार किये गये शयन स्थानपर स्वाध्यायमें लगकर बितावे ॥३६-३७॥

पूर्वोक्त विधिसे छह प्रहर बितानेके बाद प्रातःकालीन आवश्यक आदि कर्म करे। और इसी तरह उपवास सम्बन्धी दिन-रातके आठ पहर तथा दूसरे दिनके दो पहर इन दस पहरोंको बिताकर अतिथिको भोजन करानेके पश्चात् बिना आसक्तिके एक बार भोजन करे ॥३८॥

विशेषार्थ—उपवासका समय अर्थात् सोलह प्रहर किस तरहसे बिताना चाहिए इसका पूरा विवरण पुरुषार्थसिद्ध्युपायमें दिया है, उसीको अमितगति और वसुनन्दिने थोड़ा विकसित किया है। इन्हीं सबका निचोड़ सागारधर्मामृतमें आशाधरजीने दिया है। पुरुषार्थसिद्ध्युपायमें कहा है—प्रतिदिन स्वीकृत किये गये सामायिक संस्कारको स्थिर करनेके लिए दोनों पक्षोंके आधे भागमें अर्थात् अष्टमी, चतुर्दशीको उपवास अवश्य करे। इसकी विधि इस प्रकार है—समस्त आरम्भसे मुक्त होकर तथा शरीर आदिमें ममत्व त्यागकर प्रोषधो-

पूजयोपवसन् पूज्यान् भावमय्यैव पूजयेत् ।
प्रासुकद्रव्यमय्या वा रागाङ्गं दूरमुत्सृजेत् ॥३९॥

भावमय्या—गुणानुस्मरणलक्षणया, भावपूजार्थत्वाद् द्रव्यपूजायाः । भावपूजा च सामायिकप्रसक्तत्वेनोपवसतः सिद्धैव । प्रासुकद्रव्यमय्या अक्षतमौक्तिकमालादिप्रकृतया । उक्तं च—

'प्रातः प्रोत्थाय ततः कृत्वा तात्कालिकं क्रियाकल्पम् ।
निर्वर्तयेद् यथोक्तां जिनपूजां प्रासुकैर्द्रव्यैः ॥' [पुरुषा. १५५]

रागाङ्गं गीतनृत्यादि ॥३९॥

पवासके दिनसे पहलेके दिनके अर्ध भागमें उपवास ग्रहण करे। और निर्जन वसतिकामें जाकर सम्पूर्ण सावद्य योगको त्यागकर तथा सब इन्द्रियोंके विषयोंसे विरत होकर काय-गुप्ति, मनोगुप्ति, वचनगुप्तिपूर्वक रहे। धर्मध्यानपूर्वक दिन बिताकर सन्ध्याकालीन कृति-कर्म करके पवित्र संस्तरेपर स्वाध्यायपूर्वक रात्रि बितावे। प्रातः उठकर प्रातःकालीन क्रिया-कर्म करके प्रासुक द्रव्योंसे जिन भगवान्‌की पूजा करे। इसी विधिसे उपवासका दिन और दूसरी रात बिताकर तीसरे दिनका आधा भाग बितावे। इस प्रकार जो सम्पूर्ण सावद्य कार्योंको त्यागकर सोलह प्रहर बिताता है उसको उस समय निश्चय ही सम्पूर्ण अहिंसाव्रत होता है। यह सम्पूर्ण कथन आचार्य अमृतचन्द्रका है। अमितगतिने भी तदनुसार कथन करते हुए कहा है—उपवास स्वीकार करनेके दिन दूसरे प्रहरमें भोजन करके आचार्यके पास जाकर भक्तिपूर्वक वन्दना करके कायोत्सर्ग करे। फिर पंचांग प्रणाम करके आचार्यके वचनानुसार उपवास स्वीकार करके पुनः विधिपूर्वक कायोत्सर्ग करे। फिर आचार्यकी स्तुति करके वन्दना करे और दो दिन स्वाध्यायपूर्वक बितावे। आचार्यकी साक्षिपूर्वक ग्रहण किया हुआ उपवास निश्चल होता है। उपवासमें मन-वचन-कायसे समस्त भोगों और उपभोगोंका त्याग करना चाहिए और पृथ्वीपर प्रासुक संस्तर बनाकर उसपर सोना चाहिए। असंयमवर्धक समस्त आरम्भ छोड़कर मुनिकी तरह विरक्तचित्त रहना चाहिए। तीसरे दिन समस्त आवश्यक आदि करके अतिथिको भोजन करानेके बाद भोजन करना चाहिए। इस विधिसे किया गया एक भी उपवास पापको वैसे ही दूर करता है जैसे सूर्य अन्धकारको दूर करता है। आचार्य वसुनन्दिने भी ऐसा ही कथन किया है (वसु. श्रा. २८८१-२८९ गा.) ॥३८॥

उपवास करनेवाला पूज्य, देव, शास्त्र, गुरुकी भावमयी पूजासे ही पूजा करे। उसमें असमर्थ हो तो प्रासुक द्रव्यमयी पूजा करे। और रागके कारण गीत-नृत्य आदिको दूरसे ही छोड़ दे ॥३९॥

विशेषार्थ—अनुरागपूर्वक पूज्य व्यक्तियोंके गुणोंके स्मरणको भावपूजा कहते हैं। द्रव्यपूजा भी भावपजाके लिए ही की जाती है। वैसे तो उपवास करनेवाला जब सामायिक करता है तो भावपूजा होती ही है। जो उसमें असमर्थ हो अर्थात् द्रव्यके अवलम्बनके बिना अपने भावोंको स्थिर रखनेमें असमर्थ हो वह प्रासुक द्रव्य अक्षत, अचित्त-फूल-फल आदिसे पूजन करे। सचित्त द्रव्यसे पूजन करनेवालेको भी उपवासके दिन अचित्त द्रव्यसे ही पूजन करना चाहिए। तथा रागके कारणोंसे बचना चाहिए। आचार्य समन्तभद्रने उपवासके दिन

---

१. पुरुषार्थ. १५२-१५७ श्लो.। २. अमित. श्रा. १२।१२५-१३२ श्लो.।

अथ प्रोषधोपवासातिचारपरिहारार्थमाह—

ग्रहणास्तरणोत्सर्गाननवेक्षाप्रमार्जनान् ।
अनादरमनैकाग्र्यमपि जह्यादिह व्रते ॥४०॥

ग्रहणं—अर्हदादिपूजोपकरणपुस्तकादेरात्मपरिधानाद्यर्थस्य चादानम् । उपलक्षणात्तन्निक्षेपोऽपि । आस्तरणं—संस्तरोपक्रमः । उत्सर्गः—विण्मूत्रादीनां त्यागः । अनवेक्षाप्रमार्जनान्—अवेक्षा जन्तवः सन्ति न सन्तीति वा चक्षुषावलोकनम् । प्रमार्जनं मृदुनोपकरणेन प्रतिलेखनम् । न स्तस्ते येषु तान् । इह चानवेक्षया दुरवेक्षणमप्रमार्जनेन च दुष्प्रमार्जनं संगृह्यते, नञः कुत्सार्थस्यापि दर्शनात् । यथा कुत्सितो ब्राह्मणः अब्राह्मणः । अनादरं क्षुत्पीडितत्वादावश्यकादिष्वनुत्साहम्, प्रोषधव्रते एव वा । तद्वदनैकाग्र्यमपि । यशस्तिलके त्वेवमुक्तम्—

'अनवेक्षाप्रतिलेखनदुष्कर्मारम्भदुर्मनस्काराः ।
स्वावश्यकविरतियुताश्चतुर्थमेते विनिघ्नन्ति ॥' [सो. उपा. ७५६] ॥४०॥

अथातिथिसंविभागव्रतं लक्षयति—

पाँच पाप, अलंकार, आरम्भ, गन्ध, पुष्प, स्नान, अंजन और नस्यका निषेध किया है। तथा धर्मामृतका पान करते हुए ज्ञान-ध्यानमें तत्पर रहनेपर जोर दिया है। अमृतचन्द्रजीने प्रातः उठकर प्रातःकालीन क्रियाकल्प करके प्रासुक द्रव्यसे जिनपूजन करनेका निर्देश किया है ॥३९॥

प्रोषधोपवासव्रतके अतीचार कहकर उन्हें दूर करनेकी प्रेरणा करते हैं—

इस प्रोषधोपवास व्रतमें बिना देखे और बिना कोमल उपकरणसे साफ किये या दूरसे ही देखकर और दुष्टतापूर्वक साफ करके उपकरणोंका ग्रहण, संस्तरे आदिका बिछाना, मल-मूत्रका त्याग तथा अनादर और अनैकाग्र्यको छोड़ना चाहिए ॥४०॥

विशेषार्थ—प्रोषधोपवासके पाँच अतीचार हैं—ग्रहण, आस्तरण, उत्सर्ग, अनादर और अनैकाग्र्य। पहले तीनके साथ अनवेक्षा और अप्रमार्जन लगता है। जन्तु हैं या नहीं यह आँखोंसे देखना अवेक्षा है। और कोमल उपकरणसे साफ करना, पोंछना, झाड़ना आदि प्रमार्जन है। ये दोनों नहीं होना अनवेक्षा और अप्रमार्जन है। यहाँ अनवेक्षासे दूरसे देखना और अप्रमार्जनसे दुष्टतापूर्वक प्रमार्जन करना भी लिया जाता है। बिना ठीकसे देखे और बिना कोमल उपकरणसे साफ किये अर्हन्त आदिकी पूजाके उपकरणों, पुस्तकों और अपने पहननेके वस्त्र आदिको ग्रहण करना तथा रखना, संस्तरा बिछाना, मल-मूत्र आदि त्यागना ये तीन अतीचार हैं। भूखसे पीड़ित होनेसे आवश्यकोंमें अथवा प्रोषधोपवासमें ही आदरका न होना और मनका स्थिर न रहना ये दो, इस तरह पाँच अतीचार छोड़ने चाहिए। अनैकाग्र्यके स्थानमें तत्त्वार्थसूत्र और पुरुषार्थसिद्ध्युपायमें स्मृत्यनुपस्थान तथा रत्नकरण्ड श्रावकाचारमें अस्मरण नामका अतीचार है। इन सबके अर्थमें कोई भेद नहीं है। सोमदेव सूरिने कहा है—'बिना देखे, बिना साफ किये किसी भी सावद्यकार्यको करना, बुरे विचार लाना, सामायिक आदि आवश्यक कर्मोंको न करना ये काम प्रोषधोपवासव्रतके घातक हैं' ॥४०॥

अब अतिथिसंविभाग व्रतका लक्षण कहते हैं—

---

१. अप्रत्यवेक्षिताप्रमार्जितोत्सर्गादानसंस्तरोपक्रमणानादरस्मृत्यनुपस्थानानि ।—त. सू. ७।३४।

व्रतमतिथिसंविभागः पात्रविशेषाय विधिविशेषेण ।
द्रव्यविशेषवितरणं दातृविशेषस्य फलविशेषाय ॥४१॥

व्रतं नियमेन सेव्यतया प्रतिपन्नत्वात् । तथा च सत्यतिथ्यलाभेऽपि तद्दानफलभाक्त्वोपपत्तेः । अतिथिसंविभागः—अतिथेः सगतो निर्दोषो विभागः स्वार्थकृतभक्ताद्यंशदानरूपः ॥४१॥

अथातिथिशब्दव्युत्पादनमुखेनातिथिलक्षणमाह—

ज्ञानादिसिद्धयर्थतनुस्थित्यर्थान्नाय यः स्वयम् ।
यत्नेनातति गेहं वा न तिथिर्यस्य सोऽतिथिः ॥४२॥

ज्ञानादीत्यादि । उक्तं च—

'कायस्थित्यर्थमाहारः कायो ज्ञानार्थमिष्यते ।
ज्ञानं कर्मविनाशाय तन्नाशे परमं सुखम् ॥' [ ]

विशेष फलके लिए, विशेष विधिसे, विशेष दाताका, विशेष पात्रके लिए, विशेष द्रव्य देना अतिथिसंविभाग व्रत है ॥४१॥

विशेषार्थ—तत्त्वार्थ सूत्रमें (७।३९) कहा है कि विधि, द्रव्य, दाता और पात्रकी विशेषतासे दानके फलमें विशेषता होती है। उसीके अनुसार यहाँ प्रत्येकके साथ विशेष शब्दका प्रयोग किया है। इनका विशेष स्वरूप आगे कहेंगे। अतिथिको सम्यक् अर्थात् निर्दोष, विभाग अर्थात् अपने लिए किये गये भोजन आदिका भाग देना अतिथिसंविभाग व्रत है। इस व्रतका पालन श्रावकको नियमसे करना चाहिए। ऐसा करनेसे अतिथिके न मिलनेपर भी अतिथिदानका फल प्राप्त होता है। रत्नकरण्ड श्रावकाचारमें इसका नाम वैयावृत्य है। जिनका कोई घर नहीं हैं, जो गुणोंसे सम्पन्न है ऐसे तपस्वियोंको बिना किसी प्रत्युपकारकी भावनाके जो अपने सामर्थ्यके अनुसार दान देना है उसे वैयावृत्य कहते हैं। उनके गुणोंमें अनुरागसे उनके कष्टोंको दूर करना, उनके पैर दबाना, अन्य भी जो संयमियोंका उपकार किया जा सकता है वह सब वैयावृत्य है। सात गुणोंसे सहित शुद्ध श्रावकके द्वारा पाँच पापक्रियाओंसे रहित मुनियोंका जो नवधा भक्तिसे समादर किया जाता है उसे दान कहते हैं। घरबार छोड़ देनेवाले अतिथियोंका समादर घरके कार्योंसे संचित पापकर्मको उसी तरह धो देता है जैसे पानी रक्तको धो देता है। इस प्रकार आचार्य समन्तभद्र स्वामीने इस व्रतकी प्रशंसा की है। सोमदेव सूरिने उपासकाध्ययनके तेतालीसवें कल्पमें, और आचार्य अमितगतिने अपने श्रावकाचारके नवम परिच्छेदमें दानका बहुत विस्तारसे वर्णन किया है ॥४१॥

अतिथि शब्दकी व्युत्पत्तिके द्वारा उसका लक्षण कहते हैं—

अन्नका प्रयोजन शरीरकी आयुपर्यन्त स्थिति है और शरीरकी स्थितिका प्रयोजन ज्ञानादिकी सिद्धि है। उस अन्नके लिए जो स्वयं बिना बुलाये संयमकी रक्षा करते हुए सावधानतापूर्वक दाताके घर जाता है वह अतिथि है। अथवा जिसकी कोई तिथि नहीं है वह अतिथि है ॥४२॥

---

१. 'दानं वैयावृत्यं धर्माय तपोधनाय गुणनिधये । अनपेक्षितोपचारोपक्रियमगृहाय विभवेन ॥
व्यापत्तिव्यपनोदः पदयोः संवाहनं च गुणरागात् । वैयावृत्यं यावानुपग्रहोऽन्योऽपि संयमिनाम् ॥'
—र. श्रा. १११-११२ आदि ।

यत्नेन—संयमाविरोधेन। अतति—सर्वदा गच्छति। उक्तं च—

'अतति स्वयमेव गृहं संयममविराधयन्ननाहूतः।
योऽसावतिथिः प्रोक्तः शब्दार्थविचक्षणैः साधुः॥' [अमि. श्रा. ६।९५]

नेत्यादि। उक्तं च—

'तिथिपर्वोत्सवाः सर्वे त्यक्ता येन महात्मना।
अतिथिं तं विजानीयाच्छेषमभ्यागतं विदुः॥' [ ] ॥४२॥

अथ पात्रस्वरूपसंख्यानिर्णयार्थमाह—

यत्तारयति जन्माब्धेः स्वाश्रितान्यानपात्रवत्।
मुक्त्यर्थगुणसंयोगभेदात्पात्रं त्रिधाऽस्ति तत्॥४३॥

स्वाश्रितान्—दानस्य कर्त्रनुमन्तॄन् सांयात्रिकादींश्च। त्रिधा। उक्तं च—

'पात्रं त्रिभेदमुक्तं संयोगो मोक्षकारणगुणानाम्।
सम्यग्दृष्टिरविरतो विरताविरतस्तथा विरतः॥' [पुरुषार्थ. १७१] ॥४३॥

विशेषार्थ—साधु खानेके लिए नहीं जीता किन्तु जीवित रहनेके लिए भोजन ग्रहण करता है। और जीवित रहनेका उद्देश्य है सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक् चारित्रको सम्पूर्ण करना। उनकी पूर्ति ही सिद्धि है। यतः शरीरके बिना वह सम्भव नहीं है और शरीर की स्थिति भोजनके बिना सम्भव नहीं है। कहा है—'शरीरकी स्थितिके लिए भोजन है। शरीर ज्ञानके लिए है। ज्ञान कर्मविनाशके लिए है। कर्मके विनाश होनेपर परमसुख होता है।' अतः उसे स्वयं सावधानीपूर्वक चलते हुए दाताके घर जाना पड़ता है ऐसे साधुको अतिथि कहते हैं। तथा तिथिसे मतलब होता है कोई निश्चित दिन निश्चित समय। वह जिसकी नहीं है वह अतिथि है अर्थात् जिसके आनेका काल नियत नहीं है। पूज्यपाद[3] स्वामी ने अतिथि शब्दके यही दो अर्थ किये हैं। [4]सोमदेव सूरिने एक नया ही अर्थ किया है। पाँचों इन्द्रियोंकी अपने-अपने विषयमें प्रवृत्ति ही पाँच तिथियाँ हैं। और इन्द्रियोंकी अपने विषयमें प्रवृत्ति संसारका कारण है अतः उनसे जो मुक्त है वह अतिथि है ॥४२॥

पात्रका स्वरूप और भेद कहते हैं—

जो जहाजकी तरह अपने आश्रितोंको अर्थात् दानके कर्ता, करानेवाले और दानकी अनुमोदना करनेवालेको संसार-समुद्रसे पार कर देता है वह पात्र है। मुक्तिके कारण या मुक्ति ही जिनका प्रयोजन है उन सम्यग्दर्शन आदि गुणोंके संयोगके भेदसे पात्रके तीन भेद हैं ॥४३॥

विशेषार्थ—जैसे समुद्रमें स्थित जहाज अपने आश्रित नाविकोंको समुद्रसे पार कर देता है वैसे ही जो अपने आश्रितोंको संसारसे पार करता है वह पात्र है। जो सम्यग्दर्शनादि गुण मुक्तिके कारण हैं उनके सम्बन्धके भेदसे पात्रके तीन भेद हैं ॥४३॥

---

१. था मतम्, मु.।

२. अविरतसम्यग्दृष्टिविरताविरतश्च सकलविरतश्च—मु.।

३. 'संयममविनाशयन्नततीत्यतिथिः। अथवा नाऽस्य तिथिरस्तीत्यतिथिः अनियतकालागमन इत्यर्थः।'
—स. सि. ७।२१।

४. 'पञ्चेन्द्रियप्रवृत्त्याख्यास्तिथयः पञ्च कीर्तिताः।
संसाराश्रयहेतुत्वात्ताभिर्मुक्तोऽतिथिर्भवेत्॥'—सो. उपा. ८७८ श्लो.।

एतदेव विशेषयन्नाह—

यतिः स्यादुत्तमं पात्रं मध्यमं श्रावकोऽधमम् ।
सुदृष्टिस्तद्विशिष्टत्वं विशिष्टगुणयोगतः ॥४४॥

स्पष्टम् ॥४४॥

दानविधेः प्रकारान् वैशिष्ट्यं चाह—

प्रतिग्रहोच्चस्थानांघ्रिक्षालनार्चानतीर्विदुः ।
योगान्नशुद्धीश्च विधीन् नवादरविशेषितान् ॥४५॥

प्रतिग्रहेत्यादि । प्रतिग्रहादीनामुत्तमपात्रविषयाणां विस्तरशास्त्रं...

'पत्तं णियपुरदारे दट्ठूणण्णत्थ वा वि मग्गित्ता ।
पडिगहणं कायव्वं णमोत्थु ट्ठाहुत्ति भणिदूण ॥
णेऊण णिययगेहं णिरवज्जाणुवहदुच्चठाणम्मि ।
ठविदूण तदो चलणाण धोवणं होदि कायव्वं ॥
पादोदयं पवित्तं सिरम्मि ठादूण अच्चणं कुज्जा ।
गंधक्खय-कुसुमणिवेज्जदीवधूवेहिं य फलेहिं ॥

वे ही तीन भेद बतलाते हैं—

मुनि उत्तम पात्र है। श्रावक मध्यम पात्र है और सम्यग्दृष्टि जघन्य पात्र है। गुणविशेषके सम्बन्धसे उन उत्तम, मध्यम और जघन्य पात्रोंमें परस्परमें तथा दूसरोंसे भेद है ॥४४॥

विशेषार्थ—मुनि या यति या साधुमें सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्र इन तीनों रत्नोंका संयोग रहता है। श्रावकमें सम्यग्दर्शन और सम्यग्ज्ञानके साथ एकदेश संयम रहता है और सम्यग्दृष्टि असंयत सम्यग्दृष्टि होता है उसमें संयमका एकदेश भी नहीं रहता है। इस तरह इन गुणोंके संयोगके भेदसे पात्रके तीन भेद रत्नकरण्डके सिवाय सब श्रावकाचारोंमें कहे हैं ॥४४॥

दानकी विधिके प्रकार और उनकी विशेषता बतलाते हैं—

[1]पूर्वाचार्य यथायोग्य भक्तिपूर्वक उपचारसे विशेषताको प्राप्त प्रतिग्रह, उच्चस्थान, पादप्रक्षालन, पूजा, नमस्कार, मनःशुद्धि, वचनशुद्धि, कायशुद्धि इन नौ विधियोंको अर्थात् दान देनेके उपायोंको जानते हैं ॥४५॥

विशेषार्थ—यह उत्तम पात्रोंको दान देनेकी नौ विधियाँ हैं। अपने घरके द्वारपर यतिको देखकर 'मुझपर कृपा करें' ऐसी प्रार्थना करके तीन बार 'नमोऽस्तु' और तीन बार 'स्वामिन् तिष्ठ' कहकर ग्रहण करना प्रतिग्रह है। यतिके स्वीकार करने पर उन्हें अपने घरके भीतर ले जाकर निर्दोष बाधारहित स्थानमें ऊँचे आसनपर बैठाना दूसरी विधि है। साधुके आसन ग्रहण कर लेनेपर प्रासुक जलसे उनके पैर धोना और उनके पादजलकी वन्दना करना तीसरी विधि है। पैर धोनेके बाद साधुका अष्ट द्रव्यसे पूजन करना चौथी विधि है। पूजनके बाद पंचांग प्रणाम करना छठी विधि है। उसके बाद चार शुद्धियाँ हैं। आहार देते

१. 'संग्रहमुच्चस्थानं पादोदकमर्चनं प्रणामं च ।
वाक्कायमनःशुद्धिरेषणशुद्धिश्च विधिमाहुः ॥'—पुरुषा. १६८ श्लो. ।

पुप्फंजलि खिवित्ता पयपुरदो वंदणं तदो कुज्जा।
चइऊण अट्टरुद्दे मणसुद्धी होदि कायव्वा ॥
णिट्ठुर-कक्कसवयणाण वज्जणं तं वियाण वचिसुद्धि।
सव्वत्थ संउडंगस्स होदि तह कायसुद्धी वि ॥
चोद्दसमलपरिसुद्धं जं दाणं सोहिदूण जदणाए।
संजदजणस्स दिज्जदि सा णेया एसणा सुद्धी ॥' [वसु. श्रा. २२६-२३१] ॥४५॥

अथ देयद्रव्यविशेषनिर्णयार्थमाह—

पिण्डशुद्धयुक्तमन्नादिद्रव्यं वैशिष्टयमस्य तु।
रागाद्यकारकत्वेन रत्नत्रयचयाङ्गता ॥४६॥

अन्नादि—आहारौषधावासपुस्तकपिच्छिकादि। चयाङ्गं—वृद्धिकारणम्। तदुक्तम्—

'रागद्वेषासंयममदःदुःखभयादिकं न यत्कुरुते।
द्रव्यं तदेव देयं सुतपःस्वाध्यायवृद्धिकरम् ॥' [पुरुषार्थ. १७०] ॥४६॥

अथ दातृलक्षणं तद्वैशिष्टयं चाह—

नवकोटिविशुद्धस्य दाता दानस्य यः पतिः।
भक्तिश्रद्धासत्त्वतुष्टिज्ञानालौल्यक्षमागुणाः ॥४७॥

